राष्ट्रियसंस्कृतविश्वविद्यालयग्रन्थमाला – ३५१ ISSN: 2231-0452

# महस्विनी

## विद्वत्समीक्षिता सन्दर्भिता च शोधपत्रिका

**कुसुमम् :** जनवरी – डिसेम्बर २०२१ **सम्पुटम् :** संयुक्तम् (१,२)

**प्रधानसम्पादकः**
**आचार्यः वि. मुरलीधरशर्मा**
**कुलपतिः**

**सम्पादकः**
**आचार्यः कोराड सूर्यनारायणः**

राष्ट्रियसंस्कृतविश्वविद्यालयः
(केन्द्रीयविश्वविद्यालयः)
तिरुपतिः - ५१७५०७

# महस्विनी

(विद्वत्समीक्षिता सन्दर्भिता च शोधपत्रिका)

**ISSN : 2231-0452**

कुसुमम् : जनवरी – डिसेम्बर २०२१
सम्पुटम् : संयुक्तम् (१,२)

प्रकाशनवर्षम् : २०२१
प्रतिकृतयः : १५०

© राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः – ५१७५०७, आन्ध्रप्रदेशः।

प्रकाशकः
**कुलसचिवः**
राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

संयोजकः
**अनुसन्धानप्रकाशनविभागः**
राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

जालपुटसङ्केतः : https://nsktu.ac.in

मूल्यम् : ₹ 538/-

मुद्रकः : मुद्रिका, विजयवाडा – ५२००१० (आ.प्र.)

N. S. University Publication Series No. - 351 **ISSN: 2231-0452**

# MAHASVINĪ

(Peer-reviewed and Refereed Research Journal)

**Volume :** January - December 2021 **Part :** Combined (1&2)

**General Editor**
**Prof. V. Muralidhara Sharma**
**Vice - Chancellor**

**Editor**
**Prof. Korada Suryanarayana**

**NATIONAL SANSKRIT UNIVERSITY**
**(Central University)**
**TIRUPATI - 517 507**

**MAHASVINĪ**
(Peer-reviewed and Refereed Research Journal)
**ISSN : 2231-0452**

Volume : January - December 2021
Part : Combined (1&2)

Year of Publication : 2021
Copies : 150

© National Sanskrit University, Tirupati-517507, A.P.

Publisher :

**REGISTRAR**
National Sanskrit University, Tirupati, Andhra Pradesh

Co-ordinator :

**Research and Publications Department**
National Sanskrit University, Tirupati

Website : https://nsktu.ac.in

Price : ₹ 538/-

Printed at : Mudrica, Vijayawada - 520010 (A.P.)

**Disclaimer:**

The views expressed in the Research papers are those of the authors and not of the editors.

आचार्य वि. मुरलीधरशर्मा
कुलपतिः
राष्ट्रियसंस्कृतविश्वविद्यालयः
केन्द्रीयसंस्कृतविश्वविद्यालयाधिनियमानुसारं (२०२०) स्थापितः
(प्राक्तनराष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः)
तिरुपतिः - ५१७ ५०७ (आं.प्र)

Prof. V. MURALIDHARA SHARMA
Vice-Chancellor
NATIONAL SANSKRIT UNIVERSITY
A Central University, established under
Central Sanskrit Universities Act, 2020)
TIRUPATI - 517 507 (A.P.)
(Erstwhile Rashtriya Sanskrit Vidyapeetha, Tirupati)
Re-Accredited by the NAAC at 'A' Grade - 3.71 CGPA out of 4 point scale
Ph : (Off.) 0877 - 2287680 ; (Res.) 2286686 ; E-mail : vc.vidyapeetha@gmail.com ; Website : nsktu.ac.in

# पुरोवाक्

अखिलाण्डकोटिब्रह्माण्डनायकस्य शेषाचलश्रीनिवासस्य पद्मावतीजानेः श्रीवेङ्कटेशस्य कृपाकटाक्षेण नैरन्तर्येणैधमानस्याविश्वं कीर्तिं लभमानस्य तिरुपतिस्थस्य राष्ट्रियसंस्कृतविश्वविद्यालयस्य शोधप्रकाशनविभागेन प्रकाश्यमानायाः सुप्रथितायाः विद्वत्समितिसमीक्षितायाः सन्दर्भितायाश्चास्याः 'महस्विनी' इत्याख्यायाः शोधपत्रिकायाः कुसुममिदं प्रकाश्य विद्वत्तल्लजानां करकमलयोः सादरं समर्पयितुं नितान्तं मोमोत्ति मे स्वान्तम्।

तत्र आप्राक्कालान्निरवच्छिन्नं प्रवर्तमाने प्रवर्धमाने च गवेषणाकार्ये नैके विपश्चित्पश्चिमा विविधशास्त्रनदीष्णाः पूर्वतनानां विचारविगर्भितशेवधीन् विमृश्य तैस्तत्रानाविष्कृतान् स्वोपज्ञान् विषयानधिकृत्य ग्रन्थान् प्रणीय शोधप्रबन्धाँश्च विनिर्माय संस्कृतवाङ्मयं संवर्धयन्तोऽ-नुसन्धानक्षेत्रस्य सीमानमपि नित्यं परिवर्धयन्तो दृश्यन्ते बद्धपरिकराः। तामेव परम्परामिदानीमपि अनुसरन्त आधुनिकविद्वांसः, शोधार्थिनो युवगवेषकाश्च स्वस्वविषये क्रियमाणे शोधकर्मणि गुणवत्तामादातुं यतमाना वर्तन्ते। तैः कृतं कार्यं परिशील्य समीक्ष्य च प्रोत्साहयितुं सहायिका भवन्ति एतादृश्यः शोधपत्रिकाः। तदर्थं बहुभिः संस्थाभिः निकायैर्वा विदुषां मार्गदर्शनेन बहुविधशोधपत्रिकाः प्रकाश्यन्ते। एतदुद्दिश्यास्माकं विश्वविद्यालयेनापि तत्र-तत्र कार्यरतेभ्यो विद्वद्भ्यः, प्राध्यापकेभ्यः शोधच्छात्रेभ्यश्च शोधनिबन्धान् शोधलेखान् सङ्कलय्य विद्वन्मण्डलीद्वारा तेषां गुणवत्तां मौलिकतां च परीक्ष्य विद्वत्समीतेः समीक्षायाः संस्तुतेः परं संस्तुतान् लेखान्समादृत्य पत्रिकेयं प्रकाश्यते। अनेनानुसन्धानक्षेत्रे गवेषणारतच्छात्राणां कृते नूतनसिद्धान्तानां काचिदपूर्वा सरणिः समुपलब्धा

भवतीति मे द्रढीयान् विश्वास:। महस्विन्याश्चेदं कुसुमं पण्डितानां पाण्डितीप्रपूर्णै: व्याकरण–साहित्य–वेदविज्ञान–न्याय–ज्योतिष–पुराण–इतिहास–आङ्ग्लसाहित्य–महाकाव्य–शिक्षाशास्त्र–अनुवादादिविषयसम्बद्धैर्गभीरैर्मौलिकै: षोडशभिर्लेखै: षोडशभि: कलाभि: सुशोभितशशीव सुशोभतेतरां नितराम्। एवञ्चास्या: पत्रिकाया एतादृशं सुन्दरं कलेवरं सम्पादयितुं यैर्मनीषिभिरवयवरूपा: स्वीया लेखा: समर्पितास्तेभ्य: समेभ्य: हृदयेन धन्यतावचांसि प्रकटयामि।

एवमेव एतादृशप्रकाशनकार्यस्य साफल्याय निरन्तरं प्रवर्तमानो न: शोधप्रकाशनविभाग: तथैवान्तर्बाह्यसदस्यै: समन्विता प्रकाशनसमीक्षासमितिश्च, यस्या मार्गनिर्देशने एतत्प्रकाशनकार्यं कोरोनामहामारीसंक्रमिते दुष्कालेऽपि सत्स्वपि बहुविधेषु विघ्नेषु सुसम्पन्नमिति सर्वेषामपि समितिसदस्यानां शोधप्रकाशनविभागीयानाञ्च कृते कृतज्ञतां मदीयां निवेदयामि।

इत्थं श्रीवेङ्कटेशस्य कृपाकटाक्षेण विश्वविद्यालयेन निर्विघ्नतया सुरभारतीसेवेयं सदैव प्रवर्ततामित्याशया पुनरपि भगवते मदीयान् प्रणामान् संसूच्य महस्विनीयमागामिनि काले प्रकाश्यमानै: कुसुमै: स्वज्ञानसुरभिणा लोकान् रञ्जयन्ती इतोऽपि महनीयतां प्राप्नुवन्ती च समेषां प्रीतिकरा भवत्वीति कामयते।

विदुषां वशंवद:

मुरलीधर:

**(विरिवेण्टि मुरलीधरशर्मा)**

कुलपति:

# सम्पादकसमितिः

## प्रधानसम्पादकः

**आचार्यः वि.मुरलीधरशर्मा**

कुलपतिः, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

## सम्पादकः

**आचार्यः कोराड सूर्यनारायणः**

अनुसन्धानप्रकाशनविभागाध्यक्षः, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

## सदस्याः

**आचार्यः पेन्ना मधुसूदनः**

दर्शनसङ्कायप्रमुखः, कालिदासंस्कृतविश्वविद्यालयः, रामटेक

**आचार्यः वीरनारायण पाण्डुरङ्गी**

वेदान्तसङ्कायप्रमुखः, कर्नाटकसंस्कृतविश्वविद्यालयः, वेङ्गलुरु

**डा. वेङ्कट राधेश्यामः**

उपनिदेशकः, शोधप्रकाशनविभागः, श्रीवेङ्कटेश्वरवेदविश्वविद्यालयः, तिरुपतिः

**आचार्यः राणी सदाशिवमूर्तिः**

शैक्षिकसङ्कायप्रमुखः, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

**आचार्यः जि.एस.आर्.कृष्णमूर्तिः**

साहित्यसंस्कृतिसङ्कायप्रमुखः, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

**डा.पङ्कजकुमारव्यासः**

सहाचार्यः, व्याकरणविभागः, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

**डा. शिवरामभट्टः, डा. राजेशमीना**

सहाचार्यः, अनुसन्धानप्रकाशनविभागः, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

**डा. सोमनाथदाशः, डा.सीहेच्. नागराजुः**

सहायकाचार्यः, अनुसन्धानप्रकाशनविभागः, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

**डा. दिल्लीपकुमारमिश्रः**, शोधसहायकः

# महस्विनी

**(तिरुपतिस्थराष्ट्रियसंस्कृतविश्वविद्यालयशोधपत्रिका)**

१. एषा षाण्मासिकी शोधपत्रिका।

२. अस्या: प्रकाशनं प्रतिवर्षं जनवरी–जुलै एवम् अगस्त–डिसेम्बरमासेषु भवति।

३. अस्या: प्रधानमुद्देश्यं संस्कृतज्ञेषु स्वोपज्ञानुसन्धानप्रवृत्तेरुद्बोधनं प्रोत्साहनं विविध-दृष्ट्याऽनुसन्धेयविषयाणां प्रकाशनं च।

४. अस्यां तिरुपतिस्थराष्ट्रियसंस्कृतविश्वविद्यालयस्थानामन्येषां च विदुषां स्वोपज्ञविचारपूर्णा अनुसन्धानप्रधाननिबन्धा: प्रकाश्यन्ते।

५. अप्रकाशितानां दुर्लभानां प्राचीनाचार्यरचितानां लघुग्रन्थानां सम्पादन–भावानुवाद–टिप्पण्यादिपुरस्सरं प्रकाशनमप्यस्यां क्रियते।

६. पत्रिकाया: स एव अङ्क: लेखकाय नि:शुल्कं दीयते, यस्मिंस्तदीयो निबन्ध: प्रकाशितो भवति।

७. अस्यां पत्रिकायां विशिष्टानां संस्कृतवाङ्मयसम्बद्धानां विविधासु भाषासु प्रणीतानां ग्रन्थानां समालोचना अपि प्रकाश्यन्ते। तदर्थं द्वे प्रकाशितप्रतिकृती प्रेषयितव्ये। आलोच्यग्रन्थस्य समालोचना यस्मिन्नङ्के प्रकाशिता सोऽप्यङ्को ग्रन्थकर्त्रे नि:शुल्कं दीयते, समालोचना-पत्राण्यपि यथासौविध्यं दीयन्ते।

८. अस्या वार्षिकशुल्कं रू.२५५/–, द्विवार्षिकशुल्कं रू.४२५/–, त्रिवार्षिकशुल्कं रू.६८०/– सन्ति, इदं शुल्कं **कुलसचिव:, राष्ट्रियसंस्कृतविश्वविद्यालय:, तिरुपति:, आन्ध्रप्रदेश:–५१७५०७** इति सङ्केतेन बैंकड्राप्ट द्वारा प्रेषणीयम्।

— **सम्पादक:**

**सू.** — शोधलेखप्रणेतार: यथाकालं स्वकीयान् संस्कृताङ्ग्लभाषाप्रणीतान् शास्त्रविषयकान् अनुसन्धानलेखान् प्रेषयन्तु, यथावसरं सम्पादकसमिते: अनुशंसानुरूपं लेखा: प्रकाशयिष्यन्ते।

# सम्पादकीयम्

संस्कृतवाङ्मये अनुसन्धानस्य क्षेत्रं व्यापकं वर्तते। प्राचीनैर्महर्षिभिः प्रतिपादितविषयेषु नवीनतत्त्वान्वेषणम् उत प्रसङ्गानुसारं नवीनपदार्थस्य प्रतिपादनम् अनुसन्धानस्य द्वारमुद्घाटयति। स्वविकल्पानुसारं विद्वांसः काले काले समाजस्य अपेक्षानुसारं नवीनाविष्कारं कुर्वन्त एव भवन्ति अकृषत च। भाषाक्षेत्रे प्रायोगिकक्षेत्रे च अनुसन्धानस्य स्वरूपं भिन्नं भवितुमर्हति। परन्तु उभयत्रापि नवीनतत्त्वान्वेषणमिति समानं वर्वर्ति। संस्कृतं भाषाक्षेत्रे वर्तत इति कृत्वा व्याख्यानरूपम् अनुसन्धानं बहुधा व्यापकं स्थानमावहति। अतः संस्कृतवाङ्मये अभियुक्तैः प्राचीनकालादारभ्य अद्य यावत् नवीनतथ्यप्रतिपादकं व्याख्यानात्मकम् अनुसन्धानकार्यं विहितमस्ति। तर्हि ततोऽप्यधिकं नवीनं किं वा अवशिष्टमस्तीति केषाञ्चन शोधलेखकानां मनस्सु नूतनविषयमधिकृत्य लेखनावसरे अनुयोगः जागर्ति। परन्तु कस्यापि विषयस्य गभीरावलोकनेन वारं वारम् अधिगमनेन च विद्यमाने विषये नवीनचिन्तनं स्फुरति आहोस्वित् अवशिष्टं नवीनं तत्त्वं वा प्रादुर्भवति। अतः शोधलेखनात् पूर्वं कस्यापि विषयस्य कूलङ्कषमध्ययनम् अवश्यं क्रियते। येन समाजोपयोगि नवीनशोधकार्यं समेषां पुरस्तात् समायायात्।

एवमेव नूतनविषयप्रतिपिपादयिषितृणां शोधलेखकानां लेखान् बहुभ्यः वत्सरेभ्यः प्रकाशयन्ती शिक्षाक्षेत्रे महनीयं स्थानमावहति राष्ट्रियसंस्कृतविश्वविद्यालयेन प्रकाश्यमानेयं 'महस्विनी' सार्थकनामधेया शोधपत्रिका। अस्याः महस्विन्याः प्रकाश्यमानेऽस्मिन् द्वितीये कुसुमे विभिन्नशास्त्रेषु कृतपरिश्रमवताम् आचार्याणां शोधच्छात्राणां विदुषां च आहत्य षोडश लेखाः प्रकाश्यन्ते। तत्र व्याकरणम्, साहित्यम्, वेदविज्ञानम्, शिक्षाशास्त्रम्, आधुनिकविषयः, न्यायः, अनुवादः, स्तत्रकाव्यम्, ज्यौतिषम् इत्यादिषु प्राधान्यविषयेषु नवीनचिन्तनधारामाश्रित्य लिखिताः लेखाः विलसन्ति।

एतेषां शोधलेखानां समीकरणे मूल्याङ्कने च नैकेषां विदुषां साह्यमनुसन्धान–प्रकाशनविभागेन प्राप्तमस्ति। एवमेव विश्वविद्यालयस्य कुलपतीनां प्रेरणया प्रोत्साहनेन च इयं 'महस्विनी' अविच्छिन्नतया प्राकाश्यमेति। विश्वविद्यालयस्य शैक्षणकिसङ्कायप्रमुखाणां मार्गदर्शनं सन्दर्भेऽस्मिन् अस्माभिः प्राप्यत। तथा च सम्पादकमण्डसदस्याः अस्याः शोधपत्रिकायाः अन्तिमस्वरूपप्राप्तौ साह्यमदुः। विश्वविद्यालयस्य कुलसचिवसमेताः समे अधिकारिणः अस्याः प्रकाशने प्राशासनिकम् अपेक्षितं साहाय्यमकार्षुः। अतः अनुसन्धानविभागपक्षतः एतेभ्यः समेभ्यः धन्यवादान् वितनोमि।

**(कोराड सूर्यनारायणः)**

सम्पादकः

# शोधलेखानुक्रमणी

**कुसुमम् :** जनवरी – डिसेम्बर २०२१ **सम्पुटम् :** संयुक्तम् (१,२)

पुटसंख्या

१. **व्याकरणशास्त्रस्य विकासे पण्डितरामप्रसादत्रिपाठिनां योगदानम्** 1

- प्रो. रमाकान्तपाण्डेय:

२. **ध्वनिसिद्धान्त: तस्य तदनन्तरकाव्यशास्त्रीयग्रन्थेषु प्रभाव:** 11

- आचार्य: जि.एस.आर्.कृष्णमूर्ति:

३. **Pandit Madhusudan Ojha's Contribution to Veda Vijnana** 23

- Dr. Saroj Kaushal

४. **Revisiting Raja Rao's Kanthapura** 29

- Prof. R. Deepta

५. **संस्कृतशिक्षकप्रशिक्षणे नवोन्मेषस्य चिन्तनं प्रायोगिकता च** 39

- प्रो.चन्द्रकान्तभट्ट:

६. **व्याकरणशास्त्रे कारकस्य महत्त्वम्** 43

- डा. पङ्कजकुमारव्यास:

७. **वाक्यपदीयमहाभाष्ययो: सन्दर्भे ध्वनिपदार्थविश्लेषणम्** 49

- डा. प्रमोदकुमारशर्मा

८. **नामि (अ.६.४.३) इति सूत्रार्थविमर्श:** 65

- डा. शिवरामभट्ट:

९. **लिङ्गमविवक्षितम्** 71

- डा. ओ.गुरुप्रसाद कल्याण शास्त्री

१०. **Daśāvatāra theory in the Gītagovinda : A cultural study** 77

- Dr. Pratap Chandra Tripathy

११. **ज्यौतिषीयरत्नविज्ञानम्** 85

- डा. मनोजश्रीमाल:

१२. **पाणिनीयव्याकरणे अतिदेशविचार:** 107

- डा. नरेशकुमारबैरवा

१३. **साम्प्रतिककाले संस्कृतात् इतरभाषासु इतरभाषाभ्यश्च संस्कृते अनुवादनस्य आवश्यकता** 123

- डा. कनपलकुमार:

१४. **महाभारते स्त्रीशिक्षाविमर्श:** 131

- डा. दयानिधिशर्मा

१५. **History of Indra-mahotsava in ancient India and traces in current Asia** 139

- Manisha Deepak Puranik

१६. **अन्नंभट्टकृतोद्योतनदिशा 'कारके' इति सूत्रसमीक्षणम्** 149

- शुभङ्करसामन्त:

महस्विनी – विद्वत्समीक्षिता सन्दर्भिता च शोधपत्रिका (ISSN: 2231-0452)
**कुसुमम् :** जनवरी – डिसेम्बर २०२१ **सम्पुटम् :** संयुक्तम् (१,२)

# व्याकरणशास्त्रस्य विकासे पण्डितरामप्रसादत्रिपाठिनां योगदानम्

**प्रो.रमाकान्तपाण्डेयः***

ऊनविंश-विंशशतकयोः संस्कृतशास्त्रपरम्परायाः काव्यप्रणयनपरम्परायाश्च सुमहान् विकासः समजनीति कालखण्डोऽयं भारतीयविद्यानां सुवर्णकालत्वेन व्यपदिश्यते विद्वद्भिः। सेयं शास्त्रविकासपरम्परा यद्यपि राजते समग्रेऽपि भारतराष्ट्रे तथापि भूतभावनेन भगवता विश्वनाथेनाऽधिष्ठितायां काश्यां परम्पराया अस्या विकासे आधिक्येन परिलक्ष्यते। न्याये, व्याकरणे, काव्यशास्त्रे अन्येषु च शास्त्रेषु काशीस्थैराचार्यैः सुमहान् विचारोऽकारि। विस्तरभिया तत्सर्वं परित्यज्य निबन्धेऽस्मिन्नाचार्यरामप्रसादत्रिपाठिनां व्याकरणशास्त्रे योगदानं नाऽतिविस्तरेण समुपस्थाप्यते।

**आचार्यरामप्रसादत्रिपाठिनां संक्षिप्तपरिचयः –**

अभिनवपाणिनिरूपेण काशीस्थपण्डितमण्डल्यां प्रथिता आचार्या रामप्रसादत्रिपाठिनः १९२० तमे क्राईष्टाब्दे दिसम्बरमासस्य १५ दिनाङ्के उत्तरप्रदेशस्य जौनपुरमण्डलान्तर्वर्तिनि बेल्हानाम्नि ग्रामे सरयूपारीणब्राह्मणवंशे श्रीमुखशाण्डिल्यगोत्रीयश्रीरामस्वरूपत्रिपाठिनो ज्येष्ठपुत्रत्वेन जनिमलभन्त। एतेषां माता दसवन्तीदेवी सद्धर्मपरायणा गृहकार्यसम्पादननिपुणा भगवतो विश्वनाथस्य पूजने समर्पितभावाऽभूत्। अष्टमीं कक्षां ग्रामस्थविद्यालयादुत्तीर्य त्रिपाठिचरणाः शास्त्राध्ययनं प्रत्युन्मुखा बभूवुः। सर्वप्रथमं ते रामचौराग्रामनिवासिनो रामपदार्थशुक्लस्य सन्निधौ लघुसिद्धान्तकौमुद्या अध्ययनं चक्रुः। अनन्तरं बाराणसीं प्राप्य गुरोः भास्करानन्दात् सिद्धान्तकौमुदीं महावैयाकरणश्रीहरिनारायणत्रिपाठिनः (तिवारीजीति नाम्ना

* आचार्यः, साहित्यविभागः, केन्द्रीयसंस्कृतविश्वविद्यालयः, जयपुरपरिसरः, त्रिवेणीनगरम्, गोपालपुराबाईपास, जयपुरम्।

विश्रुतात्) भाष्यान्तं व्याकरणमपीपठन्। काशीस्था महातार्किका बङ्गदेशीया वामाचरणभट्टाचार्यास्तेषां न्यायशास्त्रे गुरव आसन्। केशवनाथद्विवेदादपि ते न्यायशास्त्रमपठन्। माधवशास्त्री "दातारः" श्रीमद्भागवतं दुर्गादत्तमिश्रश्च कर्मकाण्डमध्यापयत्। साहित्यशास्त्रपिपठिषया त्रिपाठिपादा महादेवोपाध्यायस्य शिष्यतां प्रपन्नास्तथैव नेने गोपालशास्त्रिणः श्रीचरणेषूपविश्य मीमांसाशास्त्रं रघुनाथशर्मणः सकाशाच्च वेदान्तादिशास्त्राण्यपठन्।

आचार्यरामप्रसादत्रिपाठिनः १९४४ तमे वर्षे काशिकराजकीयसंस्कृतमहाविद्यालयस्य नव्यव्याकरणाचार्यपरीक्षामुदतरन्। काशीस्थेषु बहुषु संस्कृतमहाविद्यालयेषु शिष्यान् अध्यापयन्तस्ते १९५३ तमे वर्षे वाराणसेयसंस्कृतविश्वविद्यालयस्य नव्यन्यायाचार्योपाधिमलभन्त। वाराणसेयसंस्कृतविश्वविद्यालये "पाणिनीयव्याकरणे प्रमाणसमीक्षणम्" इति मौलिकं महनीयं च शोधप्रबन्धं समर्प्य ते १९६८ तमे वर्षे "विद्यावाचस्पतिः" (डी.लिट्.) इत्युपाधिमध्यगच्छन्।

**अध्यापनम् –**

आचार्यरामप्रदासत्रिपाठिनः काशीस्थेषु बहुषु संस्कृतमहाविद्यालयेषु प्रायशः त्रयोदशवर्षाणि नव्यव्याकरणं न्यायादिशास्त्राणि च अपाठयन्। तेषां शिष्याणां शास्त्रेषु नैपुण्यं वीक्ष्य तदानीं सर्वेऽपि विद्वांसश्चकितचकिता अभूवन्। आचार्यप्रवरत्रिपाठिपादानां शास्त्राध्यापनशैली काश्यां सर्वत्र प्रसृताऽभूत्। शास्त्रार्थसभासु समग्रेऽपि देशे ग्रन्थग्रन्थिस्फोरणपटुत्वं तेषां प्रसारमलभत। १९५३ तमे वर्षे ते काशीहिन्दूविश्वविद्यालयस्य संस्कृतमहाविद्यालये (यो हि सम्प्रति संस्कृतविद्याधर्मविज्ञानसङ्कायनाम्ना प्रसिद्धिं लभते) सबहुमानं नियुक्ताः १९६५ वर्षपर्यन्तं तत्र व्याकरणशास्त्रं पाठयामासुः। अनन्तरं १९६५ तमे वर्षे सम्पूर्णानन्दसंस्कृतविश्वविद्यालये प्राचीनव्याकरणदर्शनविभागे आचार्यपदे नियुक्ताः सन्तस्ते १९८१ वर्षं यावत् तत्र सङ्कायाध्यक्षादिपदमलञ्चक्रुः। सेवानिवृत्त्यनन्तरं सम्पूर्णानन्दसंस्कृतविश्वविद्यालये ते आजीवनं शास्त्राध्यापनं चक्रुः।

**पुरस्काराः –**

आचार्या रामप्रसादत्रिपाठिनः उत्तरप्रदेशसर्वकारेण भारतसर्वकारेण अन्याभिश्च बह्वीभिः संस्थाभिः बहुविधपुरस्कारैः सभाजिता अभूवन्। तेषु केचन प्रमुखाः पुरस्कारा इह लिख्यन्ते –

१) राष्ट्रपतिपुरस्कारः

२) अखिलभारतीयसंस्कृतसाहित्यशास्त्रार्थप्रतियोगितापुरस्कारः, जालन्धरः (पञ्जाब), सर्वोच्चपुरस्कारः,१९५३

३) उत्तरप्रदेशसंस्कृतअकादेम्या गङ्गानाथझापुरस्कारः

४) उत्तरप्रदेशसंस्कृतअकादेम्या विशिष्टपुरस्कारः

५) उत्तरप्रदेशसंस्कृतअकादेम्या संस्कृतसाहित्यपुरस्कारः

६) उत्तरप्रदेशसंस्कृतअकादेम्या विश्वभारतीपुरस्कारः, १९८६

७) श्रीवाणीपुरस्कारः, रामकृष्णडालमिया-श्रीवाणीन्यासः, १९९६

**आचार्यरामप्रसादत्रिपाठिनां शिष्यपरम्परा –**

त्रिपाठिचरणानां महती शिष्यपरम्परा राष्ट्रेऽस्मिन् विलसति। तेषां केचन प्रमुखाः शिष्याः सन्ति –

१) (स्व.) अभिनवपाणिरूपेण प्रथिताः चारुदेवशास्त्रिणः।

२) (स्व.) आचार्याः सीतारामशास्त्रिणः काशीस्थाः।

३) (स्व.) आचार्याः देवस्वरूपमिश्राः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य कुलपतिचराः।

४) पद्मश्रिया अलङ्कृता आचार्याः रामयत्नशुक्लाः (वाराणसीस्थाः)।

५) आद्याप्रसादमिश्राः सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य व्याकरणविभागाध्यचराः। एवमेव श्रीकान्तपाण्डेयः, रामकिशोरशुक्लः, हरिप्रसादो दांगः (नेपालदेशीयः), पूर्णचन्द्रशर्मोपाध्यायः रामनारायणदासस्तथा चान्ये शताधिकास्तेषां शिष्या अद्यापि व्याकरणादिशास्त्रप्रचारपरायणा दृश्यन्ते।

**परिवारसदस्याः –**

आचार्याः रामप्रसादत्रिपाठिनः स्वभ्रातृषु ज्येष्ठा आसन्। एतेषां मध्यमभ्राता रामचन्द्रत्रिपाठी आसीत् कनिष्ठश्च रामदेवत्रिपाठी। त्रिपाठिपादानां त्रिषु पुत्रेषु ज्येष्ठः डा. रामेश्वरत्रिपाठी गोरखपुरजनपदसमीपवर्तिनि बड़हगलंजस्थे दर्शननेशनलस्नातकोत्तर-महाविद्यालये दर्शविभागाध्यक्षत्वेन कार्यं कृत्वा सेवानिवृत्तः। ते सम्प्रति काश्यां निवसन्तः अन्नपूर्णाविश्वनाथयोः आराधने संलग्नाः सन्ति। आचार्यजयप्रकाशत्रिपाठी त्रिपाठिपादानां द्वितीयपुत्रः। स सम्पूर्णानन्दसंस्कृतविश्वविद्यालये रामानुजवेदान्तविभागे कृतकार्यो विद्वान्। तृतीयः राजेन्द्रप्रसादत्रिपाठी वाराणसीस्थ-परमहंससंस्कृतमहाविद्यालये व्याकरणप्राध्यापक आसीत् किन्तु स असमये एव कालेन कवलीकृतः।

**आचार्यरामप्रसादत्रिपाठिनां कृतयः –**

आचार्यरामप्रसादत्रिपाठिचरणैः विविधग्रन्थानां प्रणयनमकारि। तैरनेके ग्रन्थाः सम्पादिता अनूदिताश्च। तेषु केषाञ्चित् संक्षिप्तपरिचयोऽत्र प्रदीयते।

**१) वैयाकरणभूषणसारसुबोधिनी –**

वैयाकरणभूषणसारग्रन्थो व्याकरणशास्त्रे सुप्रसिद्धोऽस्ति। कौण्डभट्टविरचितेऽस्मिन् वैयाकरणानां सर्वेऽपि दार्शनिकसिद्धान्ताः प्रतिपादिताः सन्ति। वैयाकरणभूषणसारग्रन्थे

त्रिपाठिचरणैः प्रणीतायां सुबोधिनीटीकायां वैयाकरणानां गभीरसिद्धान्तानां विश्लेषणं व्याख्यानं च कृतं विद्यते। ग्रन्थोऽयं सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य अनुसन्धानसंस्थानेन प्रकाशितः।

**२) गौरवाभिसन्धिप्रकाशः –**

महामुनिपतञ्जलिप्रणीतमहाभाष्ये रघुनाथशर्मपाण्डेयविरचितच्छायाटिप्पण्यां भार्गवशास्त्रिणा कृतानामाक्षेपानां निरासाय रामप्रसादत्रिपाठिचरणैः गौरवाभिसन्धिप्रकाशः प्रणीतः।

**३) प्रदीपोद्धारः –**

नागेशभट्टेन व्याकरणमहाभाष्ये लिखितायामुद्योतटीकायां बहुषु स्थलेषु प्रदीपटीकोपरि आक्षेपाः कृता विद्यन्ते। आचार्यरामप्रसादत्रिपाठिचरणैः नागेशकृताक्षेपाणां निरासाय प्रदीपोद्धारो विरचितः। स चाऽयं ग्रन्थः व्याकरणमहाभाष्यस्य द्वयोराह्निकयोर्लभ्यते।

**४) वैयाकरणसिद्धान्तमञ्जूषाटीका –**

अयं ग्रन्थः कुञ्जिका-रत्नप्रभाटीकाभ्यां सहितः सम्पादितः। सम्पूर्णग्रन्थे हिन्दीभाष्यं विरचितं त्रिपाठिपादैः। कठिनस्थलानां सप्रमाणं विवेचनमकारि हिन्दीभाष्यकारेण त्रिपाठिमहोदयेन।

**५) सिद्धान्तचिन्तामणिः –**

द्वयोर्भागयोर्विभक्तेऽस्मिन् ग्रन्थे प्रथमभागे व्याकरणदर्शनसम्बन्धिनो निबन्धाः सङ्कलिताः सन्ति। द्वितीये च भागे अष्टाध्याय्या नियमापवादसूत्राणां विमर्शो व्यधायि।

**६) शाब्दिकवृत्तिविमर्शः –**

अस्मिन् लघुग्रन्थे वैयाकरणाभिमतवृत्तीनां विमर्शः कृतो विद्यते। अयं “पाणिनीयव्याकरणे प्रमाणसमीक्षा” इति ग्रन्थस्य अंशविशेषः।

**७) स्फोटवादविमर्शः –**

अस्मिन् ग्रन्थे स्फोटविषयकसिद्धान्तानां स्थापना कृता वर्तते। अत्र शास्त्रान्तरेषु कृता स्फोटसिद्धान्तसमीक्षा निरासतां नीता।

**८) वैयाकरणसिद्धान्तकौमुदीटीका –**

अयं ग्रन्थः अप्रकाशितः।

श्रीमद्भिस्त्रिपाठिचरणैः विविधग्रन्थानां सम्पादनमप्यकारि। तेषु तन्त्रसङ्ग्रहः, रुद्रयामलम्, शिक्षासङ्ग्रहस्तथा चाऽन्ये बहवो ग्रन्थाः परिगण्यन्ते। एते सर्वेऽपि ग्रन्थाः सम्पूर्णानन्दसंस्कृतविश्वविद्यालयात् प्रकाशिताः सन्ति। एतैः लिखिताः शताधिका निबन्धा विविधासु शोधपत्रिकासु महनीयविदुषां समर्चाग्रन्थेषु तस्मिन् तस्मिन् ग्रन्थे च सन्ति प्रकाशिताः। न्याय-व्याकरण-वेदान्तादिविषयेषु सारस्वतीसुषमायाः प्रायशः सर्वेषु अङ्केषु त्रिपाठिपादानां निबन्धाः प्रकाशिता अभवन्। संस्कृतभाषया भाषान्तरे प्रभावः इति विषये धारावाहिकतया १९६८-१९६९ तमे वर्षे तेषां लेखाः प्रकाशिताः।

**९) पाणिनीयव्याकरणे प्रमाणसमीक्षा –**

अयं ग्रन्थो वस्तुतः सम्पूर्णानन्दसंस्कृतविश्वविद्यालये विद्यावाचस्पत्युपाधये समर्पितः शोधप्रबन्धस्तथापि अस्मिन् त्रिपाठिपादानां मौलिकचिन्तनवैशिष्ट्यं विलसति। विंशशतके व्याकरणशास्त्रस्य विकासपरम्परायाः कश्चन सुदृढस्तम्भो वर्तते। अत्र षड्सु भागेषु वैयाकरणानां प्रमाणप्रमेयविषयिणी समीक्षा विहिता। ग्रन्थस्य प्रथमभागे व्याकरणदर्शनानुसारि प्रमाण-लक्षणादिकं प्रत्यपादि। द्वितीयभागे बौद्धपदार्थवादिनां मतेन पक्षतादिकं निरूप्य अनुमानप्रमाणस्वरूपं प्रत्यतिष्ठापयद् ग्रन्थकारः। ग्रन्थस्य तृतीयभागे शब्दस्य स्फोटरूपता न्यरूपि त्रिपाठिचरणैः। तत्र शक्तिस्वरूपं तद्भेदास्तन्नियामकानि लक्षणादीनि च सप्रमाणं प्रतिपादितानि। चतुर्थभागस्य विवेच्यविषयरूपेण अनुपलब्धिप्रमाणमुपमानप्रमाणं च स्तः। तत्र अनयोः स्वरूपं निरूप्य शाब्दिकसम्प्रदाये तन्निरास उक्तः। पञ्चमभागे अभाव-परामर्श-

प्रत्यभिज्ञानां स्वतन्त्रप्रमाणता निराकृता। षष्ठे भागे व्याकरणदर्शनस्य गुण-क्रिया-लिङ्ग-सङ्ख्या-कारकादीनां प्रमेयाणां निरूपणं कृतं विद्यते। शाब्दिकनये शब्द एव सर्वप्रधानप्रमाणमिति "यच्छब्द आह तदस्माकं प्रमाणम्" इति भाष्योक्तिमाश्रित्य समुपस्थापयद् ग्रन्थकारः।

शब्दप्रमाणविवेचनप्रसङ्गे त्रिपाठिपादैः स्फोटसिद्धान्तस्य सर्वथा नवीना व्याख्यासरणिः भेदसङ्कल्पना च पुरस्कृता। वस्तुतस्त्रिपाठिपादानां विवेचनक्रमोऽयं किमप्यैतिह्यमवगाहते। त्रिपाठिपादानां पूर्ववर्तिना मनीषिणा रामाज्ञापाण्डेयेन विरचितास्त्रयो ग्रन्थाः शाब्दिकनिकाये "व्याकरणदर्शनभूमिका, व्याकरणदर्शनपीठिका, व्याकरणदर्शन-प्रतिमा" चेति नाम्ना सन्ति प्रसिद्धाः। व्याकरणदर्शनभूमिकाग्रन्थे श्रीमता पाण्डेयेन वैयाकरणभूषणसारस्य प्रभाटीकायां प्रतिपादितं वर्णस्फोटस्वरूपं प्रमाणतया समुदाहृतम्। तदित्थम् –

"तथा पचति इत्यत्र 'पच्' इति प्रकृतिव्यङ्ग्यः 'ति' इति प्रत्ययव्यङ्ग्यः स्फोटः वर्णस्फोटः। तार्किकाणां मते यच्छक्तं पदमिति तद्व्यङ्ग्यस्फोटस्यैव शाब्दिकनये वर्णस्फोटशब्देन व्यवहारः।[1]"

तदेतद्वीक्ष्य पण्डितप्रवरेण रामाज्ञापाण्डेयेन प्रोक्तम् -

"अस्यां स्थितौ वाक्यार्थज्ञानमस्माकं कृते वाक्यस्फोटस्य विलय एव स्यात्। नापि 'पचति' इत्यादौ पदस्फोटव्यवहारः। तथा चाऽयं विभागो नहि युक्तयुक्तः।[2]"

प्रभाटीकायास्तदिदं स्फोटस्वरूपव्याख्यानं दृष्ट्वा महता श्रमेण पाण्डेयमहोदयेन स्फोटव्याख्यानमकारि। तेन कौण्डभट्टप्रतिपादितस्फोटभेदानां परम्पराऽपि परित्यक्ता। नागेशभट्टस्य मतं स्वीकृत्य तेन स्फोटस्य भेदाः कल्पिताः। तत्र व्याडि-वाजप्यायनयोर्जातिव्यक्तिपक्षावादाय स्फोटस्य षोडशभेदाः प्रदर्शिताः –

---

[1] वैयाकरणभूषणसारः, प्रभासहितः, पृ.४५१

[2] व्याकरणदर्शनभूमिका, पृ.२८

१) प्रकृतिस्फोटः, २) प्रत्ययस्फोटः, ३) प्रकृतिजातिस्फोटः,
४) प्रत्ययजातिस्फोटः, ५) अखण्डप्रकृतिस्फोटः, ६) अखण्डप्रत्ययस्फोटः,
७) वर्णस्फोटः, ८) वर्णजातिस्फोटः, ९) पदस्फोटः,
१०) पदजातिस्फोटः, ११) अखण्डपदस्फोटः, १२) अखण्डपदजातिस्फोटः,
१३) वाक्यस्फोटः, १४) वाक्यजातिस्फोटः, १५) अखण्डवाक्यस्फोटः,
१६) अखण्डवाक्यजातिस्फोटः।

कौण्डभट्टेन स्फोटस्य अष्टौ भेदा अङ्गीकृताः। तत्र कौण्डभट्टेन स्फोटव्यञ्जकभेदेन स्फोटभेदानां सङ्कल्पना कृता किन्तु श्रीमता पाण्डेयेन स्फोटबोध्यार्थभेदेन स्फोटभेदाः कल्पिताः।

रामाज्ञापाण्डेयप्रतिपादितोऽयं स्फोटसिद्धान्तः कियान् प्रामाणिकः स्वीकारार्हो वेति विद्वद्भिः विचारणीयम्। ग्रन्थस्याऽस्य रचनासमनन्तरमेव न्यायचक्रचूडामणिना तार्किकशिरोमणिना बदरीनाथशुक्लेन सारस्वतीसुषमायां प्रकाशिते स्वीये "स्फोटविस्फोट" इत्यालेखे पाण्डेयप्रतिपादितभेदानां समीक्षणं व्यधायि। तैरुक्तं यत् पाण्डेयप्रतिपादितोऽयं सिद्धान्तो गौरवग्रस्तो वर्तते। श्रीमता शुक्लेन पाण्डेयप्रतिपादितसिद्धान्तस्य सर्वेऽपि पक्षा विचारिता निराकृताश्च।[1]

आचार्यरामाज्ञापाण्डेयस्य सिद्धान्तानां बदरीनाथशुक्लाक्षेपाद् रक्षणार्थं पण्डितप्रवरा रामप्रसादत्रिपाठिनः प्रोचुः –

व्याकरणदर्शनभूमिकायां स्फोटस्य षोडशभेदा न सङ्ख्यानिर्धारणपरकाः सन्ति। तत्र तदुपलक्षणमात्रम्। भेदानां विमर्शे क्रियमाणे बाह्याभ्यन्तरभेदाद् द्वात्रिंशद्भेदाः स्फोटस्य सम्भवन्ति। तत्रादौ बाह्यस्फोटभेदाः –

१) एकवर्णरूपप्रकृतिस्फोटः

---
[1] सारस्वतीसुषमायाः १२.२ अङ्के, पृ.३४-३६

२) एकवर्णरूपप्रत्ययस्फोटः
३) अनेकवर्णवत्प्रकृतिस्फोटः
४) अनेकवर्णवत्प्रत्ययस्फोटः
५) अखण्डानेकवर्णवत्प्रकृतिस्फोटः
६) अखण्डानेकवर्णवत्प्रत्ययस्फोटः
७) एकवर्णरूपप्रकृतिजातिस्फोटः
८) एकवर्णरूपप्रत्ययजातिस्फोटः
९) अनेकवर्णवत्प्रकृतिजातिस्फोटः
१०) अनेकवर्णवत्प्रत्ययजातिस्फोटः
११) पदस्फोटः
१२) अखण्डपदस्फोटः
१३) वाक्यस्फोटः
१४) अखण्डवाक्यस्फोटः
१५) अखण्डपदजातिस्फोटः
१६) अखण्डवाक्यजातिस्फोटः

एते स्फोटस्य बाह्यभेदमादाय कल्पिताः भेदाः। आन्तरभेदेनाऽपि स्फोटस्य षोडशभेदा एते भवितुमर्हन्ति। एवं प्रकारेण रामप्रसादत्रिपाठिपादैः द्वात्रिंशद्भेदाः स्फोटस्य प्रतिपादिताः ।[1]

विंशशतके रामप्रसादत्रिपाठिचरणैः पाणिनीयव्याकरणे प्रमाणानां व्यवस्था महाभाष्यादिग्रन्थप्रमाणेन समुपस्थापिता। व्याकरणशास्त्रे सेयं चिन्तनपरम्परा प्राचीनकालादेव दृग्गोचरीभवति। महाभाष्यादौ प्रमाणविषयकाणि यानि बीजानि विकीर्णानि सन्ति तानि

[1] पाणिनीयव्याकरणे प्रमाणसमीक्षा, पृ.२८६

विमृश्य तैर्यो हि सिद्धान्तः समुदभावि स नूनं व्याकरणशास्त्रपरम्पराया विकासेऽभिनवः कश्चन पक्षः। शब्दप्रमाणनिरूपणप्रसङ्गे तैः स्फोटभेदानां या सङ्कल्पना पुरस्कृता सा भाष्यादिग्रन्थानुसारिणी विद्यते न वेति समीक्षकैः विचारणीयम्। रामाज्ञापाण्डेयेन कल्पितभेदानां प्रामाण्यमपि विद्वद्भिरनुसन्धेयम्।

आचार्यरामप्रसादत्रिपाठिना व्याकरणशास्त्रस्य दर्शनपक्षमाश्रित्य कृतं योगदानं विंशशतके शब्दशास्त्रीयचिन्तनपरम्परायाः सातत्यं प्रमाणयति। व्याडिकृतसङ्ग्रहग्रन्थो नाऽद्य समुपलभ्यत इति वैयाकरणानां दार्शनिकसिद्धान्तभूमिः प्रमाणाभावे नितरां शून्यैव समभवत्। “पाणिनीयव्याकरणे प्रमाणसमीक्षा” इति ग्रन्थरचनाव्याजेन त्रिपाठिपादैः शब्दशास्त्रीया सा शून्यता दूरीकृता। तैः टीकाग्रन्थानां प्रणयनेनाऽपि शब्दशास्त्रे सुमहानुपकारो व्यधायीति नास्त्यत्र संशीतिलेश इति दिक्।।

**सन्दर्भग्रन्थाः**

१) श्रीवाणी-अलङ्करणपत्रिका, रामकृष्ण-डालमिया-श्रीवाणीन्यासेन प्रकाशिता, १८९८
२) वैयाकरणभूषणसारः, प्रभादर्पणसहितः, चौखम्बासंस्कृतसीरीजआफिस, वाराणसी, १९६९
३) व्याकरणदर्शनभूमिका, रामाज्ञापाण्डेयः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, १९८३
४) वैयाकरणसिद्धान्तलघुमञ्जूषा, कुञ्जिका-रत्नप्रभासहितः, रामप्रसादत्रिपाठी, सम्पूर्णानन्द-संस्कृतविश्वविद्यालयः, वाराणसी
५) सारस्वतीसुषमा (१२.२) सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी
६) भारतीयदर्शन के पचास वर्ष, अम्बिकादत्त शर्मा, विश्वविद्यालयप्रकाशन, सागर में प्रकाशित मेरा आलेख “स्फोटसिद्धान्त की पुनः रचना”।
७) गाण्डीवम्, (२० जुलाई-१६ अगस्त, १९९८) में प्रकाशित आचार्यत्रिपाठी का जीवन परिचय।

❑❑❑

**महस्विनी – विद्वत्समीक्षिता सन्दर्भिता च शोधपत्रिका (ISSN: 2231-0452)**
**कुसुमम् :** जनवरी – डिसेम्बर २०२१ **सम्पुटम् :** संयुक्तम् (१,२)
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

# ध्वनिसिद्धान्तः तस्य तदनन्तरकाव्यशास्त्रीयग्रन्थेषु प्रभावः

**आचार्यः जि.एस.आर्.कृष्णमूर्तिः***

विदितचरमेव विपश्चितां यत्-

**द्वे वर्त्मनी गिरां देव्याः शास्त्रं च कविकर्म च।**
**प्रज्ञोपज्ञं तयोराद्यं प्रतिभोद्भवमन्तिमम्॥** इति

**साहित्यस्य स्वरूपम्**

तत्र सर्वशास्त्राणां समन्वयात्मकं भवति साहित्यम्। तेनैव तस्य अन्वर्थता। तथा चोक्तम् अभियुक्तैः- **समष्टिस्सर्वशास्त्राणां साहित्यमभिधीयते** इति। कुन्तकेनाप्यभिमतम्। वाक्यवक्रतासन्दर्भे कुन्तकेन कथितम्। तस्य सारः तदीयैरेव वचनैः यथा – “तेन पदवाक्यप्रमाणव्यतिरिक्तं किमपि तत्त्वान्तरं साहित्यमिति विभागोऽपि न स्यात्।[1]”

**अ) व्याकरणस्योपयोगः -**

**एतेषां च पदवाक्यप्रमाणसाहित्यानां चतुर्णामपि प्रतिवाक्यमुपयोगः। तथा च एतत्पदमेवं रूपं गकारौकारविसर्जनीयात्मकैर्गतस्य चार्थस्य प्रातिपदिकार्थपञ्चकलक्षणस्य आख्यातपदार्थषट्कलक्षणस्य वा वाचकमिति पदसंस्कारलक्षणस्य व्यापारः।**

**आ) मीमांसाशास्त्रस्य उपयोगः -**

पदानां च परस्परान्वयलक्षणसम्बन्धनिबन्धनमेतद्वाक्यार्थतात्पर्यमिति वाक्यविचार-लक्षणस्य उपयोगः।

---

* साहित्यसंस्कृतिसङ्कायप्रमुखः, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः।

[1] वक्रोक्तीजीवितम्, उन्मेषः १/१६, पु.५५
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

**इ) न्यायशास्त्रस्य उपयोगः -**

प्रमाणेन प्रत्यक्षादिनैतदुपपन्नमिति युक्तियुक्तत्वं नाम प्रमाणलक्षणस्य प्रयोजनम्।

**निष्कर्षः - इदमेव परिस्पन्दमाहात्म्यात् सहृदयहारितां प्रतिपन्नमिति साहित्यस्य उपयुज्यमानता।**[1]

तथा च पदवाक्यप्रमाणशास्त्रोपजीव्यत्वात् विवक्षितैकार्थबोधवाचकस्य हृदयपरिस्पन्दसुन्दरस्यार्थस्य च परस्परस्पर्धितया समानावस्थित्या सहभाव एव साहित्यम् इति।

**साहित्यशास्त्रस्य विभागः -**

इदं च साहित्यं द्विधा भवति इति सर्वविदितमेव लक्ष्यात्मकं लक्षणात्मकं च। लक्ष्यात्मकं तदेव भवति वाल्मीकिमारभ्य अधुनातनभाविकवीनां च प्रतिभया उद्भूतानि उद्भूयमानानि उद्भावीनि च काव्यनाटकप्रभेदजातानि।

**लक्षणात्मकसाहित्यस्य क्रमिको विकासः -**

कालक्रमानुसारं लक्षणग्रन्थजातमाविरभूत्। समसामयिकमान्यतानुसारमाचार्याः स्वाभिमतं प्राकाशयन्। स्वकीयान् अभिनिवेशानपि प्रादर्शयन्।

तत्रादौ भरताचार्यः रसाभिनिवेशं नाट्यशास्त्रे, भामहाचार्यः अलंकाराभिनिवेशं काव्यालंकारे, आचार्यो दण्डी गुणाभिनिवेशं काव्यादर्शे, वामनाचार्यः रीत्यभिनिवेशं काव्यालंकारसूत्रवृत्तौ, तत्तन्मतपरतया चतस्रः धाराः उद्भावयामासुः गीर्वाणभाषा-साहितीतरङ्गिणीषु।

**साहित्यस्य धाराणां लक्ष्यैकशून्यता - आनन्दवर्धनस्य लक्ष्यं च**

एतासां धाराणां लक्ष्यैकशून्यतया साहितीसुषमाङ्गनावपुषः अभिषेचने दाक्ष्यं नाभूत् परं ताः धाराः मेलयित्वा तदीयमात्मानं विभूषयितुं काऽपि नालमभूत्। एतादृशे संदर्भे सहृदयानामानन्दवर्धनः राजानकानन्दवर्धनः काश्मीरदेशे अष्टमनवनशतकयोर्मध्यभागे भाग्यवशात् प्रादुरास। अयं च सहृदयशिरोमणिः कविः दार्शनिकश्च एवं

---

[1] वक्रोक्तीजीवितम्, पु.३६

कवितालताचिन्तनाभिः संपन्नोऽयं प्राचीनलाक्षणिकग्रन्थानालोड्य शास्त्रचिन्तनं विधाय प्रथमविदुषः वैयाकरणानाश्रित्य स्फोटतत्त्वमुररीकृत्य ध्वनिं प्रस्थाप्य ध्वनिप्रस्थापकाचार्यत्वेन नितरां प्रसिद्धः। प्रसिद्धिरावापि तेन रचितः।

**ध्वन्यालोकस्य स्वरूपम् -**

ध्वन्यालोकः काव्यालोकः सहृदालोकः इति अपि प्रसिध्यति। तस्य ग्रन्थस्य व्याख्याकाराः अभिनवगुप्तादयः तस्य सिद्धान्तमुन्नतशिखराणि अधिरोहयामासुः। तदनु तदनुयायिनः मम्मटविद्यानाथविश्वनाथजगन्नाथप्रभृतयः तत्सिद्धान्तं सर्वजनगोचरीक्रियमाणं व्यदधुः।

तस्य सिद्धान्तस्य सारोऽयं यः शब्दः अर्थं बोधयति तस्य शब्दस्य नाणकस्येव पश्चात् पूर्वञ्च द्वौ भागौ तावेव अर्थौ वाच्यव्यङ्ग्यौ। वाच्यव्यङ्ग्ययोः यत्र व्यङ्ग्यस्य प्राधान्यं स काव्यविशेषः ध्वनिः इति परमः सिद्धान्तः।

**ध्वन्यालोकस्य विभागः -**

तं सिद्धान्तमादृत्य ध्वन्यालोके चतुर्षु उद्द्योतेषु ध्वनिशब्दवाच्यान् पर्यायतया क्रमशः उपपादयामास। तथाहि-

**ध्वनिः व्यञ्जना ध्वन्यते अनया इति व्युत्पत्त्या, तस्याः स्थापनं प्रथमोद्योते।**

**ध्वनिः व्यङ्ग्यः ध्वन्यते अयमिति व्युत्पत्त्या, तस्य व्यङ्ग्यस्य निरूपणं द्वितीयोद्योते।**

**ध्वनिः व्यञ्जकः ध्वन्यते अनेन, व्युत्पत्त्या, तस्य प्रतिपादनं तृतीये उद्योते ।**

**ध्वनिः काव्यं ध्वन्यते अस्मिन् इति व्युत्पत्त्या, तस्य उपपादनं चतुर्थे उद्योते।**

एवं क्रमेण निरूप्य कविसहृदययोः अमन्दानन्दसन्दोहं सन्ददौ।

**सर्वासामपि धाराणां समन्वयः -**

मध्ये गुणीभूतचित्रकाव्यानामपि निरूपणं कृत्वा ततः वामनेन प्रवृत्तया काव्यात्मान्वेषणधिषया - **अशक्नुवद्भिर्व्याकर्तुं रीतयः सम्प्रवर्तिताः** इति मनसि निधाय **काव्यस्य**

**आत्मा ध्वनिः** इति प्रतिज्ञाय तल्लक्षणमुपपाद्य तदुदाहरणमुखेन ध्वनिं प्रदर्श्य तद्भेदान् सम्यग्विभज्य तं ग्रन्थमुपसमाहार्षीत्।

अनेन स्फोटतत्त्वस्य ध्वनिसिद्धान्तस्य कश्चनान्यूनानतिरिक्तः सम्बन्धः समुपस्थापितः। प्राचीननानाधाराणां ध्वनिसुधासागरे आप्लावनमकारि। रसं भरतस्य रससिद्धान्तं च प्रधानतया स्वीकृत्य तमेव काव्यात्मसिंहासने सम्यगभिषिच्य भामहस्य अलंकारसिद्धान्तं ध्वन्यङ्गतया विभूष्य दण्डिनः स्वभावोक्तिं वस्तुतया, गुणांश्च व्यङ्ग्यत्वेन रसाङ्गत्वेन च अलंकृत्य, वामनस्य रीतिवादं व्यजकसंघटनात्मकत्वेन संस्थाप्य, प्राचीनधाराणां सम्प्रदायानां समन्वयमकरोत्। तत्र न क्वापि विमतिः, न वा विरोधः, न क्वचित् युक्तिशून्यता। एवं सर्वसम्मतध्वनिसिद्धान्तः साहितीवधूटीकिरीटविराजितः चाकाशे विराजतेऽद्यापि।

**ध्वनिसिद्धान्तस्य मान्यता अमान्यता च -**

एवम् -

**युक्तोऽयमात्मसदृशान् प्रति मे प्रयत्नः।**
**नास्त्येव तज्जगति सर्वमनोहरं यत्॥**
**केचिज्ज्वलन्ति विकसन्त्यपरे निमील-**
**न्त्यन्ये यदभ्युदयभाजि जगत्प्रदीपे**॥[1]

इति व्यक्तिविवेककारस्य महिमभट्टस्य वचनानुसारं ध्वनिसिद्धान्तविषये केषाञ्चन विप्रतिपत्तयः कतिपयेषां सुप्रतिपत्तयः, इतरेषां मौनाविष्कृतयश्च आविरभूवन्। सर्वथा ध्वनिसिद्धान्तः क्वचिन्मन्यते, क्वचित् खण्ड्यते च।

**ध्वनिसिद्धान्तस्य मान्यता -**

सर्वप्रथमं ध्वनिमण्डकेषु आद्यो भवति अभिनवगुप्ताचार्यः। स च आलोकदर्शनार्थं लोचनस्य आवश्यकतां परिलक्ष्य ध्वन्यालोकलोचनं ग्रन्थं जग्रन्थ। तदीयानि मतानि विभागशः

---

[1] व्यक्तिविवेकः, पु. २

विस्तार्य सर्वाण्यपि समर्थ्य लोचनग्रन्थः साहितीलोकोपकारकः समजायत। येन यदि नाभविष्यत् ध्वन्यालोकस्य प्रकाशः चिरन्तनानां कीर्तिः नालक्ष्यत इति निर्विवादोऽयमंशः।

**लोचनस्य व्यापकता -**

लोचने व्यञ्जनाप्रतिष्ठायां भक्तिवादनिरासपूर्वकं तात्पर्यशक्तिमपि निरोधिकामाशङ्क्य मीमांसकानामभिहितान्वयवादान्विताभिधानवादौ प्रस्तुत्य स्फोटतत्त्वं सम्यग्विविच्य आनन्दवर्धनम् अभिनवगुप्तः समर्थयामास।

**काव्यस्यात्मा स एवार्थः** इति प्रतीकामादाय तद्विवरणसन्दर्भ उत्पत्त्यनुमितिभुक्त्यभिव्यक्तिवादान् प्रस्तुत्य सम्यक् प्रतिपाद्य ध्वनिभेदनिरूपणे शब्दशक्तिमूलध्वनिमपि विशदीकृत्य शान्तरसं प्रतिष्ठाप्य आनन्दवर्धनं संवर्धयामास। ततः पूर्वं अज्ञातेन आचार्येण लिखितां चन्द्रिकामपि प्रद्योत्य हृदयदर्पणमपि खण्डयित्वा ध्वन्यालोकमप्रतिहतगतिं प्रचारयामास।

**काव्यप्रकाशस्य लोचनानुगतिः -**

ततः पश्चात् समागतो मम्मटाचार्यः। अयं वस्तुतः अभिनवगुप्ताचार्यस्य प्रतिभास्रोतसः एव समुत्पन्नः ध्वनिसिद्धान्तमुक्ताफलायमानः वाग्देवतावतारः। अयं सर्वत्र ध्वनिमतमेव उपपादयन् ध्वनिकारस्य आशयमभिनवदर्शितपथेन आलोकयामास। प्राचीनसम्प्रदायान् एकीकृत्य काव्यपुरुषस्य अङ्गानि अलङ्कारांश्च परिकल्प्य विभूष्य च दशभिरुल्लासैः निर्मिते काव्यप्रकाशे ध्वन्यालोकसिद्धान्तान् प्रकाशयामास।

**आचार्यत्रयसंपन्नम् साहित्यशास्त्रम्-**

वस्तुतः ध्वनिप्रस्थानस्य प्रथमाचार्यः सूत्रकारः, अभिनवगुप्ताचार्यः वार्तिककारः यदि भवति मम्मटाचार्यः भाष्यकारः एव भवति। यथा त्रिमुनिव्याकरणं भवति तथा साहित्यशास्त्रमपि आचार्यत्रयसम्पन्नं जोघुष्यते।

**साहित्यशास्त्रे प्रकरणग्रन्थानामाविर्भावः -**

काव्यप्रकाशोद्भवात् पूर्वं रसगुणालंकाररीतिसम्प्रदायानां ग्रन्थाः केवलं सिद्धान्तग्रन्था एव। ततः पश्चात् ध्वन्यालोकः सिद्धान्तग्रन्थः सन् समन्वयात्मको भवति। लोचनग्रन्थः व्याख्यात्मकोऽपि वादग्रन्थः। मम्मटाचार्यस्य काव्यप्रकाशात् साहित्यशास्त्रे प्रकरणग्रन्थानामुद्भवः अजायत।

**विद्यानाथस्य प्रतापरुद्रयशोभूषणं प्रकरणग्रन्थः तत्र ध्वनिप्रभावः -**

तस्यां शृङ्खलायां नैके ग्रन्थाः आविरजायन्त। तेषु विद्यानाथस्य प्रतापरुद्रयशोभूषणम्, मम्मटस्य काव्यप्रकाशानन्तरमुल्लेखनीयम्। प्रतापरुद्रयशोभूषणे मम्मटस्य शैलीमवलम्ब्य अष्टसु प्रकरणेषु नायकनाटकप्रकरणे संयोज्य दृश्यश्रव्ययोः प्रतिपादनम् एकत्र समावेश्य **जीवितं व्यङ्ग्यवैभवमिति** काव्यघटकतत्त्वमुपदिश्य ध्वनिकारमनुसरति। मम्मटदर्शित-मार्गानुसारं विद्यानाथः एकपञ्चाशत् ध्वनिभेदान् उल्लिख्य क्रमशः नूतनान्युदाहरणानि स्वीयान्येव प्रादात्। इति काव्यप्रकाशात् अस्य ग्रन्थस्य वैशिष्ट्यम्।

**रसप्रधानाः शब्दार्थाः गुणालङ्कारवृत्तयः।**
**रीतयश्चेयती शास्त्रप्रमेयं काव्यपद्धतिः ॥**[1]

इति कारिकायां विद्यानाथः ध्वनिकारमक्षरशः अनुगच्छति।

**साहित्यशास्त्रे नाथत्रयम् -**

विद्यानाथं पुरस्कृत्यैव अलङ्कारशास्त्रे नाथत्रयं प्रसिद्धम्। ते च नाथाः भवन्ति विद्यानाथविश्वनाथजगन्नाथाः।

**विश्वनाथस्य साहित्यदर्पणे ध्वनिसिद्धान्तस्य प्रभावः -**

विद्यानाथानन्तरमपरः नाथः भवति विश्वनाथः। अयमपि विद्यानाथ इव कविर्भवति। अष्टभाषाङ्गनाभुजङ्गमः कविराजः इति च प्रसिद्धः। अनेन रचितः साहित्यदर्पणः मम्मटस्य

[1] प्रतापरुद्रीयम्, १/४

काव्यप्रकाशं खण्डयितुं यद्यपि प्रवृत्तः तेनैव कारणेन काव्यस्यात्मा ध्वनिः इति योऽर्थः सहृदयश्लाघ्यः इति पङ्क्त्योः विरोधं प्रदर्श्य स्वस्य काव्यलक्षणस्य रसात्मकत्वं साधयितुं प्रावर्तत। तथापि **काव्यस्यात्मा स एवार्थः** इति कारिकया एव इदमुपजीव्यं भवति।

**साहित्यदर्पणस्य विभागौचित्यम् -**

साहित्यदर्पणं पुनः विभज्य दशसु परिच्छेदेषु काव्यप्रकाशशैलीमाधृत्य एव शब्दालङ्कारनिरूपणमेकस्मिन्नेव परिच्छेदे संयोज्य नाटकलक्षणस्यापरं परिच्छेदं निर्माय ध्वनिकारमनुकरोति।

**अप्पय्यदीक्षितस्य ध्वनिसिद्धान्तानुसरणम् -**

अप्पय्यदीक्षितोऽपि चित्रमीमांसाग्रन्थे उत्तममध्यमाधमकाव्यनिरूपणावसरे आनन्दवर्धनं सर्वथा गौरवेण मनुते। यद्यप्ययमलङ्कारसम्प्रदायानुयायी तथापि वृत्तिवार्तिके व्यञ्जनास्थापनावसरे आनन्दवर्धनं न परिजहाति।

**जगन्नाथस्य ध्वन्यनुसरणम् -**

तदनु जगन्नाथः सर्वथा ध्वनिकारमेव समर्थयति। यद्यपि काव्यलक्षणं शब्दमुख्यविशेष्यपरतया व्याख्यातम्, तथापि ध्वनिनिरूपणावसरे रसवादनिरूपणे ध्वनिभेदनिरूपणे शब्दशक्तिमूलध्वनिभेदनिरूपणे बहुधा ध्वनिकारं प्रशंसति। एवं ध्वनिपरवर्तिनानाचार्याणां ग्रन्थान् ध्वनिसिद्धान्तः सर्वथा प्रभावयति इति निश्चप्रचमिति वक्तुं शक्यते।

**अनन्तरलक्षणग्रन्थेषु ध्वनिप्रभावः प्रमाणानि च -**

पूर्वोक्तस्य ध्वनिसिद्धान्तस्य अनन्तरवर्तिषु ग्रन्थेषु कथं प्रभाव इति स्थालीपुलाकन्यायेन केचन अंशाः प्रस्तूयन्ते -

**ध्वनिनातिगभीरेण काव्यतत्त्वनिवेशिना।**
**आनन्दवर्धनः कस्य नासीदानन्दवर्धनः॥**

इति राजशेखरेण संरचितः इति जल्हणः सूक्तिमुक्तावल्ल्यामुल्लिखति। तेन आनन्दवर्धनः सार्थकनामधेयः इति स्पष्टमवगम्यते। जगन्नाथोऽपि- **ध्वनिकृतामालङ्कारिकसरणि-व्यवस्थापकत्वात्**[1] इति वचनेन आलङ्कारिकग्रन्थेषु आनन्दवर्धनः बहुधा आद्रियते इत्यवगम्यते।

**ध्वनिविरोधिष्वपि ध्वनिमान्यता -**

ध्वनिविरोधिषु मूर्धन्यः महिमभट्टोऽपि ध्वनिसिद्धान्तं प्रशंसन् एवं लिखति -

**ध्वनिवर्त्मन्यतिगहने स्खलितं वाण्याः पदे पदे सुलभम्।**
**रभसेन यत्प्रवृत्ता प्रकाशकं चन्द्रिकाद्यदृष्टैव।**
**सहसा यशोऽभिसर्तुं समुद्यतादर्पणा मम धीः।**
**स्वलंकारविकल्पप्रकल्पने वेत्ति कथमिवावद्यम्।**[2]

इत्यादिना ध्वनिविरोधं कर्तुं किञ्चित् सङ्कोचं दर्शयति।

**ध्वनिविरोधिनामपि मूलं ध्वन्यालोक एव -**

ध्वनेः प्रभावातिशयवर्णनेन तस्मादेव ग्रन्थात् ध्वनिखण्डनात्मका अनेके ग्रन्थाः अपि विरचिताः। तत्र खण्डनात्मको ग्रन्थः वक्रोक्तिजीवितम्। तस्य मूलं स्रोतः ध्वन्यालोक एव। तत्र निर्दिष्टं वचनमत्र प्रमाणम् -

**सैषा सर्वत्र वक्रोक्तिः अनयाऽर्थो विभाव्यते।**
**यत्नोऽस्यां कविना कार्यः कोऽलङ्कारोऽनया विना॥**[3]

इति उट्टङ्कनेन वक्रोक्तिजीवितग्रन्थस्य ध्वनेः अङ्गत्वं जातमिति कथने नास्ति संशीतिलेशः।

**अनौचित्यादृते नान्यत् रसभङ्गस्य कारणम्।**
**प्रसिद्धौचित्यबन्धस्तु रसस्योपनिषत्परा।**

---

[1] ध्वन्यालोकः, प्रस्तावनाभागः, पु.१

[2] व्यक्तिविवेकः, पु.६

[3] ध्वन्यालोकः, पु.२०

**रसाद्यनुगुणत्वेन व्यवहारोऽर्थशब्दयोः।**
**औचित्यवान् यस्ता एता वृत्तयो द्विविधाः स्थिताः॥**[1]

इति कारिका अपि औचित्यसम्प्रदायस्य प्रवर्तक आसीदित्यपि अनुसन्धेयम्।

**ध्वन्यालोके ध्वनिविरोधिनां प्रस्तावः -**

ध्वन्यालोके एव पूर्वपक्षत्वेन अनेके अर्थाः प्रास्ताविषत। तेषु प्रथमकारिकायामेव पूर्वपक्षत्वेन प्रधानतया **अभाववादः, भाक्तवादः, अनिर्वचनीयवादः** च दर्शिताः।

द्वितीयोद्योते रसवदलङ्कारः अपि विरोधितया निर्दिष्टः। एवमेव श्लेषोऽपि प्रतिस्पर्धितया दर्शितः।

**ध्वनिविरोधिनां स्वतन्त्रग्रन्थाः -**

तृतीयोद्योते **अनुमानम्, मीमांसकमतमपि इति** विरोधिनः संदर्शिताः। एवम् एव निर्दिष्टाः पूर्वपक्षाः स्वतन्त्रग्रन्थरूपं संधार्य ध्वनिविरोधिप्रस्थानस्य भूमिकायमानाः आसन्। एतस्य पर्यालोचनेन ध्वनिसिद्धान्तः एव मण्डकग्रन्थानां खण्डनात्मकग्रन्थानामपि आकरः अजायत।

ध्वनिकारसमकालमेव मनोरथ इति कविः अभाववादिनां समर्थनाय- **यस्मिन्नस्ति न वस्तु किञ्चन मनः प्रह्लादि सालंकृति**[2] इति विरच्य प्रसिद्धिं गतः।

तस्मिन्नेव समये अभिनवगुप्तात् पूर्वं चन्द्रिकाव्याख्यापि प्रादुर्बभूव। पश्चात् भट्टनायकेन ध्वनिसिद्धान्तं खण्डयितुं 'हृदयदर्पण' इति ग्रन्थः व्यरचि इति उल्लिख्यते। परं नैतावता चन्द्रिका वा हृदयदर्पणो वा अध्यगम्यताम्।

---

[1] ध्वन्यालोकः, उद्योतः ३

[2] ध्वन्यालोकः, पु.२८

तदनु कुन्तकस्य 'वक्रोक्तिजीवितम्' क्षेमेन्द्रस्य 'औचित्यविचारचर्चा'पि खण्डनमण्डनात्मकग्रन्थौ, याभ्यां वक्रोक्तिसम्प्रदायः औचित्यसम्प्रदायश्च आविरभूताम्। एवं परवर्तिसम्प्रदायानामपि ध्वनिसिद्धान्तः सुमार्गः समजनि।

**मुकुलभट्टस्य अभिधावृत्तिमातृका महिमभट्टस्य व्यक्तिविवेकश्च -**

मुकुलभटटस्य 'अभिधावृत्तिमातृका' केवलं व्यञ्जनाखण्डनार्थमेव निर्मिता। ततः पश्चात् महिमभट्टस्य 'व्यक्तिविवेकः' ध्वनिखण्डने समर्थः मूर्धन्यश्च।

**ध्वनिविरोधिन्यः द्वादशविप्रतिपत्तयः -**

एवं विचार्यमाणे ध्वनिसिद्धान्तस्योपरि द्वादश विप्रतिपत्तयः समजायन्त। काश्चन आनन्दवर्धनेन उद्भाविताः, काश्चन तदभाववादिभिः उद्भाविताः। तदाधारेणैव कतिपया ये अनन्तरं जयदेवप्रभृतयः अलंकारानुयायिनः पुनरुदजीवन्। तत एव अप्पय्यदीक्षितविरचित-चन्द्रालोकव्याख्याग्रन्थः, कुवलयानन्दः, चित्रमीमांसा, अलंकारमणिहारः, अलंकारसर्वस्वम्, अलङ्कारशेखरः इत्यादयः पुनः प्रसिद्धिं गताः।

ध्वनिविरोधिप्रस्थाने अलङ्कारसर्वस्वटीकाकारेण जयद्रथेन अज्ञातकर्तृके द्वे कारिके उदलिख्यताम्। अत्र द्वादश विप्रतिपत्तयः निरूपिताः यथा -

**तात्पर्यशक्तिरभिधा लक्षाणानुमिती द्विधा।**
**अर्थापत्तिः क्वचित्तन्त्रं समासोक्त्याद्यलङ्कृतिः॥**
**रसस्य कार्यता भोगो व्यापारान्तरबाधनम्।**
**द्वादशेत्थं ध्वनेरस्य स्थिता विप्रतिपत्तयः॥**[1]

अनयोः द्वयोः कारिकयोः द्वादश विप्रतिपत्तयः सङ्गृहीताः। एतासां द्वादशानां विप्रतिपत्तीनां विशदीकरणे यद्यपि क्लेशः भवति तथापि केचन विबुधाः एवं ताः प्राचीकशन्।

[1] अलङ्कारसर्वस्वम्, पु.२५

**१) तात्पर्यशक्तिः -**

मीमांसकमानिता। अत्र स्वतन्त्रग्रन्थो न लभ्यते। परं ध्वन्यालोकलोचने अस्याः खण्डनं विस्तरशः कृतम्।

**२) अभिधा -**

इयं शक्तिः अतिप्राचीनमीमांसकैर्मानिता। तदनुसारं मुकुलभट्टेन अभिधावृत्तिमातृका कुन्तकेन वक्रोक्तिजीवितं च व्यरचिषाताम्। मुकुलभट्टस्य मते इयमभिधा विशिष्टा सती व्यञ्जनां पूरयति। कुन्तकमते तु अभिधा विचित्रा भवति।

**३) प्रथमा लक्षणा -**

जहत्स्वार्था लक्षणा। गुणवृत्तिरारनन्दवर्धन एव भाक्तवादमतप्रस्तावे इमां सूचयति।

**४) द्वितीया लक्षणा -**

अजहत्स्वार्था लक्षणा, इयं व्यञ्जनास्थानमापन्ना।

**५) प्रथमा अनुमितिः -**

रसवादेषु श्रीशङ्कुकेन प्रतिपादिता।

**६) द्वितीया अनुमितिः -**

महिमभट्टेन प्रतिपादिता काव्यानुमितिः व्यक्तिविवेकः। अस्मिन् ग्रन्थे पूर्वपक्षतया ध्वनिसिद्धान्त एव दर्शितः।

**७) अर्थापत्तिः -**

मीमांसकानां प्रमाणमनुमानस्यैव परिष्कृतरूपम्। अत्र ग्रन्थः नोपलभ्यते।

**८) तन्त्रम् -**

इदं च श्लेषालङ्कार एव। अत्र भट्टोद्भटः प्रमाणम्, परमनन्तरवर्तिभिः न कोऽपि ग्रन्थः रचितः अस्मिन् विषये।

**९) समासोक्त्याद्यलङ्कृतिः -**

इयमलङ्कारवादात्मिका।

**१०) रसस्य कार्यता -**

प्राचीनालङ्कारिकाणां मान्यता।

**११) भोगः -**

भट्टनायकस्य मतम्।

**१२) व्यापारान्तरबाधनम् -**

वक्रोक्तिः अथवा अनिर्वचनीयतावादः।

एवं ध्वनिसिद्धान्तस्य खण्डनमण्डनग्रन्थेषु वादेषु च प्रभावः दरीदृश्यते।

## ग्रन्थसूची

१) अलङ्कारसर्वस्वम् - रेवाप्रसादद्विवेदी, चौखाम्बासंस्कृतसंस्थानम्, 2016

२) ध्वन्यालोकः - डा.गङ्गासागरराय:, चौखाम्बासंस्कृतसंस्थानम्, वाराणसी, 2004

३) प्रतापरुद्रीयम् - आचार्यमधुसूदनशास्त्री, चौखाम्बाकृष्णदास-अकादेमी, वाराणसी, 2003

४) वक्रोक्तिजीवितम् - श्रीराधेश्याममिश्रः, चौखाम्बासंस्कृतसंस्थानम्, वाराणसी, 2016

५) व्यक्तिविवेकः - रेवाप्रसादद्विवेदी, चौखाम्बासंस्कृतसंस्थानम्, वाराणसी, 2006

❑❑❑

महस्विनी – विद्वत्समीक्षिता सन्दर्भिता च शोधपत्रिका (ISSN: 2231-0452)
कुसुमम् : जनवरी – डिसेम्बर २०२१ सम्पुटम् : संयुक्तम् (१,२)

~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

# Pandit Madhusudan Ojha's Contribution to Veda Vijnana

**Dr. Saroj Kaushal***

The Vedas are considered to be an eternal and perennial source of Indian wisdom. They have been interpreted by different sages and scholars over the centuries. They not only contain the कर्मकाण्ड or the procedure of sacrificial performances but also the quest for truth or ज्ञानकाण्ड. Most of the thoughts and precepts enshrined in the Vedas are so elegant, magnanimous and universal in character that they hold profound relevance even in the modern times. The most striking character of the Vedic thinking is that it is holistic in approach and has a wider canvas of vision.

In the last century Swami Dayanand, a vedic scholar, was in favour of scientific interpretation of the Vedic suktas and expounding their relevance afresh. Maharshi Arvind read newer spiritual messages with Vedas. A versatile and profound Sanskrit scholar of Rajasthan, Pt. Madhusudan Ojha, found that the Vedas contain a systematic and coherent exposition of what the ancient sages thought about the origin of the universe, the evolution of the heavenly bodies, the nature and role of different species that obtain in the creation and so on, though in a language which needed decoding.

Pt. Madhusudan Ojha was perpetuated by such worthy scholars as Pt. Giridhar Sharma Chaturvedi, Pt. Motilal Shastri, Dr. Vasudev Sharma Agrawal, Swami Surjan Das, Dr. R.K. Mishra, Karpur Chandra Kulish

---

* Professor, Department of Sanskrit and, Director, Pt. Madhusudan Ojha Research Cell, Jai Narain Vyas University, Jodhpur, Rajasthan
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

etc. who carried the message through different languages like Hindi, Sanskrit & English.

Pt. Ojha was a scholar who practically spent his entire life in Vedic research and not only came out with his encyclopediac knowledge of the entire ancient Sanskrit literature, but also gave us real insight into Vedic wisdom. His writings covering a wide range of subjects, can be broadly classified under four heads: 1 ब्रह्मविज्ञान 2. यज्ञविज्ञान 3. इतिहास 4. समीक्षाग्रन्थ.

**यज्ञश्च विज्ञानमथेतिहासः स्तोत्रः तदित्थं विषया विभक्ताः।**
**वेदे चतुर्धा त इमे चतुर्भिग्रन्थैः पृथक्कृत्य निरूपणीयाः।।**

Although the contribution of Pt. Ojha to the interpretation of Vedic wisdom is not easy, but with few points and their examples, it is attempted to analyse his original contribution.

Pt. Ojha was the first to analyse the word Veda in detail. Generally it is understood that Veda refers to book of knowledge and it is divided in three parts (वेदत्रयी – ऋग्वेद, यजुर्वेद और सामवेद). Actually we do not understand why they should be called infinite (अनन्ता वै वेदाः). Why they are called अपौरुषेय (not the product of human mind).

There are many statements in the literature which explains that the word Veda is intimately connected with the creative processes in Nature. A few examples can be given to prove this statement.

**ऋग्भ्यो जातां सर्वशो मूर्तिमाहुस्सर्वा गतिर्याजुषी हैव सृष्टम्।**
**सर्वं तेजः सामरूप्यं हि शश्वत् सर्वं हेदं ब्रह्मणा हैव सृष्टम्।।**[1]
**अथ स सर्वाणि भूतानि पर्यैक्षत् त्रय्यामेव विद्यायां सर्वाणि भूतान्यपश्यत्।**[2]
**सा वा एषा वाक् त्रेधा विहता–ऋचो यजूंषि सामानि तेनाग्निस्त्रेधा विहितः।**[3]

---

[1] तैत्तिरीयब्राह्मण, 3.12.9
[2] शतपथब्राह्मण, 10.4.2.21
[3] शतपथब्राह्मण, 10.5.1.2

We can understand that the word Veda and its division have a much deeper meaning than what is normally understood by us. Ojha ji explained technical terminology of Vedas in his works with reference to the context.

The meaning of the Veda is connected to the creative processes in Nature. Since the creative processes in Nature are infinite the Vedas are also infinite. Since they are not the product of human mind so they are called अपौरुषेय.

The words ऋक्, यजुस् and साम have distinct meanings in the creative process. The ऋक् gives rise to physical form of the object. All the movement is attributed to यजुस्. साम is form of light which forms the halo or the aura of an object.[1] In other words the Veda principal involving ऋक्, यजुस् and साम enters into every object of creation.

The Sun who may be conceived as the embodiment of Prajapati the creator, is also a typical example of the embodiment of all the three Vedas and it is well said: 'एषा त्रयी विद्या तपति' The disc of the Sun represents the ऋक्, the halo around the Sun represents the साम and the purusa inside represents the यजुस्.

Pt. Ojha's contribution to our understanding of Vedic cosmogony (ब्रह्मविज्ञान) is unparalleled in the research contributions to this subject. His works ब्रह्मसमन्वय, ब्रह्मविनय, ब्रह्मचतुष्पदी and ब्रह्मसिद्धान्त form a group in which the concept of Brahman has been analysed from various angles based on the statements of the Vedas, Brahmanas, Upnisadas and Gita.

In Vedic literature we find many philosophical terms which represents Atma or Brahman. They are निर्विशेष, परात्पर, अव्यय, अक्षर, क्षर, विश्वात्मा, जीवात्मा, विश्वातीत, गूढोत्मा, निर्गुणः, निष्कलः, निर्विकारः, षोडशीपुरुषः, प्रजापतिः, चिदात्मा, क्षेत्रज्ञः, ईश्वरः परमेश्वरः, पुरुषोत्तमः and so on. Nobody

[1] अर्चिः सामानि – जैमिनीयब्राह्मण, 10.5.1.5

before Pt. Ojha, ever tried to analyse the real meanings of these terms and reconcile the various contradictory passages. He took great pains to examine all the passages carefully and gave us a clear picture of the meanings of these terms and their role in the creative process.

Ojha analysed ब्रह्म as चतुष्पात् and defined the padas as निर्विशेष, परात्पर, पुरुष and पुर, while निर्विशेष is Brahman in the pure Rasa state and described in the Vedas and Upnisadas as निर्धर्मक, अनिर्वचनीय, अचिन्त्य, अपरिमेय etc. परात्पर is the state where both Rasa and Bala are present in an unlimited background and renders him all powerful (सर्वशक्तिमान्) and all knowing (सर्वज्ञः). Both Rasa and Bala are one and are not distinguishable from each other in this stage. Purusa is the stage where Bala builds itself in the background of Rasa and gives rise to regions of active प्राण. This Purusa is of three kinds i.e. Avara, Paravar and Para. These are also called क्षर, अक्षर and अव्यय.

Avyaya is ज्ञानस्वरूप, Akshara is कर्मस्वरूप and Ksara is अर्थस्वरूप. In other words there are only three entities in the cosmos viz. ज्ञान, क्रिया and अर्थ and these three have their origin in Avayaya, Akshara, and Ksara respectively. When manas appears in the ocean of rasa and bala, as a result of build up of bala, the Avyaya stage is reached.

अक्षर Purusa resides in the प्राण part of Avyaya Purusa. He is responsible for activity (क्रिया) and has three components. ब्रह्मा, विष्णु and इन्द्र which are otherwise named प्रतिष्ठाशक्ति, आकर्षणशक्ति and विक्षेपणशक्ति. The first is responsible for the maintenance of form of the object, the third one throws out matter from the object and the second one fills up the void by bringing matter from outside. In addition to the above, Agni and Soma are also the kalas of अक्षर पुरुष. Thus अक्षर Purusa also has five kalas.

क्षर Purusa resides in the Vak part of Avyaya and is responsible for the material part of the cosmos. In the creative process Avyaya

Purusa provides the basic support. Aksara Purusa Constitutes instrumental cause (निमित्तकारण) and क्षर Purusa constitutes material cause (उपादानकारण). क्षर Purusa also has five kalas.

The Purusa with his fifteen kalas has the support of परात्पर is called षोडशीप्रजापति. Pt. Ojha explained this concept in great detail about the creative process not found in any other works.

Pt. Ojha opined that one of the primary businesses of Darsana is to trace the origin of universe. Origin of the universe is a riddle which has not been satisfactorily solved either by the scientists or by the philosophers. According to Pt. M.S. Ojha there were ten schools of thought in the pre-vedic period. It is analysis of the ten schools of thought regarding the origin of the cosmos gives him the highest place among the scholars of all times. His is works on these ten schools contain the essence of the Vedic Metaphysics.

While writing the commentary on upanisdas, Pt. Ojha named it उपनिषद्विज्ञानभाष्य and on geeta he wrote गीताविज्ञानभाष्य. One can ask what is the significance of the word Vijnana (विज्ञान) here.

**The meanings of Vijnana :** Pt. Ojha and his disciples used the word Vijnana very frequently. It gives the impression that they were dealing with physical sciences. In fact, they were not. They were using the term vijnana in the sense in which it has been used in the Vedic Literature. Taittirya Aranyaka says that vijnana is that which deals with the interpretation of yajna and actions.[1]

Lord Krishna says in the Gita that he will instruct Arjuna in jnana with Vijnana. Here jnana is the knowledge of brahman, who is singular cause of the universe and vijnana is the knowledge of yajna, which is the process of how the creation proceeds from Brahman.

Thus Jnana and Vijnana represent cause and effect relationship. Cause is one, effects are many. Brahman is the cause, universe is the

1 विज्ञानं यज्ञं तनुते कर्मापि च – Taittiryarnayal – 8.5

effect. That the cause is one which gives birth to the multiple universe, is stated in Rigveda.[1]

Ojha's contributions to the interpretation of Vedic Terminology enable us to understand the correct meanings of many words occurring in Vedas, Brahman and Upanisads. Terms like ऋत्, सत्य रस, बल, माया, वयोनाध, ऋषि, आभु, इन्द्र स्वाहा, सावित्री, गायत्री, ज्ञान, विज्ञान etc. receive masterly analysis at his hands.

Pt. Ojha has shown that while the Vaisheshik (वैशेषिक) Darshan stops with क्षर आत्मा, and Samkhyas stop with अक्षरात्मा, the Vedanta and Geeta reach upto अव्ययात्मा.

There are many other works of Pt. Ojha which are equally important. We can mention इन्द्रविजय, जगद्गुरुवैभवम्, महर्षिकुलवैभवम्, कादम्बिनी, अत्रिख्याति and पथ्यास्वस्ति.

Pt. Ojha explained Geeta by commentary named Gita Vigyan Bhashya. According to him Geeta is an attempt to apply the theoretical part of the Vedic philosophy in day to day life. Geeta itself says that Jnana and Vijnana both are to be followed, Jnana is necessary for knowing the self and Vijnana is necessary for knowing the world. The knowledge of Self leads to liberation from bondage and the knowledge of the world leads to prosperity.

Ojha's language is simply marvelous. He explained his style himself:

**यत्र प्रदर्श्याः विषयाः पुरातनाः**
**यत्र प्रकारोऽभिनवप्रकाशने।।**

Although his commentary is on ancient & oriental topics but his style and expression is novel and noteworthy.

❑❑❑

1 एकं वा इदं विबभूव सर्वम् – Rigveda, 8.58.2

महस्विनी – विद्वत्समीक्षिता सन्दर्भिता च शोधपत्रिका (ISSN: 2231-0452)
**कुसुमम् :** जनवरी – डिसेम्बर २०२१ **सम्पुटम् :** संयुक्तम् (१,२)

# Revisiting Raja Rao's Kanthapura

**Prof. R. Deepta***

With India celebrating 75 years of Independence, it is pertinent that we revisit Raja Rao's **Kanthapura** a classic Indian novel in English which presents in fictional terms Indian struggle for independence especially during the late 1920s and early 30s under the leadership of Mahatma Gandhi. Raja Rao, as it is well-known is one of the Big Three, Mulk Raj Anand and R. K. Narayan being the other two, who are credited with shaping Indian Novel in English. First one among his celebrated novels, **Kanthapura** is the least metaphysical while his other novels like **The Serpent and the Rope**, **The Cat and Shakespeare**, **On the Ganga Ghat** etc. are very explicitly metaphysical rooted in the Vedantic Tradition of Ancient India. One very pertinent point about the novel is that it was written and published in 1938 when India was still struggling to gain independence and thus it presents Raja Rao's take on the Independence Movement and Mahatma Gandhi's contribution to it. It is to be noted in the beginning itself that the revisiting of the novel **Kanthapura** has to be done in two ways keeping in view anticolonial strategy that the novelist adopts as part of his narrativizing the freedom struggle as well as the anticolonial movement it narrativizes. Further, revisiting the acclaimed classic would be a way of paying tributes to countless nameless Indians who sacrificed their everything in the fight against the colonial rule of the British.

* Professor & Head, Department of English, National Sanskrit University, Tirupati.

Indian independence movement is a series of incidents aimed at ending the British rule in India since the First War of Independence in 1857. This movement involved people belonging to different background and different orientation – Tantia Tope, Lakshmi Bai of Jhansi, Nana Saheb belonging to the royalty; poets like Bankim Chandra, Tagore and Aurobindo; Revolutionaries like Lal- Bal – Pal, Bhagat Singh, Chandrasekhar Azad, Subhash Chandra Bose; Gokhale and other leaders of Congress etc. But it is with the arrival of Mohandas Karamchand Gandhi, the nationalist movement saw paradigm shift. It became a mass movement involving villagers. It saw some unique ways of protest which were beyond anybody's imagination like satyagraha, non-violence. The movement was socio-economic and religious along with being political. It was rooted in Indian culture which was preserved in the villages of the time represented.

**Kanthapura** fictionalizes this paradigm shift in Indian freedom struggle as reflected in an imaginary village in the western ghats called Kanthapura. Thus, the freedom movement is located not in any urban centre but in a very far-flung and ordinary village. Kanthapura the village is typical of thousands of such obscure villages in India of the day in its composition of population, social structure, caste hierarchy, beliefs, superstitions and attitudes which nevertheless felt the impact of Mahatma Gandhi and his ideals and actively responded to his call to fight non-violently against the colonial power.

To recount in the briefest outline, the novel tells how Moorthy an educated and enlightened Brahminical youth of Kanthapura deeply influenced by the Mahatma's ideals organizes the people of the village and the coolies of Skeffington Coffee Estate launches satyagraha against

the 'Redman' and his empire. Led by him the villagers vow to follow non-violence and truth and spin on the charkha, wear khadi, refuse to pay taxes to the alien government and non-violently picket toddy booths and groves face imprisonment as the Mahatma's followers in cities and towns do, despite great risk to life and property until their village is completely destroyed by the colonial police forces. In this revolutionary activity barring a few families, the entire village community – men, women of all ages and castes enthusiastically participates and pits itself against the vast empire. Kanthapura presents, women, themselves marginalized lot in society, taking the centre stage and actively participating in the movement. Even though they get the worst of it, they remain staunchly devoted to the Mahatma making Kanthapura eminently a women's story.

Though the novel is not about Moorthy alone, Moorthy is the one who initiates action in the remote village of Kanthapura. Inspired by Gandhian ideals, he comes back to the village to mobilize villagers to join the freedom struggle. Moorthy closely replicates Gandhi's own strategy of mixing religion, politics, economy and social upliftment as part of his anti-British strategy. He proves an extraordinarily imaginative leader in introducing Gandhi and his movement as part of some myth or purana. He begins his work with unearthing of half-sunk lingam and its consecration in the temple and celebration of Sankara Jayanthi. To initiate the Gandhian movement he brings in Jayaramachar the Harikatha man who mythicizes not only the freedom struggle but also Gandhi himself. So that the villagers who were skeptical of the 'town talk' and 'Gandhi business' of Dore a young man of the village not only accept it but also become active participants in it. The prominent impact of this is that the insulated brahmin community of the village join forces with

others of the community. Of course, there are some like Bhatta, Waterfall Venkamma who see no personal profit in it and do not join. Moorthy's actions also lead to breaking of barriers of caste in the village to some extent as he braves excommunication of the religious head 'Swami' and visits the paraiah houses and makes them also part of the freedom struggle. In time Moorthy is able to make them believe that supporting the British colonial government is 'pollution' unlike what Swami and his followers try to project. Moorthy also follows the Gandhian strategy of breaking the colonial government's economic control by rejecting foreign cloth and picketing toddy booths and graves. Moorthy's followers mostly women of the villager do not understand the economic implications of what they are doing but they put their best foot forward because in their minds by now there is no difference between fighting for the country and fighting for their religion. So, they not only take to fasting as a protest but fast to strengthen their souls in this journey. They replicate 'Dandi March' of Gandhi and make salt. They participate whole heartedly in the non-cooperation movement and refuse to pay tax. Once Moorthy is arrested the novel becomes more of the women's story – how they form a Sevika Sangha under the leadership of Rangamma and later on under Ratna train themselves in the non-violent protest, hold fasts, pujas and keep the protest alive against the colonial government making the novel about 'kanthas'[women].

As indicated earlier, Raja Rao's anti-colonial strategies are not limited to narrating the freedom struggle. It includes other strategies like pitting an obscure village against the mighty colonial centre. The novel opens with a masterly lyrical evocation of Kanthapura thus: "High on the Ghats is it, high up the steep mountain that face the cool Arabian seas up

the Malabar coast is it up Mangalore and Puttur and many a centre of cardamom and coffee, rice and sugar cane. Roads narrow, dusty, rut-covered roads wind through the forests of teak and jack of sandal and sal and hanging over bellowing gorges and leaping over elephant-haunted valleys, they turn now to the left and now to the right and bring you through the Alambe and Champa and Mena and Kola passes into the great granaries of trade. There on the blue waters, they say, our carted cardamom and coffee get into the ships the Red-men bring and so they say, they go across the seven oceans into the countries where our rulers live." [1] The description is not only visually clear and striking but evokes the very atmosphere of Kanthapura, its environs of rich forests and estates and their exploitation by the 'Red men' 'our rulers' who live 'beyond the seven seas' immediately establishing the centre-margin, exploiter–exploited relationship between the British and Kanthapura [India]. Further, positing another challenge to colonial centre whose novel form he uses Raja Rao makes Acchakka, an old unsophisticated brahmin widow, herself a marginalized being, narrate retrospectively the sad tale of her village and its destruction in their opposition to the 'Red-men'.

In his famous 'Foreword' to **Kanthapura**, Raja Rao says "There is no village in India however mean, that has not a rich *sthalapurana* or legendary history of its own. Some god or godlike hero has passed by the village – Rama might have rested under this pipal tree, Sita might have dried her clothes … on the yellow stone, or Mahatma himself on one of his many pilgrimages through the country might have slept in this hut ….. in this way past mingles with present and the gods mingle with men…"[v]. Consequently, and quite appropriately too, Raja Rao casts his

novel in the mould of a *sthalapurana*, a long oral narrative following the tradition of *itihasa* and *puranas* of the yore. 'Itihasa' means "Thus it was" in short emphasizing that these ancient narratives – *itihasa* or *puran-* are, among other things, records of historical facts but presented not in terms of linear history of the western tradition but facts mythicized and fictionalized to fit in the cyclical time frame of *yugas* of continuous evolution and dissolution and in which past mingles with present and present is understood and interpreted in terms of the mythical past. The history that the *Puranas* present is in this sense 'living' [Lakshmi, 1] unlike its western counterpart. It is this puranic cyclical time that forms the time-frame of **Kanthapura** as the entire narrative is presented through the consciousness of old Achakka, a Brahmanical widow who is steeped in this puranic tradition. So, for Achakka and the villagers like her, the struggle for freedom from the 'Red-men' is a recurrence of the struggle between Rama and Ravana. The temporal fact of British colonization of India is seen and understood in terms of the mythical. Thus, Raja Rao turns the novel **Kanthapura** which describes people resisting the colonial rule into a *purana* type narrative contesting the western master narrative of history which is based exclusively on linearity of facts. He also subverts the western historical novel which views events in terms of chronological time and entirely in human terms.

Raja Rao presents the novel as a 'hybrid' product owing its allegiance to both western and Indian literary tradition by combining a realistic picture of an obscure village in the western ghats with that of a *sthalapurana*. But the most daring of his experimentation remains his 'decolonizing' the language [Bhat, 374] of the colonizer and moulding it to suit his intentions and to Indian sensibility. In the 'foreword' to

Kanthapura, Raja Rao succinctly explains his stand regarding the use of English. "One has to convey in a language that is not one's own the spirit that is one's own. One has to convey the various shades and omissions of a certain thought-movement that looks maltreated in an alien language…. We cannot write like the English. We should not." [p. v] Raja Rao breaks the English syntax and uses one which is an approximation to Kannada the mother-tongue of the narrator Achakka. To cite two random examples: "Kenchamma is our Goddess. Great is she."[2] "And there were other stories he told us, Jayaramachar."[17] Raja Rao also evolves a style and rhetorical strategy which is most appropriate to the unsophisticated narration of Achakka, reflecting the way her mind works, recreating her garrulousness and capturing her voice and breathless speed of her narration and simulating her oral mode of narration. Achakka's deep-rootedness in Kanthapura is reflected in the way she describes people 'Waterfall Venkamma', 'Nose-scratching Nanjamma', Temple Rangappa and also in her idioms like Moorthy goes through life "like a noble cow". Raja Rao frequently uses long sentences consistent with Achakka's interminable style of story telling which is best exemplified in the description of Skeffington Coffee Estate in chapter 5. He also employs frequent repetitions and successfully recreates the speech rhythms of Achakka's Kannada though the language used is English. For instance, this passage: "He went to Dore and Sastri's son Puttu, Dore and Sastri's son Puttu went to Postmaster Suryanarayana's sons Chadru and Ramu, and then came Pandit Venkateshaiah and Front house Sami's sons Srinivas and Kittu, and so Kittu and Srinivas and Puttu and Ramu and Chandru and Seenu threw away their foreign clothes and became Gandhi's men. [18]

Jayaramachar, the famous patriotic exponent of the indigenous and traditional narrative art of *Harikatha*, whom Moorthy brings to Kanthapura to rouse the villagers' patriotism and political awareness needs special mention not only because it is his arrest while performing a *Harikatha* at Kanthapura that turns the villagers in the favour of Gandhian movement but because his *Harikathas* fit very well into the *sthalapurana* framework of the novel and help it transcend the historical and temporal limitations of the current events. *Harikatha* is a living popular art form generally a religious discourse in which exercising imaginative freedom and flexibility allowed in the art form, the *Harikatha* exponent interprets contemporaneously the mythical events to instruct and delight the audience. Jayaramachar uses the stories of Damayanthi or Sakuntala which are familiar to his audience and somehow seamlessly connects them to the country and Swaraj. While telling the story of Siva and Parvati, Parvati in penance becomes the country longing for freedom. "Siva is Three-eyed, Swaraj is also three-eyed: Self purification, Hindu-Moslem unity, Khaddar"[14]. Jayaramachar refashions the story of Mahatma Gandhi blending fact and fiction and presents Mahatma as incarnation of Siva himself to free 'Bharata' from her enforced slavery[16] and thus makes an indelible impact on the villagers.

The use of *sthalapurana, harikathas*, Achakka's narration and mythical presentation of Gandhi in the novel has made the novel to be some sort of a 'Gandhian Purana' instead of a historical novel narrating the events of freedom struggle. But, Raja Rao, it has to be said to his credit, very subtly problematizes and subverts the anti-colonial strategies of Gandhi though the novel is seemingly on the surface valourizes

Gandhian strategies. When we go through the novel it becomes very clear that colonial exploitation is just an idea for most of the villagers unlike the coolies of Skeffington Coffee Estate. Bhatta's economic exploitation is much more real for them. Gandhi and his strategies against the British are accepted because of the clever mythizing done by Moorthy as well as Jayaramachar. It can also be noted that Gandhi's exertion of power on the inhabitants of Kanthapura is similar to that of the colonizer. The colonizer is never seen by the people but his presence is always felt. His power is exercised through local men like Bhatta and revenue inspector. Gandhi is also never seen physically by anyone not even Moorthy who has seen him only in a dream. Decisions are taken by village Congress Committee only after the directions are given by the Central Congress Committee. The relationship appears as one-sided as the relationship of colonizer-colonized. Just as the colonizer ignores the individuality of the colonized, the freedom movement under Gandhi's leadership is also found to be homogenizing people of different backgrounds in such acts like imposing Hindi on everyone in the name of freedom struggle and ignoring the mother tongue Kannada. The Gandhian movement also fails to address the oppression by natives like Bhatta and Revenue Inspector.

This raises the question how did Raja Rao see Gandhian contribution to freedom struggle? Is it a success or a failure for him? It seems to be a 'yes' and a 'no' for Raja Rao. The Gandhian Movement was successful in uniting people in spite of their caste, class and religion. It was also successful in forging a national identity among villagers who have never ventured out of their village and who were oblivious of happenings around them [Kamalakar]. But, it is to be noted that self-

reliance which Gandhi wished is still a dream in the novel. Though the worry of pollution of castes is lessened, caste discrimination still persists. Finally, Moorthy, 'our Gandhi' 'Little Mountain' as the villagers call him, who was once staunch supporter of Gandhi is dissatisfied with Gandhi especially Gandhi-Irwin pact and moves over ideologically to the Nehruvian idea of equitable distribution.

To conclude, Raja Rao's **Kanthapura** stands out as a postcolonial novel not only by narrativizing and problematizing the freedom struggle under Mahatma Gandhi but by decolonizing the language and also narrative tradition of the novel.

**References**

1) Bhat, Ishfaq Hussain, International Journal of Trend in Scientific Research and Development, Vol. 2, Issue 1 Nov-Dec 2017, www.ijtsrd.com

2) Kamalakar, 'Raja Rao's Kanthapura: Nationalism and Caste' https://sotosay.wordpress.com/2009/11/02/467/

3) Lakshmi, G. Kanthapura: An Analysis on the Conceptual Background of Raja Rao's Novel, Journal of Advances and Scholarly Researches in Allied Education Vol.II, issue no.11, October 2011, www.ingnited.in

4) Rao, Raja **Kanthapura**, Oxford University Press, 14th impression, 2003

❑ ❑ ❑

महस्विनी – विद्वत्समीक्षिता सन्दर्भिता च शोधपत्रिका (ISSN: 2231-0452)
**कुसुमम् :** जनवरी – डिसेम्बर २०२१ **सम्पुटम् :** संयुक्तम् (१,२)

# संस्कृतशिक्षकप्रशिक्षणे नवोन्मेषस्य चिन्तनं प्रायोगिकता च

**प्रो.चन्द्रकान्तभट्टः***

जगति सर्वोऽपि नूतनपदनिक्षेपः विकासमुपलक्ष्यैव जायते। वैज्ञानिकेऽस्मिन् काले विज्ञानाधारिताः उपक्रमा एव सर्वत्र महत्त्वपूर्णं स्थानमवाप्नुवन्ति। परन्तु सर्वत्र वैज्ञानिकयन्त्राधारितोपागमाः एव सर्वतोमुखं विकासं साधयन्ति इति सर्वसम्मतः अभिप्रायः नास्ति। यतोऽहि सैद्धान्तिकरूपेण विषयस्य दृढीयः विवरणं यदि कस्यचित् विषयस्य न भवति तर्हि विज्ञानेनैकेन सुदृढः विकासः न सम्पद्यते । अतः सैद्धान्तिकविकासेन सह वैज्ञानिकाधारः (विषयस्य) कार्यस्य सकारात्मिकां प्रगतिं साधयितुं समर्थः भवति। तस्मात् संस्कृतशिक्षकप्रशिक्षणक्षेत्रम् अपि सन्तुलितरूपेण सैद्धान्तिकवैज्ञानिकयोः विकासं काङ्क्षति। अतः संस्कृतशिक्षकप्रशिक्षणे नवोन्मेषस्य चिन्तनमनिवार्यमस्ति। नवोन्मेषः नाम नूतनचिन्तनं नूतनमनुसन्धानं, विकासः, शोधः, आविष्करणं वा इति। नवोन्मेषस्य उद्देश्यन्तु कार्येषु गुणवत्तायाः सम्पादनमेवास्ति। शिक्षकप्रशिक्षणे उन्मेषः प्रशिक्षणस्य गुणवत्तायै कल्पेत येन गुणवान् शिक्षकः निर्मितो भवेदिति। संस्कृतशिक्षकप्रशिक्षणं भाषाशिक्षकप्रशिक्षणं वर्तते। संस्कृतशिक्षकः संस्कृतभाषया, विषयेण च सुदृढः भवेत्। भाषाशिक्षणप्रशिक्षणस्य पक्षद्वयं भवति। भाषादक्षतासम्पादनं, विषयेऽपि दक्षता सम्पादनमिति । विषयस्य दक्षता पुनः द्विधा जायते। शिक्षाशास्त्रीयविषयेषु दक्षता सम्पादनं, संस्कृतसाहित्यगतविषयेषु दक्षता-सम्पादनमिति। एतत्सर्वमपि शिक्षाशास्त्रकक्ष्यायां पठनसमये एव सम्पादयितुं न शक्यते। तथापि समर्थः शिक्षकः निर्मेयश्चेत् तद्दिशि प्रयत्नः विधेय एव। संस्कृतशिक्षकः सुदृढः

* शिक्षाविभागाध्यक्षः , केन्द्रीयसंस्कृतविश्वविद्यालयः, राजीवगान्धीपरिसरः, शृङ्गेरी।

सफलः, उत्तमः तदा एव भवितुमर्हति यदा सः भाषायां विषये च दक्षतां सम्पादयति इति निर्विवादम्। भाषणेन भाषाप्रयोगे शुद्धतां सम्पादयति। सहजता, धाराप्रवाहता लालित्यञ्च तद्गतव्याकरणज्ञानेन समायाति। अत्र कश्चन विशेषेण चिन्तनीयः विषयविशेषः वर्तते। स च विषयः प्रशिक्षणे ग्राहकः कः इति। यः प्रशिक्षणं प्राप्नोति सः कः कीदृशश्च इति विचारणीयेंऽशः। यः पदवीस्तरे व्याकरणं पठति सोऽपि संस्कृतभाषाशिक्षकः भवितुं वाञ्छति, प्रशिक्षणकक्ष्यां प्रविशति च । यः वेदान्तं पदवीस्तरे पठति सोऽपि संस्कृतभाषाशिक्षकः भवितुं वाञ्छति। यः साहित्यं पठति सोऽपि संस्कृतभाषाशिक्षकः भवितुं वाञ्छति। यः जैनदर्शनं, पुराणेतिहासं, धर्मशास्त्रं, मीमांसाशास्त्रं, ज्यौतिषशास्त्रञ्च पठति सोऽपि संस्कृतभाषाशिक्षकः भवितुं वाञ्छति। न एतावदेव यः आधुनिकपदवीं समापयति सोऽपि संस्कृतभाषाशिक्षकः भवितुं वाञ्छति प्रवेशं स्वीकरोत्यपि च।

एतस्यां स्थितौ प्रशिक्षणे उत्तमोत्तमप्रशिक्षणं दातव्यञ्चेत् नवोन्मेषः चिन्तनीय एव येन सर्वेऽपि समर्थाः संस्कृतभाषाशिक्षकाः जायेरन्। एतया दृष्ट्या प्रशिक्षकः यदा चिन्तयति तदा प्रशिक्षकस्य सम्मुखमायान्ति भाषायाः विविधाः आयामाः भाषायाः प्रचारस्य आयामाः भिन्नाः। भाषाशिक्षको भूत्वा भाषादक्षतासम्पादनस्य कृते भाषागतायामाः भिन्नाः वर्तन्ते ये च भाषायाः वास्तविकसंरचनां प्रतिपादयन्ति। अत एव राजीवगान्धीपरिसरस्य शिक्षाविभागेन षोडशाधिकद्विसहस्रतमे (२०१६) वर्षे इदं प्रथमतया कश्चन प्रयोगात्मकप्रयत्नः व्यधायि "औदयास्तिकशिबिरम्" इति नाम्ना भाषादक्षतासम्पादनकक्ष्यायाः सञ्चालनं कृतम्। इदं शिबिरं दशदिनात्मकमासीत्। तस्मिन् जायमानेन भविष्यकालस्य संस्कृतभाषाशिक्षकेण ज्ञातव्यानां भाषायाः मूलभूततत्त्वानां समायोजनं कृतमासीत्। यथा सम्भाषणशिबिरमाध्यमेन दशसु दिनेषु भाषणकौशलं समधिगतं भवति तथैव दशसु दिनेषु भाषायाः मूलभूतस्वरूपस्य तत्त्वानाञ्च अधिगमनं शिबिरस्य उद्देश्यमासीत्। अतः अस्य उद्देश्यस्य सम्प्राप्त्यर्थं समुचितानां बिन्दूनां समायोजनमस्मिन् पाठ्यक्रमे विहितमासीत्। ते च बिन्दवः संस्कृतभाषायाः अन्तरङ्गं परिचाययितुं समर्था अभूवन्। तेषां बिन्दूनां विवरणमित्थं वर्वर्ति। यथा हि –

१) शब्दरूपाणां धातुरूपाणां समासचक्रस्य च सम्पूर्णः परिचयः।

२) सुबन्तानां व्युत्पत्तिक्रमस्य परिचयः।

३) व्यावहारिकशब्दकोषनिर्माणस्य प्रयत्नः तदर्थं सङ्गोष्ठीसञ्चालनम्।

४) तिङन्तानाम् अभ्यासः। तत्र णिजन्तशब्दानां, सन्नन्तरूपाणां, यङन्तरूपाणां यङ्लुगन्तरूपाणां, नामधातुरूपाणाञ्च स्पष्टपरिचयप्रदानम्।

५) कृदन्तानामभ्यासः। अस्मिन् कृत्प्रत्ययेन विविधसुबन्तशब्दनिर्माणप्रक्रियायाः परिचयः करणीयः। अर्थवैविध्यस्यापि परिचयः।

६) भाषणे जायमानसामान्यदोषनिवारणार्थं शुद्धिकौमुदीग्रन्थस्य, दीक्षापुस्तकस्य च अध्यापनम्।

७) आशुलेखनाभ्यासः । सम्भाषणसन्देशादिषुसमागतानां लेखानां वाच्यपरिवर्तनं कृत्वा लेखनाभ्यासः अत्रान्तर्भावितः ।

८) सर्वेषामपि कारकाणाम् अर्थबोधनेन सह उदाहरणवाक्यानामभ्यासः।

९) तद्धितान्तानां शब्दानां व्युत्पत्तिपरिचयप्रदानेन सह प्रसिद्धप्रत्ययानां सूत्राणाञ्च अभ्यासः।

१०) अमरकोषस्य अभ्यासेन सह प्रसिद्धछन्दसां बोधनम्। श्लोकरचनायाः प्रायोगिकाभ्यासः। एवमुपर्युक्तानां भाषायाः जीवातुभूतानां बिन्दूनां प्रतिदिनमपि अष्टौ अन्तराणि निरन्तरं दश दिनानि यावत् बोधनं कृतमासीत्। तत्परिणामतः छात्राध्यापकानां भाषणे आत्मविश्वासे लेखनशैल्याञ्च महत्परिवर्तनमागतम् । तेन परीक्षायाः परिणामेऽपि उत्तमस्तरः संदृष्टः।

एवं प्रशिक्षणं यदि सर्वत्र प्रशिक्षणमहाविद्यालयेषु दीयते चेत् संस्कृतक्षेत्रे दक्षानां शिक्षकाणां संख्या अधिका जायते। नवनियुक्ताः शिक्षकाः सेवाकाले विशिष्टमनुसन्धानकार्यं कर्तुं समर्थाः भविष्यन्ति। अग्रिमसन्तानं प्रति संस्कृतभाषायाः यथारूपं परिचाययितुं सक्षमाः जायन्ते।

एताद्दशमौदयास्तिकशिबिरं चालयितुं योग्यप्रशिक्षकाणाम् अपेक्षा वरीवर्ति। प्रशिक्षकाः सर्वे समानमनस्काः उत्साहिनः भवेयुः। समयस्य सदुपयोगः शिबिरे महत्त्वपूर्णः अंशः भवति। अस्मिन् शिबिरे व्याख्यानं वा बोधनं प्रधानं नास्ति। छात्राध्यापकाः स्वयं क्रियाशीलाः भवेयुः। ग्रन्थालये अपेक्षितपुस्तकानामुपलब्धिः भवेत्। मध्ये अवरोधः अधिगमं प्रभावयति अतः नैरन्तर्यमनिवार्यं वर्तते। कृतस्यास्यानुसन्धानस्य सफलता तदैव सिध्यति यदा सर्वत्र प्रयोगे समायाति। **"गुणाः पूजास्थानं गुणिषु न च लिङ्गं न च वयः"** इति भवभूतेरुक्तिः अत्र स्मर्यते। सर्वेषु कार्येषु दोषाः भवन्त्येव परन्तु गुणाः सन्ति चेत् ते अनुसर्तव्याः। अस्य "औदयास्तिकशिबिरस्य" समायोजनं प्रशिक्षण पाठ्यक्रमे (शिक्षाशास्त्रीपाठ्यक्रमे) अनिवार्यं क्रियते चेत् समीचीनं भविष्यति। अतः लेखेऽस्मिन् आग्रहः क्रियते यत् अतिशीघ्रमेव अस्य औदयास्तिकशिबिरस्य पाठ्यक्रमे अन्तर्भावः भवेदिति। समेषां पठितृणाम् अनुसन्धातृणां च लाभाय कृतस्य औदयास्तिकशिबिरस्य समयसारिणी साक्षीरूपेणात्र समायोजिता वर्तते। अनेन अनुसन्धातारः भाव्यनुसन्धानार्थमपेक्षिताः सूचनाः प्राप्तुमर्हन्ति। शिक्षायाः अधिकारिण अस्य समन्वयने आसक्तिं प्रदर्शयेयुः।

## सहायकग्रन्थसूची

१) Secondary Education and Teacher's Functions (Kannada), Dr. S. Shivayya, 2009

२) भारत में शैक्षिक व्यवस्था का विकास, डा. के. के. शर्मा, स्वातिपब्लिकेषन्, जयपुर, २००८

३) शास्त्रेषु शैक्षिकतत्त्वानि, डा. चन्द्रकान्तः, वैयक्तिकप्रकाशनम्, २०१६

४) उच्यतरशिक्षामनोविज्ञान, डा. एस. पी. गुप्ता, शारदा पुस्तकभवन, प्रयागराज, २०१०

५) भाषाविज्ञानपरिचय, डा. केम्पेगौड, भारतीप्रकाशन, मैसूरु, २०१५

❑❑❑

**महस्विनी – विद्वत्समीक्षिता सन्दर्भिता च शोधपत्रिका (ISSN: 2231-0452)**
**कुसुमम् :** जनवरी – डिसेम्बर २०२१ **सम्पुटम् :** संयुक्तम् (१,२)

# व्याकरणशास्त्रे कारकस्य महत्त्वम्

**डॉ. पंकजकुमारव्यासः***

**न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।**
**अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते।।**[1]

इति भर्तृहरेः वाक्यपदीयवचनेन स्पष्टं भवति यल्लोके सर्वमपि ज्ञानं शब्दजमेव। तथापि लोकव्यवहारे न वर्णो नापि पदं निराकाङ्क्षरूपेण ज्ञानं जनयितुं समर्थो भवति। वाक्यं हि व्यवहारे निराकाङ्क्षरूपेण ज्ञानं जनयति। अत एव वाक्येन अर्थपरिसमाप्तेः लोके वाक्यस्यैव प्राधान्यमङ्गीक्रियते। वाक्येन जन्यं ज्ञानं वाक्यार्थज्ञानमित्युच्यते। तद्धि कारकज्ञानेनैव सम्भवति, नान्यथा। अत एवोक्तं वृद्धैः – "**सर्वोपकारकं ज्ञेयं कारकं सर्वकारकम्**"[2] इति। कारकज्ञानाभावे एकस्यापि वाक्यस्य शाब्दबोधो वर्णयितुमेव न शक्यः। यावता न ज्ञायते वाक्ये कस्तावत् कर्ता, किञ्च कर्म इति तर्हि तत्तत्कारकत्वेनानभ्युपगमे कस्यापि वाक्यस्य विश्लेषणं तावत् पदशः न सम्भवतीति। यतः प्रतिपदार्थे ज्ञात एव परस्परपदार्थान्वये सति वाक्यार्थ उपपद्यते। तदुक्तं न्यायसिद्धान्तमुक्तावल्यां विश्वनाथपञ्चाननभट्टाचार्येणापि –

**पदज्ञानं तु करणं द्वारं तत्र पदार्थधीः।**
**शाब्दबोधः फलं तत्र शक्तिधीः सहकारिणी।।**[3] इति ।

एतद्रीत्या शाब्दबोधं नाम वाक्यर्थबोधं प्रति कारणीभूतपदपदार्थज्ञानेन पदार्थानां परस्परमन्वयः कारकज्ञानाधीनमेव। यथा रामो यानेन ग्रामं गच्छति इत्यत्र रामः कर्ता, यानं

* सहाचार्यः, व्याकरणविभागः, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः।

1 वाक्यपदीयम्, ब्रह्मकाण्डम्, कारिका – 123, पृ.सं. 183

2 लोके कारकविषयिणी प्रसिद्धोक्तिः।

3 न्यायसिद्धान्तमुक्तावली, शब्दखण्डे, कारिका – 81, पृ.सं. 291

करणं, ग्रामः कर्म इत्येत्सर्वं तत्तत्कारकत्वेन धात्वर्थक्रियायामन्वेति। तेन रामकर्तृक-ग्रामकर्मक-यानकरणक-गमनानुकूलो व्यापार इत्यादिबोधस्तावत्तस्माद् वाक्याज्जायते। एवञ्च यथा लोके तथैव शास्त्रेष्वपि वाक्यार्थज्ञानाय कारकज्ञानं सर्वदा उपकरोत्येव। सर्वेषु शास्त्रेषु तत्तद्वाक्यस्य अर्थज्ञानाय तत्रस्थपदानां कारकत्वज्ञानमपेक्षत एव। तेनैव च परस्परमन्वयोपपत्त्या प्रतिपत्तुः समुदितशाब्दबोधो नाम वाक्यार्थबोधो जायते। अत एव वाक्यार्थवर्णनोपकारकस्य कारकस्य अर्थनिर्णयाय समेऽपि शास्त्रकारा विवदन्ते परस्परम्। एतस्मादेव ज्ञायते कारकपदार्थस्य व्याकरणशास्त्रे कियन्महत्त्वं वर्तत इति। नातिशयेनोच्यत इदं यन्नहि कारकज्ञानाभावे केनापि शास्त्रेण प्रतिपाद्यमानविषयस्य बोधोऽपि सम्भवेदिति। अतः कारकं हि संस्कृतशास्त्राणां जीवातुरिति। अत एव च **“सर्वे हताः कारकप्रक्रियायाम्”** इत्याभाणकमपि प्रसिद्धिं गतम्।

तत्र पदशास्त्रं नाम व्याकरणशास्त्रम्। तेन पदानां शब्दानां वा व्याक्रिया क्रियते, अत एव व्याक्रियन्ते व्युत्पाद्यन्ते प्रकृतिप्रत्ययविभागेन विविच्यन्ते शब्दा अनेन इति व्याकरणमिति व्युत्पत्तिराद्रियते। वाक्यशास्त्रं तु पूर्वमीमांसाशास्त्रमित्युच्यते यतस्तत्र वाक्यानां वाक्यार्थानाञ्च विशदतया चर्चा विधीयते। तथापि सूक्ष्मतया आलोच्यमाने कारकत्वज्ञानादृते परस्परं पदानामन्वयादिकमेव असम्भवि। अतः सत्स्वपि सन्धिसमासादिविविधेषु विवेच्येषु विषयेषु कारकविषयः प्राधान्यमावहते। तत्र **समासादिवृत्ति**[1]विधायकसूत्रेषु कथं कारकार्थज्ञानमुपकरोति इति स्थालीपुलाकन्यायेन कानिचनोदाहरणान्यवलोकयामस्तेन तत्र तत्र कारकस्य प्राधान्यं प्रतिपादितं भवति। तथा हि –

तत्र समासप्रकरणे कर्तरि करणे च या तृतीया कृदन्तेन बहुलं प्राग्वत् इत्यर्थकेन **“कर्तृकरणे कृता बहुलम्”**[2] इति सूत्रेण समासो वक्तव्यश्चेत्तत्रावश्यं ज्ञातव्यं यत् कर्तरि करणे च या तृतीया वर्तते सैव कृदन्तेन समस्यते। तत्र कारकार्थज्ञानं विना कथं वा ज्ञायेत केयं

---

[1] कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपाः पञ्च वृत्तयः इति दीक्षितः कौमद्यां सर्वसमासशेषप्रकरणे प्रारम्भे (पृ.स. 94), नागेशस्तु द्वन्द्वापवाद एकशेष इति एकशेषं समास एव अन्तर्भाव्य वृत्तिश्चतुर्धेत्याह लघुमञ्जूषायां वृत्तिविचारे वृत्तिभेदनिरूपणवेलायाम् (पृ.सं. 1421)

[2] अष्टाध्यायी 2-1-32

तृतीयेति ? कर्तरि वा करणे वा ? यतः व्याकरणशास्त्रे तृतीया न केवलं कर्तरि करणे वा विहिता। हेत्वर्थे अपि तद्विधानात्, तथैव उपपदविभक्तित्वेनापि तस्या विधानमस्त्येव। तस्मात् समासज्ञानायापि कारकार्थज्ञानमपेक्षत इत्यायाति।

पूर्वोक्तप्रतिपादितरीत्या कृत्स्थलेऽपि पश्यन्तु ! इदानीं **"ण्वुल्तृचौ"**[1] इति सूत्रं वर्तते। तद्धि **"धातोः"**[2] इत्यधिकारे वर्तमानत्वात् धातोः कर्तरि प्रत्ययं विधत्ते। एवमेव **"कर्मण्यण्"**[3] इति सूत्रं वा। सूत्रमिदं कर्मण्युपपदे धातोः अणं विदधाति। एवमन्यानि च सूत्राणि तत्तत्कारकमाश्रित्य प्रत्ययान् विदधते कृदधिकारे। तर्ह्यायातं यत् कारकार्थज्ञानं विना कृदन्तस्थले न कश्चित् प्रवृत्तिमर्हति सूत्रार्थनिरूपणे सूत्रेण प्रयोगसाधने वा।

एवमेव अवलोकयन्तु च तद्धितस्थलेऽपि ! **"तेन दीव्यति खनति जयति जितम्"**[4] इत्यनेन करणतृतीयान्तादेव ठक् विधीयते। यस्तु तत्र कारकार्थं न जानीयात् स तु देवदत्तेन जितम्, अक्षैः द्यूतः, अक्षैः खात इत्यादिषु स्थलेषु अन्यार्थेऽपि प्रत्ययं विदध्याद् भ्रान्त्या। एवमेव **"तेन क्रीतम्"**[5] इत्यादिषु करणतृतीयान्तादेव ठक् प्रत्ययो विधीयते। एवं बहुत्र तद्धितानां विधानं तत्तत्कारकमुपजीव्यैव प्रवर्तते। तदर्थं तद्धितानां विधानायापि कारकार्थज्ञानं सहकरोति इत्यायाति।

अपि च सनाद्यन्तधातुरूपस्थले वा परिशीलयन्तु ! तत्र णिच्प्रकरणे **"हेतुमति च"**[6] इति सूत्रेण प्रयोजकव्यापारे प्रेषणादौ वाच्ये धातोर्णिच् विधीयते। प्रयोजकव्यापारज्ञानं तावत् कारकचक्रप्रक्रियाधीनम्। यतः कारकाध्ययनेनैव ज्ञायते यत् **"स्वतन्त्रः कर्ता"**[7] इत्यनेन

---

[1] अष्टाध्यायी 3-1-133
[2] तत्रैव 3-1-91
[3] तत्रैव 3-2-1
[4] तत्रैव 4-4-2
[5] तत्रैव 5-1-37
[6] तत्रैव 3-1-26
[7] तत्रैव 1-4-54

क्रियायां स्वातन्त्र्येण विवक्षितस्य कर्तृसंज्ञा विधीयते। ततः **"तत्प्रयोजको हेतुश्च"**[1] इत्यनेन कर्तुः प्रयोजकस्य हेतुसंज्ञा कर्तृसंज्ञा च विधीयते। ततः परमेव प्रयोजकव्यापारे प्रेषणादौ वाच्ये धातोर्णिच् विधातुं शक्यः। यतस्तत्र कस्तावत् प्रयोज्यः कर्ता, कश्च प्रयोजक इति कारकप्रक्रिययैव ज्ञायत इति। यथा चैत्रो मैत्रं ग्रामं गमयति इत्यादौ मैत्रो ग्रामं गच्छति, चैत्रस्तावत् तं प्रयोजयति नाम गन्तुं प्रेरयति। अत्र मैत्रः शुद्धः कर्ता, तस्य प्रेरकत्वात् चैत्रः प्रयोजकः कर्ता। एवञ्चानेन स्पष्टं यत् प्रयोजकव्यापारे प्रेषणादौ वाच्ये यदा णिज्विधेयस्तदा कारकचक्रज्ञानमन्तरा तदशक्यमेव।

एवमेव सन्विधायके सूत्रे **"धातोः कर्मणः समानकर्तृकादिच्छायां वा"**[2] इति सूत्रेऽपि कर्तृकर्मज्ञानं विना कस्माद्धातोः सन् विधेय इति ज्ञातुं न शक्यते। तत्र हि इषिकर्मणः इषिणैककर्तृकाद्धातोः सन्प्रत्ययो विधीयते इच्छायाम्। अतः पिपठिषति इत्यत्र तदैव प्रत्ययः सम्भवति यदा यस्तु इच्छति स एव इषिकर्ता पठेदपि, नाम इषिधातोः कर्म भवति पठनक्रियेति। तेन गुरुरिच्छति पठन्तु शिष्या इत्यादौ सन् वार्यते। यतस्तत्र पठनक्रियाकर्तृत्वं शिष्याणाम्, इच्छतिक्रियाकर्तृत्वं तु गुरोः। एवञ्च एतादृशकर्तृकर्मज्ञानं कारकप्रक्रियाधीनमेव खलु।

इत्थमेव नामधातुप्रकरणेऽपि **"सुप आत्मनः क्यच्"**[3] इत्यनेन क्यचः विधानायापि इष्यमाणकर्मकारकस्य ज्ञानमपेक्षते यतः अस्मिन्नपि सूत्रे **"धातोः कर्मणः समानकर्तृकादिच्छायां वा"** इत्यस्मात् सूत्रात् **कर्मणः, इच्छायां, वा** इत्येतानि पदानि अनुवर्तन्ते। तेन इषिकर्मणः एषितृसम्बन्धिनः सुबन्तादिच्छायामर्थे क्यच्प्रत्ययो वा भवति इति सूत्रार्थः सम्पद्यते। एतदेव व्याख्याति बालमनोरमाकारः प्रकृतसूत्रव्याख्याने[4] – 'धातोः कर्मणः--' इति सूत्रात्कर्मण इच्छायां वेत्यनुवर्तते। कर्मण इति पञ्चमी। कर्मकारकादिति लभ्यते। सन्निधानादिच्छां प्रत्येव

---

[1] अष्टाध्यायी 1-4-55

[2] तत्रैव 3-1-7

[3] तत्रैव 3-1-8

[4] सिद्धान्तकौमुदी (तृतीयभागे), नामधातुप्रकरणे बालमनोरमायाम्, पृ.सं. 505

कर्मत्वं विवक्षितम्। आत्मन्शब्दः स्वपर्यायः। तादर्थ्यस्य शेषत्वविवक्षायां षष्ठी। स्वार्थात्कर्मण इति लभ्यते। स्वश्च इच्छायां सन्निधापितत्वादेषितैव विवक्षितः। तथा च स्वस्मै यदिष्यते कर्मकारकं तद्वृत्तेस्सुबन्तादिच्छायां क्यज्वा स्यादिति फलति। ततोऽग्रे व्याख्याने इतोऽपि स्पष्टयति[1] – एषित्रर्थादिषिकर्मण इत्यर्थः। एषित्रा स्वार्थं यदिष्यते कर्मकारकं तद्वाचकात्सुबन्तादिति यावदित्यादिना। अनेन व्याख्यानेन स्पष्टं यत् प्रकृतसूत्रार्थज्ञानाय कर्मणो ज्ञानं, तादर्थ्यस्य ज्ञानं तत्रापि चतुर्थ्या अविवक्षायां शेषत्वविवक्षायां च षष्ठी इत्येते सर्वेऽपि विषयाः कारकज्ञानाधीना इति। एवञ्च सनादिप्रक्रियायामपि कारकार्थज्ञानस्यातीवं महत्त्वं वर्तत इति न विशिष्य वक्तव्यमपि भवेत्।

अन्यत्रापि तिङन्तप्रक्रियायामपि धातूनामर्था यदा उच्यन्ते तदा धात्वर्थवर्णनवेलायां वैयाकरणनये धातोः फलव्यापारौ अर्थः[2] इति सिद्धान्तानुसारेण तदाश्रयतासम्बन्धमभ्युपगम्यैव शाब्दबोध उच्यते। तत्र सकर्मकाकर्मकभेदद्वयवता धातुना क्रिया उच्यते। क्रियाया कर्तृकर्माकाङ्क्षा नियता सकर्मकस्थले। अकर्मकस्थले तु कर्त्राकाङ्क्षा। करणाद्याकाङ्क्षा तु उत्पाद्यविषया। अस्तु, तत्र कर्तृकर्मानुसारेणैव धातोरर्थ उच्यते। तत्र फलाश्रयः कर्म, व्यापाराश्रयश्च कर्ता।[3] तद्यथा गम्लृ धातोरर्थो वर्ण्यते उत्तरदेशसंयोगानुकूलो व्यापार इति। तत्रोत्तरदेशसंयोगः फलं, संयोगाश्रयश्च ग्रामस्तेन फलाश्रयत्वाद् ग्रामस्य कर्मत्वम्, तादृशसंयोगरूपफलानुकूलः पादप्रक्षेपादिव्यापारः कर्तृनिष्ठः, तद्व्यापाराश्रयश्च भवति कर्तेति। किमुत वक्तव्यं यस्याः क्रियायाः धात्वपरपर्यायाः शाब्दबोधविषये सर्वे यतन्ते तस्याः सर्वस्या अपि क्रियाया जनकं कारकमेव। तदुक्तं भगवता भाष्यकारेण पतञ्जलिना **कारके सूत्रभाष्ये**[4] -

---

[1] सिद्धान्तकौमुदीतृतीयभागे नामधातुप्रकरणे बालमनोरमायाम्, पृ.सं. 506

[2] **फलव्यापारयोर्धातुराश्रये तु तिङः स्मृताः। फले प्रधानं व्यापारस्तिङर्थस्तु विशेषणम्।।** भूषणसारकारिका-2

[3] वैयाकरभूषणसारे धात्वर्थप्रकरणे, पृ.सं. 31

[4] अन्वर्थसंज्ञा यथा विज्ञायेत – करोतीति कारकमिति। इत्यादिना कारके 1-4-23 इति सूत्रस्थभाष्येण लब्धोऽयमर्थः। महाभाष्यम्, द्वितीयखण्डः, पृ.सं. 242

करोति क्रियां निर्वर्तयति इति कारकम्। करोति कर्तृकर्मव्यपदेशानिति च। अतः क्रियाजनकत्वादपि कारकस्य प्राधान्यं तु सिद्धमेव।

तथा च व्याकरणशास्त्रे प्रकियाक्रमो वा भवतु, आर्थिकक्रमो वाऽस्तु सर्वत्रापि कारकार्थज्ञानं नितान्तमावश्यकमिति निश्चप्रचम्। तदेतावता प्रबन्धेन व्याकरणशास्त्रे कारकस्य महत्त्वं कीदृशमिति ख्यापयितुं समासकृत्तद्धितसनाद्यन्तधातुवृत्तिसम्बद्धकतिपयसूत्राणि समाश्रित्य यथामति यथासम्प्रदायं मौलिकेन चिन्तनेन संक्षिप्ततया प्रत्यपादीत्यलं पल्लवितेन।

## परिशीलितग्रन्थसूची

१) दीक्षितो भट्टोजिः, वैयाकरणसिद्धान्तकौमुदी (मूलमात्रम्) स्वामिनारायणाश्रितैः श्रीमत् 'श्रीकृष्णस्वरूप' काव्यतीर्थैः संशोधिता, चौखम्बा पब्लिशर्स, वाराणसी, २००४

२) भर्तृहरिः, वाक्यपदीयम् (ब्रह्मकाण्डम्), रघुनाथशर्मविरचित-अम्बाकर्त्रीव्याख्यासहितम्, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, २००६

३) भट्टोजिदीक्षितः, वैयाकरणसिद्धान्तकौमुदी (तृतीयो भागः) बालमनोरमातत्त्वबोधिनी-व्याख्याद्वयसहिता, श्रीमद्गिरिधरशर्मणा श्रीपरमेश्वरानन्दशर्मणा च संशोध्य सम्पादिता, मोतीलाल बनारसीदास, दिल्ली, २००१

४) भट्टनागेशः, वैयाकरणसिद्धान्तलघुमञ्जूषा (द्वितीयो भागः) कलाकुञ्जिकाभ्यां सनाथिता, चौखम्बा संस्कृत सीरीज ऑफिस, वाराणसी, १९८९

५) पतञ्जलिः, महाभाष्यम् (द्वितीयखण्डः) प्रदीपोद्योतसहितम्, संशोधकः – श्रीभार्गवः शास्त्री जोशी, चौखम्बासंस्कृतप्रतिष्ठानम्, दिल्ली, २००७

६) भट्टाचार्यो विश्वनाथः पञ्चाननः, न्यायसिद्धान्तमुक्तावली, श्रीकृष्णवल्लभाचार्यकृतया किरणावल्या सहिता, चौखम्बा संस्कृत संस्थान, वाराणसी, २००३

७) कौण्डभट्टः, वैयाकरणभूषणसारः, म.म. पेरि सूर्यनारायणशास्त्रिविरचितया तत्त्वदर्शिनीव्याख्यया समुल्लसितः, श्रीवेङ्कटेश्वरविश्वविद्यालयः, तिरुपतिः, २०१६

❑❑❑

**महस्विनी – विद्वत्समीक्षिता सन्दर्भिता च शोधपत्रिका (ISSN: 2231-0452)**
**कुसुमम् :** जनवरी – डिसेम्बर २०२१ **सम्पुटम् :** संयुक्तम् (१,२)

# वाक्यपदीयमहाभाष्ययोः सन्दर्भे ध्वनिपदार्थविश्लेषणम्

**डॉ. प्रमोदकुमारशर्मा** *

आलेखेऽस्मिन् ध्वनिविषयकं भाषावैज्ञानिकं स्वरूपमुद्भाव्य व्यावहारिकं शब्दस्वरूपं वाक्यपदीयं महाभाष्यञ्चाश्रित्य निरूपितमस्ति। ध्वनिस्फोटयोः पार्थक्यमाहोस्विदैक्यमपि चिन्तिमस्ति। आलेखान्ते च शब्दार्थयोः भेदाऽभेदयोः स्वरूपमुद्भाव्य शब्दार्थस्य वैभिन्न्यमपि निदर्शितमस्ति।

**सदा यष्ट्याघातैर्ध्वनयति चलन्नेष पुरुषो,**
**निरायासं सर्पो भवतु ननु दूरं यत इति।**
**स्रवन्ती नित्यं ध्वानयति नितरां कर्णसुखदं,**
**बुधा मन्यन्तेऽतो मुखजनितशब्दो ध्वनिरिति॥**
**ध्वनितमृदङ्गध्वनिमाकर्ण्य ध्वान्ते गच्छति शिशुरप्येषः।**
**अपि सति जाते भये तदानीं ध्वनति सदर्पं हनुमन् हनुमन्॥**

ध्वनिशब्दोऽयं बह्वर्थः, यथा गुणशब्दः व्याकरणनिकाये संज्ञाविशेषमाह, न्यायवैशेषिकदर्शने गुणशब्दः पदार्थविशेषवाचकः, सांख्यदर्शनशास्त्रे च पुनः द्रव्यमर्थमेवमभिदधाति तथैवायं ध्वनिशब्दः व्याकरणनिकाये ध्वनिस्फोटयोः वाचकः किन्तु काव्यसम्प्रदाये आत्मनः शब्दस्वरूपार्थं परित्यज्य अर्थरूपार्थमेव प्रस्तौति। अतोऽत्र सर्वस्मादौ व्याकरणशास्त्रदृशा ध्वनिशब्दोऽयं पदार्थविशेषतया निरूप्यते। ध्वनिसमूहमेव प्रायः शब्दपदेन व्यवहरन्ति लोके जनाः, अतो व्याकरणसम्प्रदाये शब्दशास्त्रिभिरपि शब्दः ध्वन्यात्मकः

---

* सहाचार्यः, संस्कृतमेवम्प्राच्यविद्याध्ययनसंस्थानम्, जवाहरलालनेहरुविश्वविद्यालयः, नवदेहली।

अनुमोदितः। प्रवक्तुः प्रतिपत्तुश्च परस्परं व्यवहारसम्पादनार्थं शब्दाः प्रयुज्यन्ते। प्रयोक्ता स्वकीयमन्तःस्थां भावनां प्रकटयितुं शब्दभावनां कुरुते। शब्दानां ध्वन्यात्मकं रूपं व्यावहारिकस्वरूपं भवति।

महर्षिणा पाणिनिनाऽपि स्वरूपं शब्दस्याऽशब्दसंज्ञा[1] इति सूत्रं विरच्य शब्दशास्त्रीयप्रक्रियां सम्पादयितुं ध्वन्यात्मकं व्यावहारिकमेव शब्दस्वरूपं समाश्रितम्। भगवान् पाणिनिरन्यदपि एकं शब्दस्वरूपं निर्दिदेश, तदस्ति शब्दानां तात्त्विकं शब्दस्वरूपम्। तात्त्विकमेतच्छब्दस्वरूपं भाषावैज्ञानिकमपि वक्तुं शक्यते। महभाष्ये - अस्त्यन्यत् स्वं शब्दस्येति किं पुनस्तत्? अर्थः[2] इति। पतञ्जलिरर्थपदेन तच्छब्दस्वरूपं व्याचष्टे यच्छब्दभावनारूपेण वक्तरि पूर्वत एव सन्तिष्ठते। भाषातात्त्विकमिदम् शब्दस्वरूपमेव स्फोटपदेन व्यह्रियते। यः ध्वनिसमुदायः कञ्चन अर्थप्रत्ययं जनयितुं समर्थः स एव शब्दपदव्यवहार्यो भवति। अर्थप्रत्ययानुत्पादकः केवलं श्रोतृगृहीतो ध्वनिः शब्दशास्त्रे शब्दपदाऽनर्हो भवति। अतोऽत्र द्विविधं नाम शब्दस्वरूपम् -

१. व्यावहारिकं शब्दस्वरूपम्।
२. भाषावैज्ञानिकं तात्त्विकं शब्दस्वरूपम्।

कस्मैचनापि शब्दशास्त्रिणे द्विविधमिदं शब्दस्वरूपमभिमतं भवति। शब्दपूर्णतायै द्विविधमपि आवश्यकं भवति। शब्दस्य स्वरूपद्वयमेतत् पाणिनीये तन्त्रे साकल्येन अभिमतं व्याख्यातञ्च। शब्दतत्त्वदृष्ट्या उभयमप्यत्र विविच्यते-

**व्यावहारिकं शब्दस्वरूपम् -**

सर्वैः लौकिकाः व्यवहाराः व्यावहारिकेण एव शब्दस्वरूपेण सम्पाद्यन्ते। तत्र शा-शपिभ्यां ददनाविति सूत्रेण[3] व्यवहारसाधनार्थे शब्दशब्दो निष्पाद्यते। अनया शब्दपदव्युत्पत्त्या

---

[1] अष्टाध्यायी, १-१-६८

[2] महाभाष्यम्, १-१-६८

[3] उणादिसूत्रम्, ४-९४

एतदनुमीयते यत् प्रारम्भिकी शब्दप्रवृत्तिः नामकरणात्मिका एव सम्बभूव। शपन्ति तेनेति शब्दः। संस्कृता वाक्[1] इति उणादिं व्याचक्षाणः दशपाद्युणादिवृत्तिकारः आह्वानकरणं शब्दं व्याचष्टे। अतो शपन्ति व्यपदिशन्ति आह्वयन्ति अनेन वाग्व्यापारेण स खलु शब्दः उच्यते। शप्यते आहूयते अनेन स शब्दोः नादः। शब्दशब्दस्य चेयं व्युत्पत्तिः परिभाषा वा शब्दस्य व्यावहारिकस्वरूपदृष्ट्या एव क्रियते। व्यवहारे प्रायः शब्दस्यान्तरिकं तात्त्विकं स्वरूपं नाऽनुभूयते। अत एव 'अथवा प्रतीतपदार्थको लोके ध्वनिः शब्दः इत्युच्यते, तस्माद् ध्वनिः शब्दः[2] इति पतञ्जलिना महाभाष्ये व्यावहारिकोऽयं चर्चितः शब्दः लोकप्रतीतिजनकः व्यवहारे ध्वनिसमुदायरूपः कण्ठतः प्रोक्तः। अत एव लोके ध्वनिं कुर्वन् बालक उच्यते शब्दकारी खल्वयं माणवकः इति। ध्वनिमेवाभिप्रेत्य चोच्यते शब्दं कुरु, मा शब्दं कार्षीरिति। अतः शब्दपदेन लोके प्रतीतिपदार्थको ध्वनिविशेषः शब्दो भवतीति विख्यातिरस्ति। एतेषामेव लोकविख्यातप्रतीतपदार्थकध्वनिरूपशब्दानामेव पाणिनीयशास्त्रेण अनुशासनं क्रियते। एतदेव- 'अथ शब्दानुशासनम्'[3] इति महाभाष्यकारपतञ्जलेरभिप्रायः। अत्रेदमवश्यं विज्ञेयं यत् नादे ध्वनिसमुदाये वा शब्दत्वव्यपदेशः उभयप्रकारकशब्दे अभेदबुद्ध्या एव क्रियते। प्रयोगदृष्ट्या हि शब्दानां व्यावहारिकं स्वरूपं समाश्रियते। शब्दस्य स्वरूपग्राहकः प्रयोग एव भवति। लौकिकप्रयोगं विना शब्दस्य रूपनिर्ग्रहः कथञ्चिदपि न भवतीति पतञ्जलिना कण्ठतः प्रोक्तम् 'रूपनिर्ग्रहश्च शब्दस्य नान्तरेण लौकिकप्रयोगम्'[4] इति। मीमांसादर्शनानुसारमाचार्य उपवर्षः शब्दस्येदं व्यावहारिकं शब्दस्वरूपमेवाऽभिप्रेत्य ध्वनीनां शब्दत्वं स्वीचकार। मीमांसासूत्रं व्याचक्षाणः शबरस्वामी आचार्योपवर्षमतमुल्लिलेख - 'अथ गौरित्यत्र कः शब्दः

---

[1] उणादिसूत्रम्, ४-४८

[2] महाभाष्यम्, पस्पशाह्निकम्

[3] तत्रैव

[4] महाभाष्यम्, १-१-२२, ६-४-१६

गकारौकारविसर्जनीयाः इति भगवानुपवर्षः'[1] इति। एतदनुसारमपि गौरित्यत्र गकारौकार विसर्जनीय ध्वनिसङ्घात एवास्ति शब्दः। बादरायणसूत्रं भाषमाणेन आचार्यशङ्करेणापि 'वर्णा एव तु शब्दाः इति भगवानुपवर्षः[2]' इत्युक्तम्। अतः भगवतः उपवर्षस्येदं निरुक्तं मतं वस्तुतः शब्दानां प्रायोगिकरूपमात्रं संलक्ष्यैव विद्यते। एतेनेदं निश्चितं जातं यत् ध्वनितः प्राक् स्फोटात्मकः यदि आन्तरः शब्दो न भवेत् तर्हि निश्चितार्थे निश्चितस्य ध्वन्यात्मकस्य शब्दस्योच्चारणमपि न सम्भवेदिति। शब्दव्यवहाराय लोके कण्ठताल्वाद्यभिघातेन प्रयुक्तो ध्वनिः शब्दभावनान्तरमेव प्रतिपत्तुः शाब्दप्रत्ययं जनयति। ध्वनिरूपशब्दं परिभाषमाणः पतञ्जलिः शब्दे तथ्यत्रयं निर्दिदेशः श्रौत्रोपलब्धिर्बुद्धिनिर्ग्राह्यः प्रयोगेणाभिज्वलितः आकाशदेशः[3] शब्द इति शब्दसाकल्यार्थं श्रोत्रोपलब्धित्वं बुद्धिनिर्ग्राह्यत्वं तथा प्रयोगेणाऽभिज्वलितत्त्वमेतत् त्रयमपि आवश्यकं भवति। व्यावहारिकशब्दस्वरूपस्य इमे एव त्रय आधाराः सन्ति तत्रादौ -

**१. श्रोत्रोपलब्धिः -**

श्रवणेन्द्रियेण भवति शब्दस्योपलब्धिः। शब्दस्य श्रोत्रमात्रविषयत्वात् श्रोत्रमन्तरा शब्दस्य उपलब्धिर्न भवति। शब्दस्य व्यावहारिकस्वरूपावगतये श्रोत्रेण शब्दप्रत्यक्षमावश्यकं भवति। कर्णशष्कुलीवर्ति आकाशमुच्यते श्रोत्रम्। आकाशं शब्दस्य आश्रय इति गौतमकणादादिभिः स्पष्टमुच्यते 'श्रोत्रग्रहणे योऽर्थः स शब्दः'[4]। वैशेषिकदर्शनानुसारं श्रोत्रेन्द्रियस्य विषयः शब्दः अर्थपदेनाप्यभिधीयते। अतः श्रोत्रस्य अर्थः शब्दः इत्यप्यवश्यं ज्ञातव्यं सुधीभिः।

---

[1] शा.भा. १-१-५

[2] तत्रैव, १-३-२८

[3] प्रत्याहाराह्निकं महाभाष्यम्

[4] वै.सू. २-२-२१

## २. बुद्धिनिर्ग्राह्यः -

कण्ठताल्वाद्यभिघातेन ध्वनयः क्रमशः उत्पद्यन्ते। उच्चारिताश्च पुनः ध्वनयः क्रमशो ध्वस्ताः भवन्ति एवञ्च एकत्र एकदा च ध्वनिसमुदाय उपलब्धुं न शक्यते। उच्चरितप्रध्वंसिशीलैः पूर्वपूर्वध्वनिभिः बुद्धौ तच्छब्दसंस्कारः संस्थाप्यते। सः क्रमप्राप्तः बौद्धः शब्दसंस्कारः एव अन्त्येन ध्वनिना अभिव्यक्तो भवति। इत्थं हि अन्त्यवर्णश्रवणानन्तरं बुद्ध्या व्यावहारिकं शब्दस्वरूपं सुविज्ञातं भवति इदमेव तथ्यं महाभाष्यप्रदीपव्याख्यायां कैयटो निजगाद - 'पूर्वपूर्वध्वन्युत्पादिताभिव्यक्तिजनितसंस्कारपरम्पराप्राप्तपरिपाकान्त्यबुद्धिनिर्ग्राह्य इत्यर्थः'[1] इति।

ध्वन्यात्मके नादे शब्दसंस्कारो वक्तृभावनाऽनुसारेण पूर्वतः एव सन्तिष्ठते। प्रतिपत्तुः शब्दग्रहणे शाब्दबोधे च एष शब्दसंस्कारो भवति आवश्यकः भर्तृहरिणापीदमेवोक्तम् -

**नादैराहितबीजायामन्त्येन ध्वनिना सह,**
**आवृत्तपरिपाकायां बुद्धौ शब्दोऽवधार्यते**[2]। इति।

## ३. प्रयोगेणाभिज्वलितः -

शब्दस्य श्रोत्रोपलब्धित्वं बुद्धिनिर्ग्राह्यता प्रयोगपदमत्र ध्वन्यर्थकम्। प्रयुज्यते इति प्रयोगो ध्वनिः, तेन अभिव्यक्तः इति महाभाष्ये स्पष्टम्। ध्वनिरेव भवति शब्दस्य व्यावहारिकत्वप्रयोजकम्। ध्वनिसमुदाय एव प्रतिपत्तुः शाब्दं प्रत्ययं जनयति। शब्दस्य प्रायोगिकं रूपं भवति ध्वनिः। महाभाष्ये पतञ्जलिः स्फोटलक्षणस्य शब्दस्य ध्वनिं गुणं स्माचष्ट- 'एवं तर्हि स्फोटः शब्दः ध्वनिः शब्दगुणः'[3] इति।

कस्यचनापि वस्तुतत्त्वस्योपकारको ग्राहको वा तद्गतो गुण एव भवति। ध्वनिना प्रकाशित एव शब्दः व्यक्तरूपग्रहणानुगुणैरुपायभूतैः अनुपाख्येयैः प्रत्ययैः स्वरूपं ग्राहयतीति

---

[1] प्रत्याहाराह्निकम्, म. भा., सू. १

[2] वाक्यपदीय-ब्रह्मकाण्ड-८४

[3] म.भा. १-१-७

स्पष्टं प्रत्यपादयत् भर्तृहरिः -

**प्रत्ययैरनुपाख्येयैः ग्रहणाऽनुगुणैस्तथा।**
**ध्वनिप्रकाशिते शब्दे स्वरूपमवधार्यते[1] ॥**

अतो अलब्धक्रमया वाचा प्रतिपत्रा कञ्चनाऽप्यर्थं नाधिगच्छतीति स्वोपज्ञहरिवृषभ-टीकायामुद्धृतम् -

**ज्ञेयेन न विना ज्ञानं व्यवहारेऽवतिष्ठते।**
**नाऽलब्धक्रमया वाचा कश्चिदर्थोऽभिधीयते[2] ॥**

अतः अ इ उ ण् इति सूत्रभाष्ये पतञ्जलेः निरुक्तं 'श्रोत्रोपलब्धिः बुद्धिनिर्ग्राह्यः प्रयोगेणाभिज्वलितः आकाशदेशः शब्दः इति शब्दस्वरूपं सिद्धान्तभूतमस्तीति सिद्धं जातम्। अथ शब्दानुशासनम् इति ब्रुवाणस्य पतञ्जलेः शब्दपदेन नादाख्यो व्यावहारिक एव शब्दोऽभिप्रेतः। शब्दशास्त्रीयप्रक्रियायां तस्यैवोपयोगसम्भवात्। ह्रस्व-दीर्घ-प्लुतोदात्तानुदात्त-स्वरितानुनासिक-निरनुनासिक-द्रुत-मध्यम-बिलम्बित-गुण-वृध्दयादिव्याकरणकार्याणि तत्रैव ध्वन्यात्मके शब्दे सम्भवति स्फोटे तु निरुक्तकार्याणि कथञ्चिदपि न सम्भवति। प्राकृत-वैकृतनादयोः कालभेद एव स्फोटलक्षणे अन्तःशब्दे आरोप्यते इति स्वयमेवाह भर्तृहरिः -

**स्वभावभेदान्नित्यत्वे ह्रस्वदीर्घप्लुतादिषु।**
**प्राकृतस्य ध्वनेः कालः शब्दस्येत्युपचर्यते[3] ॥**

वस्तुतस्तु अक्रमो भवति शब्द, क्रमजन्मा च भवति नादः। नादस्य क्रमजन्मत्वादेव शब्दः क्रमवान् भेदवान् वा दृश्यते-

---

1 वाक्यपदीय-ब्रह्मकाण्ड, ८३

2 तत्रैव, ८६

3 तत्रैव, ७६

**नादस्य क्रमजन्मत्वात् नाऽपूर्वो न परश्च सः।**
**अक्रमः क्रमरूपेण भेदावानिव जायते[1]॥**

एतत्तु सुस्पष्टमवधेयं यदेतच्छब्दस्वरूपे भेदपरिकल्पनं विचारसौकर्यार्थं प्रयोगदृष्ट्या एव आश्रितम्। सर्वात्मना अभिधायकस्तु शब्दः एक एव। अर्थावबोधने उभयस्यैव शक्तत्वात्। ध्वनिरहितस्य केवलस्य स्फोटस्य शब्दत्वव्यपदेशः केवलमौपचारिकः, शब्दानामर्थबोधनैकमात्रफलकत्वेन सुगमतया कार्त्स्न्येन तत्र तदभावात्।

अविचारिते अव्यक्तवर्णके रभसोच्चारिते केवले ध्वनौ शब्दत्वव्यपदेशोऽपि एतादृश एव। तेनाऽपि अर्थावबोधनाभावात्। क्वचित् एतादृशेन कस्यचिद् गृहीतशक्तिकस्य शाब्दबोधे सम्भवत्यपि किन्तु तत्र अनुशासनीयशब्दत्वं तु नास्ति। स्फोटस्य ध्वनेश्च पार्थक्येन ग्रहणं न सम्भवति। स्फोटरूपाभिन्नो ध्वनिः श्रोतृभिः गृह्यते-

**स्फोटरूपाऽविभागेन ध्वनेः ग्रहणमिष्यते'[2]**

भाषावैज्ञानिकदृष्ट्या प्रतीतपदार्थके ध्वनौ शब्दत्वं स्वीकुर्वाणस्य पतञ्जलेरपि अयमेवाशयः। पतञ्जलेरभिप्रायं स्पष्टयन् नागेशः प्रोवाच - 'लोके व्यवहर्तृषु पदार्थबोधकत्वेन प्रसिद्धः श्रोत्रेन्द्रियग्राह्यत्वात् वर्णरूपः ध्वनिसमूह एव शब्दः'[3] इति। एतदेव भवति प्रायोगिकं शब्दस्वरूपम्। व्यवहारे पदार्थावगतये लोकाः तदेव शब्दस्वरूपं स्वीकुर्वते।

वस्तुतस्तु शब्दाभिव्यक्तेः साधनमस्ति ध्वनिः। वक्तुः पूर्वनिश्चितं शब्दसंस्कारं प्रकटयति ध्वनिसंघातः। ध्वनितोऽतिरिक्तम् एकम् अन्यत्तात्त्विकं शब्दस्वरूपमस्ति। पाणिनीये तन्त्रे मौलिकरूपेण एतदुपवर्णितं यत् सम्प्रत्ययनिमित्तकः ध्वनिसमुदायो भवति वैज्ञानिकः शब्दः। येन उच्चारितेन शब्देन प्रतिपत्तुः अर्थप्रतिपत्तिर्भवति स एव शब्दः। गौरिति शब्दे गकारौकाराभ्यामन्योऽस्ति कश्चिद् शब्दस्य प्रयोजकः। अथ गौरित्यत्र शब्दमनुसन्दधानस्य

---

[1] वाक्यपदीय-ब्रह्मकाण्ड, ४८

[2] तत्रैव, ८१

[3] उद्योते, पस्पशाह्निके महाभाष्ये

पतञ्जलेरयमेवाऽभिप्रायः। 'येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां सम्प्रत्ययो भवति स शब्दः'[1] इति पतञ्जलेरुक्तं शब्दलक्षणं शब्दस्य स्फोटात्मकम् आन्तरिकं स्वरूपं संकेतयति।

शब्दानुशासनप्रयोजनकेऽस्मिन् पाणिनीये शब्दशास्त्रे शास्त्रीयसंज्ञां विहाय शब्दस्य स्वरूपं गृह्यते इति पाणिनिना स्वयमेव निर्देशः कृतः। तथाहि - स्वं रूपं शब्दस्याशब्दसंज्ञा[2] इति।

अग्नेर्ढक् इत्यादिविधिस्थलेषु अग्नि इति शब्दस्वरूपस्य तत्पर्यायाणां च ग्रहणे सम्प्राप्ते पाणिनिरयमाचार्यो नियमयति यत् अग्नीति आनुपूर्वीकस्य शब्दस्वरूपस्यैवात्र ग्रहणमुचितं नान्येस्येति। पाणिनिमते शब्दस्य स्वत्वद्वयमस्ति १) रूपम्, २) अर्थश्च। क्वचित् रूपस्य प्राधान्यमर्थस्य च गौणत्वम्। लोके व्यवहारसम्पादनाय अर्थकृतप्राधान्यमाश्रीयते इति भर्तृहरिरप्याह-

**लोकेऽर्थरूपता शब्दः प्रतिपन्नः प्रवर्तते।**
**शास्त्रे तूभयरूपत्वं प्रविभक्तं विवक्षया**[3] ॥ इति।

शब्दशास्त्रे तु प्रक्रिया निर्वाहार्थं निर्देशस्थले शब्दगतस्य रूपस्यैव प्राधान्यं भवति, अर्थस्तु तत्र गुणभूतः। अदर्शनं लोपः[4] इत्यत्र अदर्शनशब्दस्वरूपस्य तत्पर्यायाणाञ्च योऽर्थो लोके प्रसिद्ध अदर्शनशब्देन स एवाऽर्थोऽभिप्रेतः। ढगादिस्थले अग्निशब्दातिरिक्तस्य शब्दस्य व्यावृत्यर्थं पाणिनिना स्वीकृत एष नियमः। स्वं रूपं शब्दस्याऽशब्दसंज्ञेति सूत्रं भाषमाणः पतञ्जलिः शब्दगतं स्वत्वद्वयम् एतत् स्वीकुरुते - अस्त्यन्यद् रूपाद् स्वं शब्दस्येति। किं पुनस्तत्? अर्थः' इति। ढगादिस्थलेषु शब्दार्थस्य व्यावर्तनाय पाणिनिना सूत्रे रूपपदं गृहीतम्। अत्र सूत्रे पाणिनिना अभिप्रेतः शब्दगतोऽर्थः एवास्ति शब्दस्य वैज्ञानिकं स्वरूपं स्फोटात्मकम्।

---

1 पस्पशाह्निके महाभाष्यम्

2 अष्टाध्यायी, १-१-६८

3 वाक्यपदीय-वाक्यकाण्ड, १३३

4 अष्टाध्यायी १-१-६०

रूपपदेन च ध्वन्यात्मकं व्यावहारिकं प्रायोगिकं वा शब्दस्वरूपमभिप्रेतम्। रूपपदेनात्र व्यक्तिविशेषोच्चरितः ध्वनिविशेष एव नाऽभिप्रेतः, अपितु रूपशब्देन ह्यत्र शास्त्रे शुकसारिकापुरुषादिभिरुदीरितासु विभिन्नासु तत्तच्छब्दव्यक्तिषु समवेतमग्निशब्दादिकं सामान्यं गृह्यते।

पाणिनिना अग्नेर्ढगित्यादिषु या अग्निशब्दरूपा व्यक्तिरुच्चारिता तस्याः सर्वोच्चारणेषु अनुगता अग्निसामान्यरूपा आकृतिर्वाच्या भवति। सामान्यस्य कार्यायोगश्च व्यक्तिद्वारको भवतीति रीत्या व्यवहारः सम्पद्यते। यदि चात्र सामान्यं विहाय व्यक्तिरेव गृह्येत तदा व्यक्तीनामानन्त्यात् सर्वेषामग्न्यादिशब्दानामनुशासनकार्ये योगसम्भवः स्यात् यथा अनुकरणशब्दाः अर्थं जहति, ध्वन्यात्मकं स्वरूपञ्चादधते तथा अत्रापि शास्त्रे शब्दरूपं भवति असाधारणम्। अर्थस्तु साधारण एव शब्दान्तरैरपि तस्यार्थस्य प्रत्यायमानत्वात्। मात्राकलापो नाम अस्ति शब्दः। स एव च शब्दस्य रूपम्। एवञ्चात्र स्वरूपसूत्रे अर्थवतः शब्दस्य एकदेशः रूपवान् एव शब्दः अभ्युपगम्यते। अग्निसामान्ये अग्निविशेषे च स्वरूपे शक्तिमतः अग्निशब्दस्य एकदेशः रूपमात्रमिह शब्दस्वरूपशब्देन विवक्षितम्।

अर्थवदधातुरप्रत्ययः प्रातिपदिकमित्यत्र तु अर्थवदेव शब्दस्वरूपं गृह्यते। तत्र शब्दानां लोके प्रयोगार्हत्वस्य सम्पाद्यमानत्वात्। शब्दानाम् अर्थवच्छब्दस्वरूपस्य बोधनार्थं सम्बन्धग्रहोऽपेक्ष्यते, अनिर्ज्ञातसम्बन्धेन शब्देन अर्थज्ञानाऽसम्भवात्। शब्दस्य रूपप्रतीतौ तु श्रोत्रेण ध्वनेः सन्निकर्षोऽपेक्ष्यते। शब्दस्य यद् रूपद्वयं वर्तते तच्छब्दस्वरूपग्राहकेण येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां सम्प्रत्ययो भवति स शब्दः इति पतञ्जलिवाक्येन सुस्पष्टं समर्थ्यते। येनोच्चारितेनेति कथनेन मात्राकलापरूपा शब्दस्याकृतिः विवक्षिता। संप्रत्ययो भवतीति वाक्यांशेन स्फोटात्मकोऽर्थो विवक्षितः। शब्दार्थयोर्नित्यसम्बन्धात् पार्थक्येन एतज्ज्ञातुं सुकरं न भवति। शब्दानुशासनार्थकेनानेन व्याकरणेन वाचमवच्छेद्य एतज्ज्ञातुं सुकरं भवति अत एवाह भर्तृहरिः - **'तत्त्वावबोधः शब्दानां नास्ति व्याकरणादृते'**[1] इति।

[1] वाक्यपदीय-ब्रह्मकाण्ड-१३

वैयाकरणशिरोमणिः ख्यातनामा भाषाशास्त्री भर्तृहरिः अपि शब्दस्य स्वरूपद्वयमेतत् सुस्पष्टमुपावर्णयत्। ध्वन्यात्मकस्य शब्दस्योच्चारणात् प्राक् प्रवक्तुः मनसि विवक्षारूपा शब्दभावना अनिवार्या भवति। शब्दभावनां विना प्राणवायोरूर्ध्वसमीकरणं कण्ठताल्वाद्य-भिघातश्च कथञ्चिदपि न सम्भवति। शब्दभावना एव वक्तारं नियते व्यक्ते अर्थाभिधायके च शब्दे प्रयोजयति। अत आह भर्तृहरिः -

**आद्यः करणविन्यासः प्राणस्योर्ध्वं समीकरणम्।**
**स्थानानामभिघातश्च न विना शब्दभावनाम्[1] ॥**

एतयोः परस्परमभेदोपचारात् साङ्कर्यं जायते। एनयोः पार्थक्येन ज्ञानं शास्त्रविदामपि श्रमसाध्यं भवति। यथा घटमह जानामीति प्रतिपत्तौ कम्बुग्रीवादिमदर्थबोधे ज्ञानस्वरूपं च सांकर्येण सन्तिष्ठेते तथा श्रुते शब्देऽपि शब्दभावानारूपोऽर्थः शब्दस्वरूपं च सन्तिष्ठेते।

**आत्मरूपं यथा ज्ञाने ज्ञेयरूपञ्च गृह्यते।**
**अर्थरूपं तथा शब्दे स्वरूपञ्च प्रकाशते[2] ॥**

ज्ञातो मया घटः इति बोधे एतत् सुस्पष्टं प्रतीयते। आचार्यः भर्तृहरिः शब्दभावनात्मकमिमं शब्दं ध्वनिरूपस्य शब्दस्य निमित्तमिति व्याचष्ट। ध्वनिरूपश्च शब्दः श्रोतृभिः वाचकत्वेन गृह्यते -

**द्वावुपादानशब्देषु शब्दौ शब्दविदो विदुः।**
**एको निमित्तं शब्दानामपरोऽर्थे प्रयुज्यते[3] ॥**

आन्तरोऽयं व्यक्तो जातो वागात्मा एव स्वस्य रूपस्य अभिव्यक्तये करणादिसंयोगात् लोके प्रसिद्धरूपेण शब्दत्वेन परिवर्तते -

---

[1] वाक्यपदीय-ब्रह्मकाण्ड, १२२

[2] तत्रैव, ५०

[3] तत्रैव, ४४

**अथाऽयमान्तरो जातः सूक्ष्मो वागात्मनि स्थितः।**
**व्यक्तये स्वस्य रूपस्य शब्दत्वेन विवर्तते[1] ॥**

वक्त्रा वक्ष्यमाणशब्दस्य स्वरूपावधारणम् अर्थसन्निवेशश्च उच्चारणात् प्रागेव भवति। ध्वनिः केवलमनुग्राहयति पूर्ववितर्कितम् -

**वितर्कितः पुरा बुद्ध्या क्वचिदर्थे निवेशितः।**
**करणेभ्यो विवृत्तेन ध्वनिना सोऽनुगृह्यते[2] ॥**

ध्वनेः शब्दोपकारकत्वादेव पतञ्जलिराचार्यः ध्वनिं शब्दगुणमिति व्याचष्ट- 'एवं तर्हि स्फोटः शब्दः, ध्वनिः शब्दगुणः[3] शब्दप्रादुर्भावे बुद्धेः मनसः प्राणस्य आस्यावयवानाञ्च योगः अतीवानिवार्यः भवति। बुद्धियोगाद् मनोयोगाच्च वागर्थवती भवति। प्राणयोगात् करणयोगात् च वाग् ध्वनिरूपा व्यक्ता भवति। देशभेदात् शब्दस्वरूपं त्रिविधं भवति एतच्च शब्दस्य स्थितित्रयमित्यपि वक्तुं शक्यते। पश्यन्ती विद्यते बुद्धिस्था, मध्यमा च प्राणस्था, वैखरी भवति करणस्था। पश्यन्त्यां ज्ञानमात्रस्यैवानुगमात् तस्याः बुद्धिस्थत्वं स्वीक्रियते। यथा अरणिस्थं तेजो भवति प्रकाशान्तरहेतुः तथा बुद्धिस्थः शब्दः वैखरीवाचः निमित्तं भवति –

**अरणिस्थं यथा ज्योतिः प्रकाशान्तरकारणम्।**
**तद्वच्छब्दोऽपि बुद्धिस्थः श्रुतीनां कारणं पृथक्[4] ॥**

मध्यमायां बुद्ध्या साकं प्राणवायुरपि गतिमायाति। अतो मध्यमा प्राणस्था इत्युच्यते। वैखर्यां प्राणवायुः तत्तत्करणेषु आहतः ध्वनिः भूत्वा श्रावणः सञ्जायते । अस्मात् कारणात् वैखरी करणस्था इत्यभिधीयते। एतत्समुदितस्यैव शब्दत्वम् अभिप्रेत्य पतञ्जलिराचार्यः अथ शब्दानुशासनमित्यत्र शब्दपदं प्रयुङ्क्ते।

---

[1] वाक्यपदीय-ब्रह्मकाण्ड, ११२

[2] तत्रैव, ४७

[3] महाभाष्यम्, १-१-७०

[4] वाक्यपदीय-ब्रह्मकाण्ड, ४७

शब्दस्वरूपमवधारयता एतदपि विचिन्त्यं यत् शब्दस्य प्रयोजनद्वयं भवति, तत्र प्रथमं ज्ञानम् द्वितीयं प्रयोगः इति । ज्ञानमस्ति स्फोटरूपम्। प्रयोगश्च धन्यात्मकः। एकः पूर्वपरयो[1] रिति सूत्रं भाषमाणः पतञ्जलिः शब्दज्ञानं शब्दप्रयोगञ्च अभीप्सितफलप्रदं व्याचष्ट। तथाहि ' शब्दस्यापि ज्ञाने प्रयोगे च प्रयोजनमुक्तम् किम्? एकः शब्दः सम्यग् ज्ञातः शास्त्रान्वितः सुप्रयुक्तः स्वर्गे लोके च कामधुग् भवति'[2] इति।

शब्दस्वरूपप्रसङ्गादत्र एतदप्यवधेयम्, प्रयोगेणाभिज्वलितः श्रावणः शब्दः अनुशासनदृष्ट्या द्विविधः भवति। व्युत्पन्नोऽव्युत्पन्नश्चेति तत्र व्युत्पन्नः शब्दः एकेषामाचार्याणां मते स्वीक्रियते। अव्युत्पन्नश्च अपरेषां मते। व्याडिना उभयपक्षेऽपि अर्थस्य वाचकः शब्दो व्याख्यातः तथाहि - 'वाचकः उपादानः शब्दव्युत्पत्तिकर्मणि प्रयोजकम्' इति स्वोपज्ञहरिवृषभवृत्तौ संग्रहनाम्ना धृतोऽयं गद्यांशः[3] अर्थाऽभिधानाऽर्थे शब्दस्योभयविधमपि स्वरूपमावश्यकं भवति। अन्तः शब्दो बौद्धो भवति। बाह्यश्च शब्दो ध्वन्यात्मकः। बौद्धस्य शब्दस्य ध्वनिरस्ति वाहनभूतः । ध्वनिना श्रोता अन्तःशब्दं गृह्णाति। उत्पन्ने ध्वनौ अन्तःशब्दः श्रोत्रेण ग्राह्यो भवति। यथा प्रकाशः जन्मानन्तरमेव अर्थप्रत्यायको जायते।

**वितर्कितः पुरा बुद्ध्या क्वचिदर्थे निवेशितः।**
**करणेभ्यो विवृत्तेन ध्वनिना सोऽनुगृह्यते**[4] ॥ इति।

अर्थं सम्प्रत्याययितुं प्रवक्तारः प्रत्येतुं च श्रोतारः शब्देषु प्रवर्तन्ते। सततम् अर्थगत्यर्थं हि शब्दं स्वीकुर्वते वैयाकरणाः। अत एव निरर्थकेषु नाम शब्देषु नैव वैयाकरणाः सम्प्रवर्तन्ते। शब्दश्रवणोत्तरकालं यमर्थं प्रत्येति तस्य शब्दस्य स एवार्थ इति भर्तृहरिणा स्पष्टमुक्तम् -

---

[1] अष्टाध्यायी, ६-१-८४

[2] म. भा. ६-१-८४

[3] वाक्यपदीय-ब्रह्मकाण्ड, ४४

[4] तत्रैव, ४७

**यस्मिन् तूच्चरिते शब्दे यदा योऽर्थ प्रतीयते।**
**तमाहुरर्थं तस्यैव नान्यदर्थस्य लक्षणम्[1] ॥**

वक्तृश्रोतृबुद्धिद्वयमध्यगा व्यवसायात्मिका भवति वाग्। अर्थप्रत्यायने वक्तुः अन्तिमो व्यवसायः श्रोतुश्च प्रारम्भिको व्यवसायः शब्दात्मको भवति। भर्तृहरिः वक्तुः बुद्धेः प्रवृत्तिं प्राक् शब्देषु यथा स्वीकुरुते गृहीतॄणां व्यवसायमपि तथैव शब्देष्वेव सङ्गिरते।

**यथा प्रयोक्तुः प्राग् बुद्धिः शब्देष्वेव प्रवर्तते।**
**व्यवसायो ग्रहीतॄणामेवं तेष्वेव जायते[2] ॥**

पतञ्जलिराचार्यो वागर्थौ अभिन्नौ मनुते, अर्थो हि वाचामन्तरङ्गभूता शक्तिः विद्यते। अबहिर्भूता हि शब्दार्थ इति मनुते पतञ्जलिः -

'शब्दश्च शब्दाद् बहिर्भूतः अर्थोऽबहिर्भूतः'[3]। श्रुतेन शब्देनैकेन तत्त्वद्वयमवगम्यते इति स्वं रूपं शब्दस्याऽशब्दसंज्ञा इति सूत्रं भाषमाणः पतञ्जलिः प्रत्यपादयत्- 'अस्त्यन्यद् रूपात् स्वं शब्दस्येति। किं पुनस्तत्? अर्थः। शब्देनोच्चारितेनार्थो गम्यते गामानय, दध्यशानेति। अर्थः आनीयते, अर्थश्च भुज्यते,। सोऽमर्थः तात्विकदृष्ट्या द्वैविध्यं भजते - मुख्यः गौणश्च। तत्रादौ -

**१- मुख्यार्थः -**

लौकिकप्रवृत्या निवृत्त्या च शब्दानां सार्थक्यं निश्चीयते इति रीत्या सर्वोऽपि सार्थकः शब्दः स्वकीयं यत्किञ्चित् प्रवृत्तिनिमित्तमाधत्ते। यत् प्रवृत्तिनिमित्तमाश्रित्य यदा यः शब्दो लोके प्रवृत्तः यदि स शब्दः तदेवाऽभिदध्यात्तदा सोऽर्थो मुख्यः परिगण्यते -

**शब्दस्योच्चारणे स्वार्थः प्रसिद्धो यस्य गम्यते।**
**स मुख्य इति विज्ञेयो रूपमात्रनिबन्धनः[4] ॥**

---

[1] वाक्यपदीय-ब्रह्मकाण्ड, ३२९

[2] तत्रैव, ५४

[3] महाभाष्यम्, १-१-६६

[4] वाक्यपदीय-ब्रह्मकाण्ड, २६७

शब्दस्य अनेकविधं प्रवृत्तिनिमित्तं सम्भवति। गौरिति पदं जातिलक्षणं प्रवृत्तिनिमित्तमभिधत्ते। शुक्ल इति पदं गुणलक्षणम्, पाचक इति पदं क्रियालक्षणं राजपुरुष इति पदं सम्बन्धलक्षणम्, डित्थ डवित्थ इति पदञ्च स्वरूपलक्षणं प्रवृत्तिनिमित्तमभिलक्ष्य प्रयुज्यते । एतदेव च शब्दानां स्वार्थोऽप्युच्यते ।

**२- गौणोऽर्थः -**

यत् प्रवृत्तिनिमित्तमाश्रित्य यः शब्दः प्रवृत्तः स शब्दस्य मुख्योऽर्थः। स एव मुख्यः शब्दाऽभिधेयो यदा अर्थान्तरे समारोपितस्तदा स गौणोऽर्थ उच्यते। अत एवाह पतञ्जलिः। अर्थस्त्वर्थान्तरे समारोपितो यदा शब्दप्रवृत्तिनिमित्तं भवति तदा गौणव्यवहारः'[1] इति अर्थप्रकरणाद्यपेक्षोऽयं गौणार्थः शब्दान्तरैः सह युक्तो भवति। अत एवाह भर्तृहरिः -

**अर्थप्रकरणापेक्षो यो वा शब्दान्तरैः सह ।**
**युक्तः प्रत्ययात्यर्थं तं गौणमपरे विदुः[2] ॥**

शब्दो यदा स्वप्रवृत्तिनिमित्ताच्च्युतः अर्थान्तराभिधानाय प्रकरणादिकमपेक्षते तदा प्रकरणादिना अवगतोऽर्थो गौणः। लक्ष्यार्थो व्यङ्ग्यार्थश्चोभावेव गौणो अर्थौ भवतः। गौणे ह्यर्थे मुख्यार्थसम्बन्ध आवश्यको भवति। अत एवाह पतञ्जलिः शब्दो न कदाचित् मुख्यार्थपरित्यागेनार्थन्तरे प्रवर्तते'[3] इति मुख्यार्थो गौणार्थस्य निमित्तं भवतीति भर्तृहरिणाऽपि प्रतिपादितम् -

**स्वार्थे प्रवर्तमानस्य यस्यार्थे योऽवलम्बते।**
**निमित्तं तत्र मुख्यं स्याद् निमित्ती गौण इष्यते[4] ॥**

---

[1] महाभाष्यम्, ८-३-८२

[2] वाक्यपदीय-ब्रह्मकाण्ड, २६४

[3] महाभाष्यम्, ८-३-८२

[4] वाक्यपदीय-ब्रह्मकाण्ड, २६५

एवञ्च केषाञ्चिन्मते गौणमुख्यार्थयोः निमित्तनिमित्तिभावः सम्बन्धः सन्तिष्ठते 'गोत्वानुषङ्गी वाहीके निमित्तात् कैश्चिदिष्यते' इति वाक्यपदीयस्य वाक्यकाण्डे भर्तृहरिः। मुख्यार्थे गौणार्थे च कार्यसम्प्रत्यये समुपस्थिते सति प्राधान्यात् मुख्यार्थे एव कार्यव्यवस्था सम्पाद्यते- 'गौणमुख्ययोः मुख्ये सम्प्रतिपत्तिः'[1] इति पतञ्जलिः। गौरनुबन्ध्यः इत्यत्र मुख्यार्थः सास्नादिमदर्थः एव अनुबन्ध्यते न तु बाहीकः। अतः अतस्मिन्नर्थे तदर्थस्य सम्प्रतिपत्तिः एव खलु गौणः अर्थः सम्प्रतीयते। चतुर्भिः प्रकारैः च अतस्मिन्नर्थे तदर्थस्य अवगतिः दृश्यते- 'चतुर्भिः प्रकारैरतस्मिन् स इत्येतद् भवति'[2] इति पतञ्जलिः। एते चत्वारः प्रकाराः सन्ति यथा-

१) तात्स्थ्यात्, २) ताद्धर्म्यात्, ३) तत्साहचर्यात्, ४) तत्सामीप्यात्।

**१) तात्स्थ्यात् -**

मञ्चाः क्रोशन्ति, गिरिः दह्यते इत्यादौ मञ्चस्य क्रोशनाऽसम्भवात् मञ्चशब्दः स्थानविशेषरूपं स्वप्रवृत्तिनिमित्तं परित्यज्य मञ्चस्थं पुरुषविशेषम् अर्थम् आह। गिरेश्च दहनाऽसम्भवात् गिरिशब्दः गिरिस्थं द्रव्यविशेषमर्थमाह। वक्तुस्तत्रैव तात्पर्यात्। अत्र मञ्चशब्दः मञ्चास्थार्थे तथा गिरिशब्दः गिरिस्थद्रव्ये आरोप्यते।

**२) ताद्धर्म्यात् -**

जटिलं यान्तं यज्ञदत्तम् इत्याह इत्यत्र जटिले यज्ञदत्तव्यपदेशः समारोप्यते । यज्ञदत्ते यानि कार्याणि तानि जटिनि अपि दृश्यन्ते अतो जटी यज्ञदत्त इत्युच्यते।

**३) तत्साहचर्यात् -**

'यष्टीः प्रवेशय इत्यत्र यष्टीनां प्रवेशासम्भवेऽपि वक्तुः तात्पर्यानुपपत्तेः यष्टिशब्दः स्वप्रवृत्तिनिमित्तं परित्यज्य यष्टिसाहचर्यात् यष्टिधरान् अभिधत्ते।

---

1 महाभाष्यम्, ८-३-८२

2 तत्रैव, ८-३-८२

**४) तत्सामीप्यात् -**

'गङ्गायां घोषः' इत्यत्र गङ्गापदं भगीरथखातावच्छिन्नं प्रवाहस्थलविशेषं स्वाभिधेयं प्रवृत्तिनिमित्तं पर्यत्यजत्। गंगायां घोषावस्थानाऽसम्भवात्। अतो गंगापदमत्र गंगासमीपस्थं तटविशेषमर्थं व्यनक्ति। अतो यथा शब्दोऽनुशास्यते तथैवार्थोऽपि अनुशासनीयः। भर्तृहरिणा व्याकरणेन अनुशासनीयस्य अर्थस्य द्वैविध्यमुपस्थापितम्, अपोद्धारपदार्थः स्थितलक्षणार्थश्चेति। शास्त्रीयव्यवहाराऽनुपाती अपोद्धारपदार्थो व्याकरणस्य अनुशासनीयोऽर्थो विद्यते। अपोद्ध्रियते वाक्यार्थेभ्यः पृथक् क्रियते इति अपोद्धारपदं व्युत्पाद्यते। प्रकृत्यर्थः प्रत्ययार्थश्च अपोद्धारपदार्थेन अभिप्रेतः। अयं च शास्त्रीयोऽर्थः लोके व्यवहारविषयो न भवति। अन्वयव्यतिरेकाभ्यां प्रकृत्या प्रकृत्यर्थः प्रत्ययेन च प्रत्ययार्थः अवगम्यते। द्वितीयोऽर्थः स्थितलक्षणः। तेन स्थितलक्षणेन वाक्यार्थो विवक्षितः। तथाहि- 'स्थितलक्षणस्तु वाक्यरूपोपग्रहः कल्पितोद्देशविभागः विशिष्टः एकः क्रियात्मा विच्छिन्नपदार्थग्रहणोपायप्रतिपाद्यः'[1] इति। स्थितलक्षणादेव अर्थात् अपोद्धारपदार्थरूपः विच्छिन्नार्थः प्रविभज्यते। पदानि सामान्यमर्थं प्रतिपादयन्ति, मिलित्वा च विशेषम्। पतञ्जलिमते सामान्येऽर्थे वर्तमानानां पदानां विशेषेऽर्थे यदवस्थानं तत् वाक्यार्थो विवक्षितः। पदार्थः कदापि स्थितलक्षणार्थो न भवति, तस्य वाक्यार्थे तिरोधानात्। स्थिरस्वरूपकस्य अर्थस्यैव स्थितलक्षणार्थत्वस्वीकारात्। वाक्यार्थस्तु न क्वापि तिरोदधातीति वाक्यार्थस्यैव स्थितलक्षणार्थत्वम् एतत् सर्वं वाक्यपदीये सुस्पष्टं दरीदृश्यते।

❑❑❑

[1] स्वोपज्ञहरिवृषभटीका, ब्रह्मकाण्ड, वाक्यपदीयम्

**महस्विनी – विद्वत्समीक्षिता सन्दर्भिता च शोधपत्रिका (ISSN: 2231-0452)**
**कुसुमम् :** जनवरी – डिसेम्बर २०२१ **सम्पुटम् :** संयुक्तम् (१,२)

# नामि (अ.६.४.३) इति सूत्रार्थविमर्शः

**डा.शिवरामभट्टः***

इदं सूत्रम् अष्टाध्याय्याः षष्ठाध्याये चतुर्थपादस्य तृतीयं सूत्रम्। नामीति नाम्शब्दस्य सप्तमीविभक्तौ एकवचने रूपम्। आम् इति षष्ठीविभक्तिप्रत्ययस्य नुडागमसहितं प्रातिपदिकं नाम् इति। अङ्गस्य इत्यधिकारे इदं सूत्रं वर्तते। ढ्रलोपे पूर्वस्य दीर्घोऽणः इति सूत्रात् दीर्घ इत्यनुवर्तते। दीर्घश्रुत्या अचश्च इति परिभाषोपतिष्ठते। तेन अङ्गं विशेष्यते। येन विधिस्तदन्तस्य इति तदन्तविधौ अजन्ताङ्गस्य इत्यर्थो भवति। नामीति परसप्तमी। एवं च सूत्रार्थो भवति नामि परे अजन्ताङ्गस्य दीर्घः स्यादिति। बालानाम् इत्यादीनि उदाहरणानि।

ननु नुडागमे परे अनेन दीर्घविधानात् नामीत्यस्य स्थाने नुटीत्येव सूत्रमस्तु[1]। यतः अचश्चेति सूत्रात् षष्ठ्यन्ताच्पदोपस्थित्या अचो दीर्घः स्यान्नुटीति सूत्रार्थो भवति। ततः बालानाम् इत्यादौ दीर्घः सिद्ध्यति खलु इति चेत् अनश्वः इत्यादौ अचः अकारात् परत्वेन नुटो दीर्घापत्तिः इति न च वाच्यम्। यतः तस्मान्नुडचीत्यस्य स्थाने तस्मान्नुगचि इति न्यासेन नुग्विधानेनादोषात्। तथापि ङमो ह्रस्वादचि ङमुण्णित्यम् इति सूत्रेण अनश्व इत्यादौ ङमुडागमप्रसक्तिः इति चेत् नवीनमते उञि च पदे इत्यतः पदे इत्यनुवर्त्य अजादेः पदस्य ङमुडित्यर्थात् प्रकृते उत्तरपदत्वे चापदादिविधौ इति वार्तिकेन प्रत्ययलक्षणनिषेधेन अश्वस्य पदत्वाभावेन ङमुटः अप्रवृत्तेः।

ननु सन्नच्युतः इत्यादौ नोपधायाः इति दीर्घापत्तिरिति न वक्तव्यम्। यतः दीर्घे संयोगान्तलोपस्य असिद्धत्वेन ङमो ह्रस्वादचि इति ङमुटः विधानेन वा नोपधादीर्घः इति समाधानम्। पुनश्च तस्मान्नुडचीति करणे अनश्वशब्दात् आचारक्विबन्तात्क्त्वाप्रत्यये उदितो वा

---

* सहाचार्यः, अनुसन्धानप्रकाशनविभागः, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः।

[1] बालमनोरमाव्याख्या

इतीड्विकल्पानापत्तिरिति न वक्तव्यम्। यत: नुटीत्यस्य अङ्गाधिकारीयत्वेन अङ्गेन प्रत्ययस्याक्षेपात् अजन्ताङ्गस्य दीर्घ: स्यान्नुडादौ प्रत्यये इत्यर्थेन उक्तलक्ष्येषु नुडादिप्रत्यय-परत्वाभावेनादोषात्। अस्यापत्यम् इ:, न इ: अनिरित्यत्र नादिप्रत्ययसत्त्वेऽपि अङ्गत्वाभावान्न दोष:। तथापि अक्षण्वन्त: इत्यत्र नलोपस्यासिद्धत्वेन नान्ताङ्गत्वसत्त्वात् नोपधाया इति दीर्घापत्तिरिति न वक्तव्यम्। अनो नुडिति करणेन अदोषात् । आचारक्विबन्तात् त्त्वाप्रत्यये इड्विकल्पार्थमुदित्करणमिति न वक्तव्यम्। यत: ह्रस्वनद्यापो नुडिति सूत्रस्थभाष्यप्रामाण्येन हलन्तेभ्य आचारक्विपोऽनभिधानेनादोषादिति चेन्न। भृञ: किन्नुट्चेत्यौणादिकसूत्रेण भृञ: गनि प्रत्यये नुडागमे दीर्घापत्ते:।

वस्तुतस्तु शमे: ख: शङ्ख: इत्यत्र आयनेयीनीयिय इतीनादेशमाशङ्क्य प्रातिपदिकविज्ञानाच्च भगवत: पणिने: सिद्धमिति भाष्यादुणादिष्वव्युत्पत्तिपक्षस्यैव भाष्यसम्मततया नात्र दोष इति नुटीति न्यासे दूषणं चिन्त्यम्।[1] तथा च अयामन्तेति सूत्रारम्भात् व्युत्पत्तिपक्षस्यापि आकरसम्मततया दोष इति न वक्तव्यम्। यत: अयामन्तेति सूत्रस्य शाकटायनरीत्या सत्त्वादेकपक्षेण निर्वाहे पक्षान्तरेण दोषदानस्यौचित्याच्चेति समाधानम्।

ननु नामि इत्यस्य स्थाने नीति सूत्रमस्तु नकारे परे अच: दीर्घ: इति तदर्थ:। तथा चेत् अङ्गना इत्यत्र दीर्घापत्तिरिति न वक्तव्यम् । यत: विनञ्भ्यामित्यत्र ञकारोच्चारणेन तद्धिते नीति दीर्घो नेति कल्पनेनादोषात्। तथा च सुनोति पुनातीत्यादौ दीर्घापत्ति: खलु इति न च वाच्यम्। यत: प्वादीनां ह्रस्व इति ह्रस्वविधानसामर्थ्यात् विकरणे दीर्घो नेति सामान्यापेक्षज्ञापनेनादोषात्।

---

[1] पाणिनिव्याकरणे वादरत्नम्

ननु नामि इत्यस्य स्थाने विति इति सूत्रमस्तु। उः इत् अस्मिन् स वित्। विति परे अजन्ताङ्गस्य दीर्घः स्यादिति तदर्थः। देवदत्तः दीव्यति, तत्र भवानित्यादौ दोषः नास्ति। यतः देवदत्तादेः वित्प्रत्ययनिरूपिताङ्गत्वाभावात्। तथा च राम इत्यत्र वित्सुप्रत्ययनिरूपिताङ्गत्वसत्त्वात् दीर्घापत्तिरिति न वक्तव्यम्। यतः प्रत्यय इति निर्देशेन सुस्थाने सेर्विधानेन पथिमथी-त्याकारविधानेन सौ वितीत्यस्यापवृत्तिकल्पनेन चादोषात्। तर्हि अर्थवत् इत्यत्र दीर्घः स्यात् खलु इति चेत् अर्थवत्, अनद्यतने इत्यादिनिर्देशैः विति तद्धिते दीर्घाभावकल्पनेनादोषात्। यत्तु मतुपः स्थाने मतिब्विधानान्न दोष इति वदन्ति तन्न। यतः धनवानित्यादौ उगिदचामिति नुमनापत्तेः।

विति इति नुटि इति च न्यासे वित्प्रत्ययत्वस्य नुडादिप्रत्ययत्वस्य च सुप्त्वव्याप्य-त्वाभावेन नलोपस्यासिद्धत्वाभावात् पञ्चानामित्यत्र नोपधाया इति दीर्घानापत्तिः।[1] तर्हि विति नुटि आभ्यामेव दीर्घो भविष्यति इति तदपि मास्तु इति न वक्तव्यम्। नृनयशब्दयोः समासे आचारक्विबन्तात् कर्तरि क्विपि अल्लोपयलोपयोः नुन् तस्य यशब्देन समासे नलोपे आचारक्विबन्तात् कर्तरि क्विपि अल्लोपयलोपयोः नलोपः सुप्स्वरेति नलोपस्यासिद्धत्वात् तुकः अभावे आमि नृ आम् इति स्थिते आम्त्वस्य कास्प्रत्ययस्यादिति सूत्रविहितस्यापि सत्त्वेन सुप्त्वव्याप्यत्वाभावात् नलोपासिद्धत्वाभावेन नुटि नाम्त्वस्य सुप्त्वव्याप्यत्वेन नलोपासिद्धत्वात् नृ च इति दीर्घाभावे नोपधाया इति दीर्घे नृणाम् इति एकं रूपमिदानीं वित्प्रत्ययत्वस्य नुडादिप्रत्ययत्वस्य च सुप्त्वव्याप्यत्वाभावेन नलोपस्यासिद्धत्वाभावात् नृ चेति वैकल्पिक-दीर्घापत्तिः स्यात्। नुडागमे अल्लोपस्य स्थानिवत्त्वं तु न पञ्चमीसमासस्य अनित्यत्वात्। क्वौ लुप्तं न स्थानिवदिति निषेधाच्च। नलोपसुबित्यस्य सुब्वृत्तिविषयताप्रयोजकविधावित्यर्थकरणे तु दण्डीयतेः क्विपि दण्डियावित्यत्रेयङि कर्तव्ये नलोपस्यासिद्धत्वेन इयङनापत्तिरिति भावः।

---

[1] पाणिनिव्याकरणे वादरत्नम्

सम्प्रति विचार: क्रियते यत् नामीत्यत्र न इति लुप्तषष्ठ्यन्तं पृथक्पदं तथा च नान्तस्याङ्गस्य अच: दीर्घ: स्यादामीति सूत्रार्थ:। ह्रस्वनद्यापो नुट् इत्यनेन नुगेव विधीयताम् । येन नाव्यवधानमिति न्यायेन एकवर्णव्यवधानं सोढव्यम् इति । तथा सति रामाणाम् इत्यत्र अल्लोपोऽन: इति लोपापत्ति: इति न वक्तव्यम्। यत: ब्रुव: पञ्चानामिति सन्निपातपरिभाषया वा तदप्रवृत्ते:। एवं च पञ्चानामित्यत्र अनेनैव दीर्घे नोपधाया इदं सूत्रं न कार्यं बहुवचने झल्येदिति सूत्रे झल्ग्रहणं च न कार्यमदन्ताङ्गत्वाभावादेव एत्वाप्राप्ते:। तथा च झल्ग्रहणभावे हरीणामित्यत्र नुकश्चारितार्थ्येन रामाणामित्यत्र नुकं बाधित्वा परत्वादेत्वं स्यादिति न वक्तव्यम्। यत: उतो वृद्धिरिति सूत्राद् हल: अनुवर्तनेन अदोषात्।

एवं नामीति सूत्रस्याङ्गाधिकारे पाठाभावेऽप्यचो दीर्घ: स्यान्नामीत्यर्थेन सिद्धे अङ्गाधिकारे पाठ: किमर्थ:। तथा सति चर्मणामित्यादौ दीर्घापत्तिरपि न भवेदिति न वक्तव्यम्। यत: अर्थवद्ग्रहणपरिभाषया अस्य नाम: अनर्थकत्वेन अग्रहणेन अदोषात्। तथा च नामयतीति नाम्, चर्मण: नाम् चर्मनाम् इत्यत्र दीर्घापत्ति: खलु इति न वक्तव्यम्। यत: प्रत्ययाप्रत्यययो: प्रत्ययस्यैव ग्रहणमिति परिभाषया अस्य शब्दस्य अग्रहणेन दोषो नास्ति इति न वक्तव्यम्। यतो हि अतो भिस ऐस् इति सूत्रे अङ्गग्रहणासम्बन्धे ब्रह्मणभिस्सा इत्यादौ भिस ऐसापत्तिप्रदर्शनपरभाष्येणास्मिन् प्रकरणे अर्थवत्परिभाषाया: प्रत्ययाप्रत्यययो: इति परिभाषायाश्च अप्रवृत्तिकल्पनेन चर्मणाम् इत्यत्र दीर्घापत्ते: दोषत्वात्।

नामि इत्यस्य स्थाने आमीतिकरणे चर्मणामित्यत्र दीर्घापत्ति: भाष्ये उक्ता यदि नकारोच्चारणाभावे चर्मणामित्यत्र दीर्घापत्ति: तर्हि अङ्गाधिकारे पाठ: किमर्थ:, यद्यङ्गाधिकारे पाठाभावे दीर्घस्तर्हि नकारोच्चारणं किमर्थमिति नकारोच्चारणाङ्गाधिकारपाठसामर्थ्येन अत्र दीर्घाभावसिद्धौ अङ्गाधिकारे पाठो व्यर्थ इति न वक्तव्यम्। चर्मणो नाम् चर्मनाम् इत्यत्रैव दीर्घापत्ते: शेखरकृत्तात्पर्यविषयत्वात् चर्मणाम् इति पाठस्तु लेखकप्रमादात् इति बोध्यम्।

यदि नामि इत्यत्र अचश्चेति परिभाषानुपस्थितिस्तर्हि को दोष इति जिज्ञासायाम् उच्यते चर्मणाम् इत्यत्र अलोऽन्त्यपरिभाषोपस्थितौ रेफस्यैव दीर्घापत्तिरिति दोष:। पुनश्च

नामीत्यस्य स्थाने आमीत्येव भवतु। तथा च रामाणामित्यत्र नित्यत्वात् प्रथमं दीर्घे ह्रस्वान्तत्वाभावात् नुड् न स्यात्। न च येन नाऽप्राप्तन्यायेन नुटो दीर्घापवादतया अदोष इति वक्तुं न शक्यते। आमीत्यस्यापि येन नाऽप्राप्तिन्यायेन नुटोऽपवादत्वेन परस्परमपवाद्यापवादक-भावसत्त्वेन नित्यत्वस्यैव बलवत्त्वनियामकतया दोषादिति। ह्रस्वनद्यापो नुडिति सूत्रे ह्रस्वग्रहणसामर्थ्येन भूतपूर्वह्रस्वान्तत्वमादाय नुट् सिद्ध्यति। तथा च पूर्वं दीर्घेऽपि पञ्चमीसमासेन स्थानिवत्त्वान्नुट् स्यादेवेति उभयोर्नित्यतया परत्वान्नुटि ततो दीर्घे इष्टसिद्ध्या भूतपूर्वगत्याश्रयणं व्यर्थमिति चेदुच्यते – पूर्वस्मादव्यवहितपरस्यैव विधौ स्थानिवत्त्वप्रवृत्तेः प्रकृते भूतपूर्वगत्याश्रयणम् आवश्यकमिति समाधानम्। एवं च हे गौरित्याद्यर्थं पञ्चमीसमासानित्यत्वाश्रयणमपि न कार्यमिति ध्येयम्। नृ च इति दीर्घविकल्पे दीर्घाभावपक्षे नृणामित्यर्थं ह्रस्वग्रहणं चरितार्थमिति वक्तुं न शक्यते। यतः ह्रस्वग्रहणस्य नृशब्दमात्र-विषयकत्वे नृनद्याप इत्येव वदेत्। अतो ह्रस्वग्रहणस्य सामर्थ्यादिति वक्तव्यमेवेति भावः। तथा चेत् नृशब्दात् आचारक्विबन्तात् कर्तरि क्विपि नृतामित्यत्र यदागमपरिभाषया नृनद्याप इति न्यासे दीर्घापत्तिः ह्रस्वग्रहणसत्त्वे तु न इति न वक्तव्यम् । यतः गोतो णिदितिवत् नृन्नद्याप इति न्यासे सूपपन्नम्। नृनद्याप्साहचर्येण नृशब्दस्य अजन्तस्यैव ग्रहणत् न दोष इति समाधानं तु न युक्तम्। नृशब्दस्य ऋशब्देन सह समासे नृशब्दे नुडापत्तितादवस्थ्यात् ।

तर्हि तिसृणामित्यत्र न तिसृचतसृ इति दीर्घस्य निषिद्धतया नुडर्थं ह्रस्वग्रहणमिति न वक्तव्यम् । यतः षड्चतुर्भ्यश्च इत्यत्र त्रेरित्यनुवृत्त्या नुड्विद्ध्या ह्रस्वग्रहणस्य वैयर्थ्यं तदवस्थमेव। एवं चेत्तर्हि एतीति इत्, त्रयाणामित् त्रीत्, तस्मादामि त्रीतामित्यत्र, त्रिशब्दादाचारक्विबन्तात् कर्तरि क्विपि तुकि त्रितामित्यत्र च अवयवावयवन्यायेन यदागमपरिभाषया वा नुडापत्तिः ह्रस्वग्रहणसत्त्वे तु न। किं च ह्रस्वग्रहणसत्त्वे त्रि आम् इति स्थिते नुटं बाधित्वा प्रतिपदोक्तत्वात् त्रयादेशे आमीति दीर्घे त्रयामिति भवति। त्रिशब्दानुवृत्तौ उभयोः प्रतिपदोक्तत्वाविशेषात् त्रयादेशे दीर्घे नुटि त्रयाणामिति स्यादिति फलभेदः इति वक्तुं न शक्यते। यतः षड्चतुरसाहचर्येण अकारान्ततकारान्तभिन्नस्यैव त्रिशब्दस्य ग्रहणं क्रियते।

अन्ये तु नृत्रिशब्दयो: फलभेदवारणाय स्त्रियां चतुर:, षट्नद्याप:, नुर्वा, छन्दसि च इति न्यासं कृत्वा द्वितीययोगे चतुर इत्यस्य अनुवृत्तिं भिन्नलिङ्गार्थां प्रथमयोगे च त्रिशब्दानुवृत्तिं तक्रन्यायेन दीर्घबाधनार्थां कृत्वा नुटा दीर्घे बाधिते न तिसृचतसृ इति सूत्रमपि खण्डयन्त: तृतीययोगं नृणामित्यत्र नुड्विकल्पार्थं चतुर्थयोगं पूर्वसूत्राद्वा इत्यनुवर्त्य धातृशब्दान्नुटो विकल्पार्थं वदन्ति ।[1]

**निष्कर्ष:** - वस्तुतस्तु अङ्गधिकारे नामि नोपधाया: इत्यनयो: पाठस्य चर्मणामित्यत्र दीर्घाभाव एव प्रयोजनं यदि नकारग्रहणाभावे दीर्घ: स्यात्तर्हि अङ्गाधिकारे पाठो व्यर्थ: स्यादत: षट्संज्ञकातिरिक्तनान्तस्य न दीर्घ इति कल्पनया चर्मणामित्यत्र दीर्घाभावे सिद्धे नामीत्यस्य स्थाने आमीति करणे न किमपि बाधकमिति ध्येयम्। भाष्ये तावत् नामि दीर्घ आमि चेत्स्यात्कृते दीर्घे न नुड्भवेत्। वचनाद्यत्र तन्नास्ति नोपधायाश्च चर्मणाम्॥[2] इति वार्तिकात् नामीति उत्तरार्थमिति भाव: ।

## आधारग्रन्थसूची

१) लघुशब्देन्दुशेखर: - नागेशभट्ट:, व्या. - श्रीपादसत्यनारायणमूर्ति:, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपति:, २००५
२) लघुशब्देन्दुशेखर: - नागेशभट्ट:, सं. बालशास्त्री, चौखम्भासुरभारतीप्रकाशनम्, वाराणसी, २०१३
३) व्याकरणमहाभाष्यम् - पतञ्जलि:, सं. भार्गवशास्त्री, चौखम्भासंस्कृतप्रतिष्ठानम्, वाराणसी, २००४
४) प्रौढमनोरमा - भट्टोजिदीक्षित:, चौखम्भा-अमरभारतीप्रकाशनम्, वाराणसी, १९८३
५) पाणिनिव्याकरणे वादरत्नम् - सूर्यनारायणशुक्ल:, चौखम्भासंस्कृतसीरीस, वाराणसी, १९४९
६) वैयाकरणसिद्धान्तकौमुदी - भट्टोजिदीक्षित:, सं. श्रीगिरिधरशर्मा, मोतीलालबनारसीदास, वाराणसी, १९९७

❑❑❑

[1] पाणिनिव्याकरणे वादरत्नम्

[2] प्रकृतसूत्रभाष्यम्

~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

# लिङ्गमविवक्षितम्

**डा. ओ.गुरुप्रसाद कल्याण शास्त्री***

"**अथ हेत्वाभासाः तत्त्वनिर्णयविजयप्रयोजकत्वान्निरूप्यन्ते**"[1] इत्यादिना उपाध्यायैः त्रीणि लक्षणानि प्रोक्तानि। तदुत्तरं सव्यभिचारादिदोषविशेषलक्षणानि प्रोक्तानि। तत्र **अनुमितिकारणीभूताभावप्रतियोगियथार्थज्ञानविषयत्वम्**[2] प्रथमहेत्वाभासलक्षणम्। **ह्रदो वह्निमान् धूमात्** इत्यत्र अनुमितिः ह्रदो वह्निमान् इत्याकारिका, तत्कारणीभूताभावः "ह्रदो वह्न्यभाववान्" इत्याकारकबाधनिश्चयाभावः (प्रतिबन्धकसंसर्गाभावस्य कार्यसामान्यं प्रति कारणत्वनियमात्) तत्प्रतियोगि यत् यथार्थज्ञानं - ह्रदो वह्न्यभाववान् इत्याकारकं, तद्विषयत्वं वह्न्यभाववद्ध्रदे बाधे अस्तीति लक्षणसमन्वयः।

लक्षणेऽस्मिन् "**यथार्थ**"पदस्य वैयर्थ्यं भवेदिति तल्लक्षणं न युक्तम्। उक्तं च दीधितौ– "अथ विशिष्टविषयकज्ञानं प्रतिबन्धकं तद्घटकञ्च न विशिष्टमिति चेत्तर्हि यथार्थेति व्यर्थम्"[3]। अस्य दीधितिग्रन्थस्यायमाशयः – अनुमितिकारणीभूताभावप्रतियोगिज्ञानविषयत्वम् इत्यस्यैव लक्षणत्वे **पर्वतो वह्निमान् धूमात्** इत्यत्र अनुमितिकारणीभूताभावः – "पर्वतो वह्न्यभाववान्" इति बाधभ्रमाभावः, तत्प्रतियोगि यत् ज्ञानं - पर्वतो वह्न्यभाववान् इति भ्रमज्ञानम्, तद्विषयत्वस्य वह्न्यभावे पर्वतो च सत्वेन बाधभ्रमैकदेशेऽतिप्रसङ्गः यथार्थपदोपादाने तु पर्वतो वह्न्यभाववान् इत्यस्य भ्रमत्वेन यथार्थत्वाभावात् नैकदेशे अतिप्रसङ्गः। परन्तु यथार्थपदोपादानेऽपि **ह्रदो वह्निमान्धूमात्** इत्यत्र अनुमितिकारणीभूतः यः ह्रदो वह्न्याभाववान्

---

* सहाचार्यः, न्यायविभागः, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः।

[1] सामान्यनिरुक्तिचिन्तामणिः, पृ.सं.1580

[2] तत्रैव

[3] सामान्यनिरुक्तिदीधितिः, पृ.सं.87
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

इत्याकारकबाधनिश्चयाभावः, तत्प्रतियोगि यत् यथार्थज्ञानं - ह्रदो वह्न्यभाववान् इत्याकारकं ज्ञानम्, तद्विषयत्वस्य वह्न्यभावे ह्रदे च सत्वेन दोषैकदेशेऽतिप्रसङ्गः। यदि च यद्रूपावच्छिन्नविषयता प्रकृतानुमितिप्रतिबन्धकतानतिरिक्तवृत्ति तद्रूपावच्छिन्नत्वम् इति लक्षणं पूर्वोक्तदोषवारणाय परिष्क्रियते, तदा वह्न्यभाववद्ध्रदरूपबाधादिघटकसाध्याद्येकदेशविषयतायाः प्रकृतानुमितिप्रतिवन्धकतातिरिक्तवृत्तित्वेन नैकदेशेऽतिव्याप्तिः, तर्हि तुल्यरीत्या सद्धेतुस्थलेऽपि भ्रमविषयसाध्याभावाद्येकदेशविषयतायाः प्रत्येकं प्रकृतानुमितिप्रतिवन्धकतानतिरिक्तवृत्तित्वाभावेन साध्याभावादौ अतिप्रसङ्गविरहात् यथार्थपदं व्यर्थमेव।

तस्मात् प्रथमलक्षणं त्यक्त्वा द्वितीयलक्षणमारब्धम्, तच्च**यद्विषयकत्वेन लिङ्गज्ञानस्यानुमितिप्रतिबन्धकत्वं तत्वम्**[1]। यः विषयो यत्रेति यद्विषयकम्, तस्य भावो यद्विषयकत्वम्, तेन यद्विषयकत्वेन। लिङ्गस्य ज्ञानमिति षष्ठीतत्पुरुषसमासः, षष्ठ्यर्थः विषयत्वम्, लिङ्गविषयकज्ञानमित्यर्थः। लिङ्गज्ञानस्य इत्यत्र षष्ठ्यर्थः निष्ठत्वम्, तस्य यद्विषयकत्वेऽन्वयः। यद्विषयकत्येनेत्यत्र तृतीयार्थोऽवच्छेदकत्वम्, तस्यापि यद्विषयकत्वेऽन्वयः। अनुमितेः प्रतिबन्धकमनुमितिप्रतिबन्धकम्, अनुमितिप्रतिबन्धकस्य भावोऽनुमितिप्रतिबन्धकत्वम्, अनुमितिनिष्ठप्रतिबध्यतानिरूपितप्रतिबन्धकत्वमित्यर्थः। तस्य तृतीयार्थाऽवच्छेदकत्वेऽन्वयः। अनुमितिपदं च समूहालंबनानुमितिपरम्[2]। यद्विषयकत्वं च यन्निष्ठविषयतानिरूपितविषयित्वम्। तथा च लिङ्गज्ञाननिष्ठयन्निष्ठविषयतानिरूपितविषयित्वं प्रकृतानुमितिप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकं तत्त्वं हेत्वाभाससामान्यलक्षणम्। धूमवान् वह्नेरित्यत्र धूमाभाववद्वृत्तिवह्निरूपव्यभिचारे लक्षणसमन्वयः। तथाहि– धूमाभाववद्वृत्तिवह्निः इत्याकारकलिङ्गविषयकज्ञाननिष्ठा या धूमाभाववद्वृत्तिवह्निनिष्ठविषयतानिरूपितविषयिता, सा प्रकृतानुमितिप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदिका भवतीति तत्वस्यधूमाभाववद्वृत्तिवह्निरूपदोषे सत्त्वात् इति। **ह्रदो वह्निमान्धूमात्** इत्यत्र बाधे तर्हि कथं समन्वयः यतः बाधनिश्चयस्य

---

[1] तत्त्वचिन्तामणिः, पृ.सं.1580

[2] साध्यव्याप्यहेतुमान् पक्षः साध्यवान् इत्याकारकानुमितिपरं वा – सामान्यनिरुक्तिदीधितिः,पृ.सं.34

लिङ्गाविषयकत्वात् इति चेत् तत्र "ह्रदो वह्न्यभाववान्, धूमश्च" इति समूहालम्बनज्ञानमादाय समन्वयः कार्यः, तथाहि यद्विषयकत्वेन – वह्न्यभाववद्ध्रदविषयकत्वेन, लिङ्गज्ञानस्य - ह्रदो वह्न्यभाववान्, धूमश्च इति समूहालम्बनज्ञानस्य, ह्रदो वह्निमान् वह्निव्याप्यधूमवांश्च इत्याकारकसमूहालम्बनानुमितिप्रतिबन्धकत्वम् वर्तते, तत्त्वं वह्न्यभाववद्ध्रदे बाधे अस्तीति।

नन्वत्र यद्विषयकत्वेन ज्ञानस्यानुमितिप्रतिबन्धकत्वं तत्त्वस्यैव सम्यक्त्वे अलं लिङ्गपदनिवेशनेन इति चेत् – सत्यम्, दीधितिकृतामयमेवाभिप्रायः, तमेवाभिप्रायं स्फुटीकर्तुं तैः लिङ्गमविवक्षितम्[1] इति व्याख्यातम्। "लिङ्गांशनिवेशस्य निष्प्रयोजनकतया तस्याऽविवक्षितत्वमाह – लिङ्गमिति"[2] इति अस्य दीधितिग्रन्थस्य भट्टाचार्यव्याख्या । तथा च लिङ्गं निष्प्रयोजनकत्वात् अविवक्षितम् इत्यर्थः फलितः। अविवक्षितत्वं नाम अर्थबोधजनकत्वप्रकारकमूलकृदिच्छाविषयत्वाभावः, कलाविलासव्याख्यायाम् ईषदधिकं विवरणं दत्तं - अविवक्षितत्वं अर्थविषयकबोधजनकत्वनिष्ठप्रकारतानिरूपितग्रन्थकारीयेच्छा-विषयतावद् यद् यद् तदन्यत्वरूपम्[3]। निष्प्रयोजनकत्वञ्चफलाभावप्रयुक्तेच्छाविषयत्वाभावः इति तु गङ्गायाम्।[4]

तर्हि मूलोक्तलिङ्गपदमुन्मत्तप्रलपितमेवकिम्? लिङ्गपदस्य स्वज्ञानविषयप्रकृत-हेतुतावच्छेदकवत्त्वसम्बन्धेन दोषवत्त्वलाभार्थकतया सार्थकतेति नोन्मत्तप्रलपितत्वम्। किन्तु दोषनिवारकत्वेन तन्निवेशप्रयोजनं नास्तीत्यभिप्रायेण दीधितिकृता विवक्षाराहित्यरूपं निष्प्रयोजनकत्वमुपपादितम्। क्वचित्पुस्तकेषु अनतिप्रयोजनकतया इत्यपि दृश्यते[5]। अनतिप्रयोजनकत्वम् इच्छाधीनेच्छाविषयताशून्यत्वम्[6]। प्रथमेच्छा – अव्याप्त्यतिव्याप्त्यसम्भव-

---

[1] सामान्यनिरुक्ति-दीधितिः, पृ.सं.105
[2] सामान्यनिरुक्ति-गादाधरी, पृ.सं.105
[3] सामान्यनिरुक्ति-कलाविलासः, पृ.सं.87
[4] सामान्यनिरुक्ति-गङ्गा, पृ.सं.103
[5] सामान्यनिरुक्तिविवेचनी, पृ.सं.41
[6] सामान्यनिरुक्ति-बलदेवी, पृ.सं.145

रूपदोषनिवारणेच्छा, तदधीनेच्छा – विशेषणनिवेशेच्छा, तच्छून्यत्वं लिङ्गांशे वर्तत इति तत्रानतिप्रयोजनकत्वं सङ्गच्छते। अतिव्याप्त्यादिदोषवारणरूपप्रयोजनं नास्तीति तस्य अनतिप्रयोजनकत्वाभिधानम्, न तु वैयर्थ्यम्, अखण्डाभावघटकतया तस्य सार्थक्यसम्भवात्।

**अत्रायं प्रश्नः** - लिङ्गाद् ज्ञानं लिङ्गज्ञानमिति व्युत्पत्तिः स्वीक्रियते, पञ्चम्यर्थः जन्यत्वम्, लिङ्गजन्यज्ञानम् – अनुमितिः, एवं च लिङ्गज्ञानपदेनाऽनुमितेः लाभात् "यद्विषयकानुमितित्वव्यापकं प्रकृताऽनुमितिप्रतिबन्धकत्वं तत्त्वमितिलक्षणं पर्यवस्यति, एवं च लक्षणस्थज्ञानपदे अनाहार्यत्वसंशयान्यत्वयोर्निवेशोऽनावश्यकः, परोक्षज्ञाने आहार्यत्वसंशयत्वयोरभावात्। अनुमितेः परोक्षज्ञानत्वेन स्वत एव तत्राहार्यत्वसंशयत्वयोः व्युदासात्, इत्थं च उक्तविशेषणद्वयानिवेशप्रयुक्तलाघवरूपस्य महाप्रयोजनस्य सत्त्वेऽनतिप्रयोजनकत्वकथनं ग्रन्थकृतामसङ्गतमिति। **अत्र समाधानम्** – तथा सति घटोऽवृत्तिरित्यादौ घटावच्छिन्नरूपबाधेऽव्याप्तिः, वृत्तित्वाभाववद्घटः इत्यनुमितिं प्रति केवलस्य घटवत् (घटे वृत्तित्वावगाहि) इति निश्चयस्य विरोधित्वमस्ति, यद्रूपावच्छिन्नविषयताशाल्यनुमितित्वमित्यत्र यद्रूपपदेन घटवत्त्वस्य ग्रहणं न संभवति, निर्धर्मितावच्छेदककानुमितेरनङ्गीकाराद् घटवत्त्वावच्छिन्नविषयताशाल्यनुमितेरेवाप्रसिद्धत्वेन लक्षणे अनुमितित्वप्रवेशो न साधीयान् इति।

न च तत्र घटवद्भूतलम् इत्यनुमितिमादायैव लक्षणसमन्वयसम्भवात् कुतोऽव्याप्तिरिति वाच्यम्, यतः घटवद्भूतलत्त्वावच्छिन्नविषयताशाल्यनुमितेः सधर्मितावच्छेदककतया तद्घटकीभूतघटवत्त्वांशस्य वृत्तित्वाभाववद्घटः इत्यनुमितिविरोधित्वमस्ति इति । नच जातिमान् वह्न्यभाववान् इति ज्ञानमादाय सर्वत्रासंभववारणाय सिद्धान्ते अव्यापकीभूतविषयताशून्यत्वनिवेशस्यावश्यकतया[1] अस्मिन्नपि कल्पे तन्निवेशस्य कर्तव्यतया यद्रूपपदेन घटवत्त्वस्य ग्रहणे घटवत्त्वावच्छिन्नविषयत्वाव्यापकीभूतविषयता भूतलत्वावच्छिन्नविषयता, तच्छून्यत्वस्य भूतलं घटवत् इत्यनुमितौ विरहात् न तादृशानुमितिमादाय लक्षणसमन्वयसम्भवात् इति बाधे

[1] सामान्यनिरुक्तिगादाधरी, पृ.सं.131

अव्याप्तितादवस्थ्यम्। घटो घटवानित्यनुमितिमादायैव लक्षणसमन्वयसम्भवात्, तादृशानुमिति-विषयतायाः सर्वस्यापि घटत्वावच्छिन्नविषयताव्यापकत्वात्।

नच तत्रापि घटांशे घटत्वस्य सामानाधिकरण्येन भानात् तद्विषयतैवाऽव्यापिकेति वाच्यम्। अयमाशयः – "घटो घटवान्" इति ज्ञाने घटे घटवत्त्वं केन रूपेण? अवच्छेदकावच्छेदेन आहोस्वित् सामानाधिकरण्यमात्रेण, नाद्यः – अवच्छेदकावच्छेदेन यत्रानुमितिः तत्र संसर्गतया व्यापकत्वभानस्य सिद्धान्तितत्वात् पक्षतावच्छेदकीभूत-घटत्वव्यापकत्वं घटे भासते इत्यङ्गीकर्तव्यम्, तच्च न संभवति, घटे घटत्वव्यापकत्वस्य बाधितत्वात्। द्वितीयपक्षस्य सम्यक्त्वेऽपि तादृशसामानाधिकरण्यविषयतायाः घटावच्छिन्नरूप-बाधेऽवर्तमानत्वेन घटवत्त्वावच्छिन्नविषयत्वाव्यापकीभूतविषयतासामानाधिकरण्यविषयता, तच्छून्यत्वस्य घटो घटवान् इत्यनुमितौ विरहात् न तादृशानुमितिमादाय लक्षणसमन्वयसम्भवात् पुनः बाधे अव्याप्तितादवस्थ्यम्।

यद्रूपावच्छिन्नविषयताव्यापकत्वं प्रतिबन्धकत्वे वक्तव्यं तद्रूपावच्छिन्नविषयता-व्यापकत्वस्य न लक्षणे प्रवेशः, किन्तु किञ्चिद्रूपावच्छिन्नविषयत्वाऽव्यापकत्वस्यैव[1], तथा च तादृशविषयताशून्ययद्रूपावच्छिन्नविषयताशालिज्ञाननिष्ठभेदप्रतियोगितावच्छेदकत्वं नास्तीति प्रतीतिसिद्धाभाव एव प्रतिबन्धकतायां निवेश्यते, ह्रदो वह्निमानित्यादौ तादृशं रूपं वह्न्यभाववद्ध्रदत्वमेव। प्रकृते किञ्चिद्रूपपदेन घटवद्भूतलत्वं ग्राह्यम्, घटवद्भूतलत्वावच्छिन्न-विषयत्वाव्यापकविषयताशून्यघटावच्छिन्नविषयताशालिभूतलं घटवदित्यनुमितिनिष्ठभेदप्रति-योगितावच्छेदकत्वं नास्तीति प्रतीतिसिद्धाभावमादायैव लक्षणसमन्वयादिति कुतो अव्याप्तिरिति चेत् ?

महानसीयवह्नीतरवह्न्यभाववत्पर्वतो वह्न्यभाववानित्यत्र वह्निमत्महानसीयवह्नीतर-वह्न्यभाववत्पर्वतरूपबाधेऽव्याप्तिः, तत्र पक्षे इतरबाधसहकृतपरामर्शात् तदव्यवहितोत्तर-जायमाना अनुमितिः नियमेन विशेषानुमितिरेव, निरूपितं चेदं तत्त्वं

[1] सामान्यनिरुक्तिविवेचनी, पृ.सं.42

~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

"प्रकृतहेतुकत्व"विशेषणसार्थक्यकथनावसरे विवेचन्यादिषु[1]। प्रकृते इतरबाधसहकृत-परामर्शाव्यवहितोत्तरजायमाना अनुमितिः पर्वतोमहानसीयवह्न्यभाववान् इति विशेषानुमितिरेव, महानसीयत्वावच्छिन्नविषयतायाः वह्निमत्पर्वतत्वावच्छिन्नविषयत्वाव्यापकत्वात्, तच्छून्यत्वस्य अनुमितौ विरहात् । न च महानसीयवह्निमान् पर्वत इति बाधनिश्चयकालीनानुमितिमादाय तत्र लक्षणसंगतिस्तत्काले बाधनिश्चयस्य अनुमितौ महानसीयत्वांशभाने विरोधात्, शुद्धवह्नेरेवानुमितौ भानादिति वाच्यम्। यादृशस्थले एकविशेषतरबाधस्य पक्षतावच्छेदकता, दोषाऽनुमितेः प्राक् महानसीयवह्निविषयकबाधनिश्चयः न वर्तते, तत्र एतत्कल्परीत्या दोषः वज्रलेपायते, अतः न लिङ्गांशस्य विवक्षा। यद्वा यादृशदोषविशेषानुमितिरेव न प्रसिद्धा, तत्र च तादृशानुमितिद्वयघटितलक्षणसम्भवात् लिङ्गांशाविवक्षणादिति। यादृशस्थलविशेषे दोषविषयकं ज्ञानं प्रत्यक्षात्मकम् अनुमित्यन्यविषयकं वा नियमेन भवति तत्रत्यदोषेऽव्याप्तिस्स्यादेव अतो न लिङ्गांशस्य विवक्षेति दिक् ।

## उपयुक्तग्रन्थसूची

1. अनुमानगादाधरी (द्वितीयभागः), चौखम्बा संस्कृत सिरीज आफीस, वाराणसी
2. सामान्यनिरुक्तिः – विमलप्रभा-बलदेवीसहिता, मिथिलाविद्यापीठग्रन्थमाला
3. सामान्यनिरुक्तिः – गङ्गाव्याख्यासहिता, चौखम्भा संस्कृत भवन, 2007
4. सामान्यनिरुक्तिविवेचनी – केन्द्रीयसंस्कृतविद्यापीठम्, तिरुपतिः, 1987
5. सामान्यनिरुक्तिप्रकरणम् – (दीधिति–गादाधरी-चन्द्रकला–कलाविलाससहितम्), श्रीसाधुबेला आश्रम, 249 बदैनी, बनारस

❑❑❑

[1] सामान्यनिरुक्तिविवेचनी, पृ. सं. 2
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

महस्विनी – विद्वत्समीक्षिता सन्दर्भिता च शोधपत्रिका (ISSN: 2231-0452)
कुसुमम् : जनवरी – डिसेम्बर २०२१ सम्पुटम् : संयुक्तम् (१,२)

# Daśāvatāra theory in the Gītagovinda : A Cultural Study

**Dr. Pratap Chandra Tripathy***

**Key Notes :** *Gītagovinda,* monumental work, Odishi music and dance, Jayadeva, Society, culture of Odisha, ten incarnations of Viṣṇu, Puranic Literature, *daśāvatāra carita, Prāci valley* near Kenduli, the native of Śrī Jayadeva, ancient Odisha, *daśāvatāra kṣetra, khurdhā itihāsa,* Lord kṛṣṇa as Creator, *avatāravāda, daśāvatāra-stuti*, Buddha as a synonym of viṣṇu, *vaiṣṇava-saṁpradāya agni-Purāṇa, Jagamohan* at Puri temple, *Khaṇḍuāpāṭa,* common prayer, modern age, daśāvatāra painting, temple walls, natural character of the people of Odisha.

## 0. Introduction :

Odisha witnessed the panorama of different religious scenes which contributed substantially to enrich her culture. *Gīta Govinda (GG),* the single monumental work of celebrated poet Jayadeva is a high water mark in the realm of devotional poetry. This immortal lyric occupies a unique place in the world literature. It is a valuable gem in the treasure of art and culture that as much as forty commentaries and a good number of immitations of this have been composed in India. As a product of Odishan culture, *GG* is the source model of Odisi music and dance. It is sung with dance performance all over India. No single literary work after *Bhāgavata* (Bha) has exercised such wide ranging influences on Indian literature and culture as the *GG.*

An attempt is made here to present the theory of *Daśāvatāra* as developed in the *GG* of poet Śrī Jayadeva and its cultural effect on the society so far.

---

* HoD, Sanskrit, Maa Tarini (Degree) Mahavidyalaya, Panikoili, Jajpur, Odisha.

## 1. Origin and development of the theory :

The *daśāvatāra-stuti* (hymn to the ten incarnations of God Viṣṇu) founded in the first canto of the *GG* is very significant from different points. This popular song of *GG* having an universal appeal to the Hindus made its author better known to the common people than the famous Sanskrit scholars of India. In His incarnations, Viṣṇu manifests Himself in different forms. But Jayadeva's *Daśāvatāra-stuti* has popularised Kṛṣṇa's incarnation which has a significant impact on the culture and religious traditions of India in general and Odisha in particular.

### 1.1 *Daśāvatāra* theory in Pre-Jayadeva Period:

The theory of *Daśāvtāra* was not the creation of poet Jayadeva but was known throughout India long before his days. The incarnations have been described in many celebrated works like the *Mahābhārata*[1], *Bhāgavata*[2] and *Agnipurāṇa*[3] etc. Though '*kalkī'* is accepted as an incarnation in the *Mahābhārata* but Buddha is not admitted as an *avatāra* of Lord Viṣṇu among the ten. But by the time of *Purāṇic* literature Buddha had been accepted as an *avatāra* of Lord Viṣṇu. The order and name of incarnations as found in the *Bhāgavatapurāṇa, Varāhapurāṇa* and *Agnipurāṇa* was accepted by *Saṁkarācārya* as such.

---

1 हंसकूर्मश्च मत्स्यश्च प्रादुर्भूतो द्विजोत्तम।
वराह नरसिंहश्च वामनो राम एव च
रामो दाशरथिश्चैव सात्वत: कल्किरेव च।। (महाभारतम्- 12.3.26)

2 नम: कारणमस्त्याय प्रलयाब्धिचराय च।
हयशीष्णो नमस्तुभ्यं मधुकैटभमृत्यवे।।
X X X
नमो बुद्धाय शुद्धाय दैत्यदानवमोहिने।
म्लेच्छप्रायक्षत्रहन्त्रे नमस्ते कल्किरूपिणे।। (श्रीमद्भागवतम्- X. 40.17-22)

3 अग्निपुराणम्, अध्यायः – 2, 3, 4, 5, 12, 16

Some scholars like P.C. Bagchi say that the *Vaiṣṇava-saṁradāya* probably made a contribution to the systematisation of the theory of *Daśāvatāra*[1]. But the inscription (8th C.A.D.) on the lintel above the figure of Samkara Narayan in the rock-cut verandah of the Varaha Perumal temple of Mahabalipuram contains the well known *purāṇic* verse on the ten incarnations of *Viṣṇu* as follows:

मत्स्य कूर्म वराहः नरसिंहश्च वामन: ।
रामो रामश्च रामश्च बुद्धः कल्कि च ते दश।।

In the above verse the first *Rāma* refers to *Paraśurāma,* the second denotes to *Dāśarathi Rāma* and the third to *Balarāma.* By this time Buddha had been accepted as an incarnation of Lord *Viṣṇu.* The *Viṣṇusahasranāma* includes Buddha as a synonym of *Viṣṇu.*[2]

In the field of classical Sanskrit literature of the pre-Jayadeva period the first *'Daśāvatāra-stotram'* written by the great *Saṁkarācārya* popularised the invocation of the ten incarnations of *Viṣṇu.* Here Kṛṣṇa has been involed as eighth *avatāra. Saṁkarācārya* doesn't accept *Balarāma* as an incarnation. *Kṣemendra,* the great Sanskrit poet of Kashmir (1030-1080 A.D.) has followed the *Daśāvatāra-stuti* of *Saṁkara*. In the second verse of his poem *'Daśāvatāra-carita',* poet *Kṣemendra* first mentions the name of the ten incarnations which follows the description of all the incarnations in ten verses[3] . *Daśāvatāra-stuti* of *Śrīharṣa* is the longest one in Sanskrit literature.[4] Nala, the hero of the famous *Naiṣadhīyacarita* has offered prayer to them, the ten incarnations

---

1 History of Bengal, Dacca University, p.403

2 Viṣṇusahasranāma, Gita Press, Gorakhpur, Verse-40

3 मत्स्य: कूर्मो वराह: पुरुषहरिवपु: वामनो जामदग्न्यः ।
काकुस्थ: कंसहन्ता स च सुगतमुनि: कल्कि नामा च विष्णु: ।। (दशावतारचरित– 2)

4 Naiṣadhāīyacarita, Canto-21, Verse-55-92

of *Viṣṇu.* Here *Kṛṣṇa* and *Balarāma* have been accepted as a single one and *kalkī* as the tenth incarnation.[1] Odishan poet *Śrīharṣa* flourished before a few years of Śrī Jayadeva and it is assumed that Jayadeva's *Daśāvatāra* must have been influenced by poet *Śrīharṣa.*

**1.2 *Daśāvatāra* theory in Jayadeva's Period :**

The benedictory verses of the Ajmer stone inscription had formed the introduction of a poem written in the 12th C.A.D.[2] It contains the invocation to the ten incarnations of *Viṣṇu.* Here *Kṛṣṇa* is accepted as the eighth incarnation.

Thus, by the time of Śrī Jayadeva there were two schools of which one was proclaiming *Balarāma* as the eight avatāra wheras the greatest philosopher and reformer *śrīsaṁkaracaya* accepted *Kṛṣṇa* as the eighth *avatāra.* This view was followed by *Kṣemendra* and the author of Ajmer stone inscription. But *Śrīharṣa* made an attempt to conciliate the two schools by advocating that both *Balarāma* and *Kṛṣṇa* formed a single *avatāra.* But Jayadeva in his *GG* accepts *Balarāma* as the eighth incarnation because he openly admits the supremacy and superiority of Lord Kṛṣṇa as the very creator or progenitor *(daśakṛtikṛt)* of the ten *avatāras.*

**1.3 *Daśāvatāra* theory in Post Jayadeva Period :**

Jayadeva's attempt to establish the supremacy and superiority of *Śrīkṛṣṇa* over other *avatāras* of *Viṣṇu* steadily attained success and the worship of *Kṛṣṇa* became wide spread and deep rooted in the Hindu

---

1 धूमवत् कलयता युधि कालं म्लेच्छकल्पशिखिना करवालम्।
कल्किना दशतयं मम कल्कं त्वं व्युदस्य दशमावतारेण।। (नैषधीयचरितम्, 21.79)

2 Epigraphia Indica – Vol. XXIX, p.179

society. There are ten villages around Kenduli in the Prachi valley in the name of ten *avatāras*[1] as follows :

1. Matsyapura or Māchhapur – Matsya Avatāra
2. Kūrmapura or Kūrmapada – Kūrma Avatāra
3. Barāhapura – Varāha Avatāra.
4. Narasinghapur śāsana – Narasiṁha Avatāra
5. Dadhi Bāmanapur – Vāmana Avatāra
6. Bhārgabapur (now extinct) from which Bhārgabi river has originated – Paraśurāma Avatāra.
7. Rāmacandrapur śāsana – Rāma Avatāra
8. Balabhadrapur śāsana – Balarām Avatāra
9. Bouddha Khaṇḍa (Bodhipada) – Buddha Avatāra
10. Kaliyuga Bhāgalpur – Kalkī Avatāra

In Post-Jayadeva Period *Kṛṣṇa* was accepted as 'Bhagavan' *(Kṛṣṇastu Bhagavān svayam)* in each and every Hindu Family. Particularly in Odisha it is almost a house hold book that is worshiped along with home deities. Common people of India started to believe *Kṛṣṇa* as the almighty only after the famous hymn of *daśāvatāra* to *Jagadiśa* or *jagannātha* of Puri.

In Post- Jayadeva period different kinds of *avatāras* have also been enumerated where *Kṛṣna* is accepted as an incarnation and *Balarāma* has been ignored. In this particular work *Jagannātha* is

[1] G.K. Dash, Incredible Prachi Valley, p.42

glorified. *Jagannātha* is beyond the concept *Avatāra* and *Avatārin.* On the wall of the Jagamohan at Puri temple, *Jagannātha* replaces Buddha. This is a recent construction which may confuse the researchers, and hence should not be taken as authentic.

### 2. *Daśāvatāra* theory in Ancient Odisha :

From the archeological evidences, it can safely be ascertained that the theory of *Daśāvatāra* had gained much popularity in Odisha at least from the 8th C. A. D. Two unique Viṣṇu images worshipped in the villages Sainatala of Bolangir district of Odisha furnish definite evidence regarding the development of *Daśāvatāra* theory[1]. Here the figures of ten incarnations are carved on the right and left sides of the pedestal stand. Here *Balarāma* is accepted as the eight incarnation. The representation of the ten incarnations carved in those two images completely tallies with their description given in the famous *Daśāvatāra-stuti* of the *GG.*

In a place called Trithamatha presently situated in the Erasama P.S. of Jagatsinghpur district there was an ancient temple containing very beautiful images of the ten incarnations of *Viṣṇu,* of which the figures of *Paraśurāma, Rāma* and *Balarāma* are still preserved, while others are perhaps buried in a mound near by. These can be assigned to the 7th C. A. D.[2] The images of *Kākaṭpur* in Puri district. It was destroyed by the muslims. The figures of ten incarnations are found carved on the Lintel over the lions gate of the *Jagannātha* temple of Puri. It is unanimously admitted to have been constructed by Cholaganga Deva between (1112-1147 A.D.)[3]. There is a maṭha called *Daśāvatāra Maṭha* near *guṇḍicā* temple of Puri where the ten incarnations are worshiped. Near

---

[1] A Descriptive Catalogue of Sanskrit Manuscripts, Vol. II, p.XLVII

[2] A Descriptive Catalogue of Sanskrit Manuscripts, Vol. II, p.XLVIII

[3] K.N. Mohapatra, Khurdha Itihasa, p.33

*svetagaṅgā* of Puri *Matsyamādhava* is worshiped. *Śrīkūrma* and Simhacalam built before the days of Jayadeva are dedicated to *Kūrma* and *Narasimha Avatāra* (1113 C.A.D). Besides these the *Daśāvatāra* images were found in Prachi valley, temple walls and Odishan art and sculpture[1]. Even before Jayadeva's GG, many *Daśāvatāra* images were found worshiped in Puri, the land of Lord *Jagannātha.* Therefore Purusottama Kṣetra was famous as *Daśāvatāra Kṣetra* in those days[2].

Thus, the *Daśāvatāra* theory had gained much popularity in Odisha long before Jayadeva's *GG.* It was systematised some where in North India and was followed by the sculpture of Odisha in the subsequent centuries[3].

## 2.1 *Daśāvatāra* in Present Odisha :

Coming to the modern age we find that the *Daśāvatāra* paintings are popular among the common people. *Daśāvatāra* pictures are found woven in textiles popularly known as *'Khaṇḍuā'*. The influence of the *GG* is so intense that the *Daśāvatāra* dance has been indentified with Odisi dance. The lyrical quality of the *Daśāvatāra* stuti is so sweet and captivating that in Odisha people recite this as a matter of routine without even being able to realize the meaning of it. It is sung as a regular prayer by the common people too.

## 2. Last Line :

Thus, the *Daśāvatāra* theory influenced the art and cultural tradition of our country to such an enormous degree that it influenced the

---

[1] K.N. Mohapatra, Sri Jayadeva and GG, pp.101-103

[2] ibid, p.103

[3] A Descriptive Catalogue of Sanskrit Manuscripts of Odisha, Vol.II, p.II

life style of the people. Hence, consisting of such concepts the *GG* surpasses the narrow limits of place and frontier, language and literature, and which is so dear to people, is bound to reflect the natural character of the people of Odisha.

❑ ❑ ❑

**महस्विनी – विद्वत्समीक्षिता सन्दर्भिता च शोधपत्रिका (ISSN: 2231-0452)**
**कुसुमम् :** जनवरी – डिसेम्बर २०२१ **सम्पुटम् :** संयुक्तम् (१,२)

# ज्यौतिषीयरत्नविज्ञानम्

**डॉ. मनोजश्रीमालः***

जन्मकाले जातकः यदा जनन्याः गर्भं त्यक्त्वा बाह्यपरिवेशस्य सम्पर्के आयाति, तस्मिन्काले सः स्वस्य स्वतन्त्रास्तित्वं प्राप्नोति। खस्थानां विद्यमानानां खेटानां रश्मयोऽपि तेन प्राप्यन्ते। ताः रश्मयः देशकाल-परिस्थिति-वातावरणानुगुणम् अल्पाधिकाः प्राप्तुं शक्नुवन्ति। यस्य ग्रहस्य रश्मिः जातकेन अधिका प्राप्यते, सः ग्रहः जातकाय बलप्रदः प्रभावयुक्तश्च भवति तथा च न्यूनरश्मिप्राप्तग्रहः बलहीनः। अतः जन्मकुण्डल्यां योगकारकग्रहः न्यूनरश्मिः प्राप्नुयात् तदा जातकः जीवने सम्यक्प्रकारेण शुभाशुभयोगस्य फलं प्राप्नोति, सम्यक्प्रकारेण योगफलमाप्तुम् अधिकः श्रमः कर्त्तव्यः भविष्यति। यथा रुग्णमनुष्यं निरुग्णं कर्तुम् औषधप्रयोगः क्रियते, तथैव रुग्णम् अर्थात् बलहीनग्रहं बलिष्ठम् अनुकूलञ्च कर्तुं ज्यौतिषे तन्त्र-मन्त्र-यन्त्र-रत्न-औषधीनाञ्च विधानमस्ति। एते उपायाः आध्यात्मिकोपायानां श्रेण्यामपि स्वीकर्तुं शक्यन्ते। एतेषूपायेषु रत्नधारणमत्यन्तं सुगमोपायो वर्तते। रत्नं केवलं नास्ति सौन्दर्यप्रसाधनम्, अपितु भाग्यनियामकमपि। एतदर्थं रत्नशास्त्रे सर्वेषां कृते रत्नानां निर्धारणमस्ति। रत्नानां प्रभावेन निर्बलग्रहेभ्यः बलं प्रदीयते, येन ग्रहाः प्रभावशालिनः लाभकारिणश्च सिद्धाः भवेयुः।

### रत्नानां प्राचीनत्वम्

प्राचीनकालादेव रत्नानां प्रचलनमस्ति, एतेषां प्रयोगः वैयक्तिकरूपेण ज्यौतिषोपायत्वेन अस्माकं जीवने वर्तते एव। विश्वस्य प्राचीनतमो ग्रन्थः ऋग्वेदः **रत्नधातमम्**[1] इत्युक्त्वा अग्निं

* सहायकाचार्यः, ज्योतिषविभागः, केन्द्रीयसंस्कृतविश्वविद्यालयः, एकलव्यपरिसरः, सिपाई पारा, लेम्बूचेरा, पश्चिमत्रिपुरा, त्रिपुरा।

[1] अग्निमीले पुरोहितं यज्ञस्य देवमृत्विजम्। होतारं रत्नधातमम्॥ ऋग्वेदः, १/१/१

श्रेष्ठरत्नं विवेच्य रत्नानां प्राचीनत्वं सिद्ध्यति। रामायण-महाभारत-पुराणप्रभृति: धार्मिक-ऐतिहासिकग्रन्थेषु अपि रत्नानां विशद्वर्णनं प्राप्यते। प्राय: इष्टदेवानां महापुरुषाणाञ्च चित्राणि बहुमूल्यरत्नै: आभूषणैश्च विभूषिता: दरीदृश्यन्ते। पुराणानि न केवलमैतिहासिक-तथ्यानामाध्यात्मिक-सामाजिकभावनानां सुन्दरस्वरूपे हृदयग्राहककथारूपे प्राकटनस्योपादानान्यपितु रहस्यात्मकविज्ञानस्योपचारस्य चापि प्रबलानि संवाहकानि वर्तन्ते। अग्निपुराण[1]–गरुड़पुराण[2]–देवीभागवतपुराणादिषु[3] ग्रन्थेषु विविधरत्नानां नामानि, प्राप्तिस्थानं, विशिष्टलक्षणानि, गुणदोषपरीक्षणं, शुभाशुभत्वस्य च विस्तृतं विवेचनं प्राप्यते। वस्तुतस्तु रत्नानामुत्पत्तेरूपयोगिताया अथ च गुणदोषाणां विवेचनं यद्यपि पुराणेषु स्वतन्त्ररूपेण नास्ति तथापि तेषां स्वकीयलाक्षणिकशैल्यां तदनुरूपं तथ्यमवश्यमुपलब्धं शक्यते, तच्च विवेचकस्य ज्ञानार्थमपेक्षितं भवति। तत्र ज्यौतिषग्रन्थेषु आचार्यवराहमिहिरकृत्बृहत्संहिता[4] - ठक्कुरफेरूकृत्रयणपरिक्खाग्रन्थयो: रत्नविषयकं विस्तृतं विवेचनं लभ्यते।

चरकसंहिता-भावप्रकाश-रत्नसमुच्चय-रसतरङ्गिणी-आयुर्वेदप्रकाश-सुश्रुतसंहितादयश्चायुर्वेदस्य अग्रगण्यग्रन्थेषु विविधरत्नानां भस्मपिष्टिभ्यां विभिन्नरोगाणां निराकरणायारोग्यप्राप्त्यर्थं वर्णनं प्राप्यते। एतदतिरिच्य अगस्तमति:, कौटिल्यार्थशास्त्रं, शुक्रनीतिश्चेत्यादिषु ग्रन्थेषु वर्णनमत्यधिकं लभ्यते। प्राय: संस्कृतसाहित्ये महाकवय: रत्नानां रूपवैभवमुपयुज्य स्वचरित्रपात्रेभ्य: अद्भुतरूपं दत्त्वा महिमानं मण्डितवन्त:। इत्थं रत्नानां प्राचीनत्वं निर्विवादत्वेन सिद्धयति। एतद् अतिरिच्य अर्थशास्त्रे-युक्तिकल्पतरुशास्त्रेऽपि रत्नानां वर्णनमस्ति। मन्यन्ते केचन जना: यत् कौटिल्यस्य अर्थशास्त्रे रत्नशास्त्रस्य उत्पत्ति: प्रारम्भो वा भवति।

---

[1] अग्निपुराणे २४६ तमे अध्याये रत्नपरीक्षावर्णनं वर्णितम्।

[2] पुराणेषु अन्यतम: गरुड़पुराणे ६८ त: ८० तमे अध्याये रत्नपरीक्षाया: विवेचनं वर्णितमस्ति।

[3] ८,११,१२ तमे अध्याये रत्नविषयकवर्णनं प्राप्यते।

[4] बृहत्संहितायाम् ८० त: ८३ अध्यायपर्यन्तं रत्नविषयकी चर्चा चर्चिता।

**रत्नशब्दस्य व्युत्पत्त्यर्थः**

'रमणीयतरं यस्मात् इति रत्नम्' उत वा 'रमन्ते अस्मिन्निति रत्नमिति' व्युत्पत्त्यर्थः प्रोक्तः शब्दशास्त्रविशारदैः।[1] रमणीयतरमित्यत्यत्र 'रमु क्रीडायाम्' इति धातोः 'अनीयर् प्रत्ययः' ततश्च अतिशयेऽर्थे तरप् प्रत्यये कृते सति रमणीयतरशब्दो निष्पद्यते। अनया व्युत्पत्तिदृष्टया 'रत्न' शब्दोऽयं 'रम्' धातोः 'णित्' प्रत्यये कृते निष्पद्यते।[2] रमधातुः रमणीयार्थे प्रयुज्यते। वस्तुतस्तु रत्नशब्दस्य परिभाषा संक्षिप्ताऽस्ति, परञ्चास्य प्रासङ्गिकतायाः क्षेत्रमत्यन्तं बृहत्तमस्ति। वस्तुतः लघुः शब्दोऽयं बह्वर्थी व्यापकञ्च भावं प्रकटयति। साहित्यजगति विभिन्नक्षेत्रेषु प्रसङ्गेषु विषयेषु चास्य प्रयोगः अभवत्। परञ्चास्य भावः सर्वेषु स्थलेष्वेकेव तदस्ति- 'श्रेष्ठत्वम्', अद्भुतगुणानां समन्वयः, आभाः, कान्तिः, दुर्लभत्वञ्च। शब्दकोशे रत्नस्यार्थः दुर्लभः मूल्यवाञ्च प्रस्तररूपेण विहितः।[3] तत्र स्ववर्गेऽथवा स्वसमुदाये जात्यां वा यत् सर्वश्रेष्ठं भवति तदेव रत्नमुच्यते।[4] इत्थं माणिक्यादयः द्रव्यविशेषाः रत्ननाम्ना उच्यन्ते, यतोहि एते अन्यखनिजद्रव्याणामपेक्षया बहुशोभनं प्रतीयन्ते। अथवा एते मनुष्येभ्योऽधिकं रोचन्ते, अतः रत्नविज्ञैः रत्नशब्दस्य प्रयोगः कृतः।[5] यथा - अग्निपुराणे इन्द्रनीलरत्नस्य विषये वर्णितं यत्- **रञ्जयेत् स्वप्रभावेण तममूल्यं विनिर्दिशेत्।**[6] अर्थात् यद्रत्नं स्वप्रभावेण निखिलान् रञ्जयति तदमूल्यं ज्ञेयम् ।

नैकेषु स्थलेषु रत्नशब्दस्य प्रयोगः 'मणि' इत्यर्थेऽपि भवति। मणिरत्नयोः नास्ति भेदः

---

[1] आयुर्वेदप्रकाशः, ५/२

[2] संस्कृतशब्दार्थकौस्तुभम्, पृ.९३५

[3] संस्कृत-हिन्दीशब्दकोशः, वामनशिवरामआप्टे, पृ.८४६

[4] रत्नं स्वजातिश्रेष्ठेऽपि, अमरकोषः, तृतीयकाण्ड, पृ.४८२

[5] रमणीयतरं यस्माद्रमन्तेऽस्मिन्नतीव वा।
तस्माद्रत्नमिदं ख्यातं शब्दशास्त्रविशारदैः॥ रसतरगिंणी, त्रयोविंशतरंगः, १७
रत्नं मणिर्द्वयोरश्मजातौ मुक्तादिकेऽपि। अमरकोषः, २/९/९३

[6] अग्निपुराणे, २४६/१५

अपितु परस्परं पर्यायवाचिन: सन्ति। द्वयोरेव प्रयोग: प्रस्तरजातीयवज्रमरकत-माणिक्य-जीवजातीयमुक्ता-प्रवालादिनाञ्च कृतेऽभवत्।[1] इत्थं यदन्यं हर्षितं कुर्यात् तद् रत्नमिति।[2]

**रत्नोत्पत्ति:**

रत्नानामुद्भवविकासश्च कथमभवत्? अस्मिन् सन्दर्भे विभिन्नानि मतानि प्राप्यन्ते। तत्र केचन विद्वान्स: पौराणिकमान्यतां स्वीकुर्वन्ति, केचन विद्वान्स: भौतिकमान्यतामङ्गीकुर्वन्ति।

**परम्परागतमान्यता**

पृथ्वी रत्नगर्भा[3] इत्युच्यते, अत: स्पष्टमस्ति यत् रत्नानामुत्पत्ते: स्थलं पृथ्वी एव। तथापि रत्नानामुत्पत्ते: विषये मतद्वयं प्रचलितम्। एकस्मिन् वर्गेऽस्योत्पत्ति: पौराणिकदृष्ट्या अङ्गीक्रियते। द्वितीये वर्गेऽस्योत्पत्ति: बृहत्कालवर्षान्तरे भूमिगतानेकै: जीवाश्मभि: स्वीक्रियते। धर्मशास्त्रे पौराणिकोत्पत्ते: अनुसारं रत्नानामुत्पत्ति: असुरस्य शारीरिकावयवै: निर्दिष्टमस्ति।[4] देवताभि: प्रार्थनाकरणेन यदा बल: नामधेयोऽसुर: याज्ञीयपशुरूपेण प्रस्तुत:। तस्यां यज्ञभूमौ तस्य वध: जात:, तदा तस्मात् विभिन्नरत्नानामुत्पत्ति: जाता। तस्यासुरस्यास्थिभि: वज्र:, दन्तेभ्य: मुक्ता, रक्तात् माणिक्यम्, पित्ताद् मरकतमणि:, नेत्राभ्याम् इन्द्रनील:, रसात् वैदूर्य:, वसाया: कर्केतनम्, नखात् लहसुनिया, मेदात् स्फटिकम्, त्वच: पुष्परागस्योत्पत्ति: अभवत्।[5]

---

[1] अमरकोष:, द्वितीयकाण्डम्, पृ.१२५

[2] रमयति हर्षयतीति रत्नम् , हलायुधकोष:, पृ.५५९, शब्द०, चतुर्थभाग:, पृ.८८

[3] अमरकोष:, द्वितीयकाण्डम्, पृ.१२५

[4] तस्य सत्त्वविशुद्धस्य विशुद्धेन च कर्मणा।
कायस्यावयवा: सर्वे रत्नबीजत्वमायषु:॥ गरुड़पुराणे, ६८/४

[5] अत्थिस्स जाय हीरय मुत्तिय दंताउ रुहिर माणिक्कं।
मरगयमणि पित्ताओ नयणाओ इन्दनीलो य॥
वइडुगो य रसाओ वसाउ कक्केयं समुप्पन्नं।
ल्हसणीओ य नहाओ फलियं मेयाउ संजायं॥
विद्रूमु आमिस्साओ चम्माओ पुंसराउ निप्पन्नो।
सुक्काउ य भीसम्मो रयणाणं एस उप्पत्ती॥ रयणपरिक्खायाम् (रत्नपरीक्षा), ठक्कुरफेरू:, गाथा ९-११

पारङ्गतशारीरिकशास्त्रज्ञैः आयुर्वेदिकोपचारदृष्ट्या रत्नानि यत्र-यत्र अङ्गेषूपचारार्थं धार्यन्ते तत् पुराणेषु प्रदर्शितोत्पत्त्या सर्वथानुकूलं वर्तते। यस्मादङ्गात् यद् यद् रत्नमुत्पन्नं पुरातनायुर्वेदशास्त्रे तस्य तस्य रत्नस्य तत्तदङ्गस्वास्थ्योपचारार्थम् उपयोगित्वं उपवर्णितम्।

तत्रापि मतद्वयमस्ति। केचन् स्वीकुर्वन्ति यत् इन्द्रः यदा बलासुरं हतवान् तदा तस्यास्थिभिः रत्नानि जातानि। अन्येषाम्मतमस्ति यत् दधीचिमुनेरस्थिभ्यः रत्नानामुत्पत्तिरभवत्[1] तथा हिमालयोऽपि रत्नानाम् उत्पत्तिः स्थलं मन्यते इति।[2] रत्नानां उत्पत्तिविषये अग्निपुराणे स्फटिकपद्मरागयोः सम्बन्धे बङ्गः कुरुविन्दश्च नाम आगच्छति।[3] अन्यशास्त्रेषु एतत् विषयकानि अनेकानि मतानि प्राप्यन्ते। गरुड़पुराणे[4] बृहत्संहितायां[5] च रत्नस्य उत्पत्तिः असुरस्य अङ्गप्रत्यङ्गात् मन्यते।

**भौतिकमान्यता**

अस्याः मान्यतायाः प्रमुखं कारणं वैज्ञानिकाधारोऽस्ति। यस्यानुसारं प्रायः सर्वाणि रत्नानि खनिजद्रव्याणि सन्ति। कानिचन रत्नानि जीवाश्मश्रेण्यामागच्छन्ति तथा केभ्यश्चन वर्षेभ्यः भूपरतेषु आकुञ्चिताः सन्ति, यत् विशेषरसायनानां सम्मिश्रणमस्ति। भूमौ कालान्तरे जायमानानां भूकम्पादिपरिवर्तनानां परिणामवशात् अवशेषाः मृत्कणादिभिः पिहिताः तानि कालान्तरे विभिन्नतत्त्वानां परस्परमेलनेन रसायनस्य मिश्रणरूपेण प्रतिष्ठितानि। एतत् वैज्ञानिकं

---

[1] रत्नानि बलाद्दैत्याद्दधीचितोऽन्ये वदन्ति जातानि।
केचिद् भुवः स्वभावात् वैचित्र्यं प्राहुरूपलानाम्॥ बृहत्संहितायाम्, वज्रपरीक्षा, ८०/३

[2] भास्वन्ति रत्नानि महौषधीश्च। कुमारसम्भवम्, १/२
अनन्तरत्नप्रभवस्य यस्य, हिमं न सौभाग्यविलोपि जातम्॥ कुमारसम्भवम्, १/३
रत्नाकरे युज्यत एव रत्नम्। कुमारसम्भवम्, ११/११

[3] स्फटिकाः पद्मरागाः स्यू रागवन्तोऽतिनिर्मलाः।
जातवङ्गाः भवन्तीह कुरुविन्द समुद्भवाः॥ अग्निपुराणे, १४६/११

[4] गरुड़पुराणे, ६८/१-८

[5] बृहत्संहितायाम्, ८०/३

सत्यं यत् सर्वेषु रत्नेषु रसायनस्य मिश्रणं प्राप्यते। एतानि रत्नानि मुख्यतया खनिजपदार्था: सन्ति। प्रकृत्या विभिन्नप्रकारकाणां रासायनिकतत्त्वानां सम्मिश्रणात् विभिन्नस्थानेष्वेव तेषामुत्पत्तिर्भवति। अस्मादेव कारणाद् रत्नानां पिष्टिभस्मयो: औषधरूपेण प्रायोगिकवर्णनम् अस्माकं चरकसंहिता-सुश्रुतसंहिता-रसतन्त्रसमुच्चय-रसतन्त्रसारश्चेत्यादिषु आयुर्वेदग्रन्थेषु समुपलभ्यते।

**रत्नानां प्रकारा: भेदा: वा**

प्राय: सर्वेषु रत्नविषयकग्रन्थेषु नवरत्नानाम् उल्लेख: प्राप्यते, यथा- ठक्कुरफेरूमहोदयेन रयणपरिक्खाग्रन्थे (रत्नपरीक्षाग्रन्थे) लहसुनिया-कर्केतन-स्फटिक-भीसमकीक-फिरोजादिनि उपरत्नानि स्मील्लयते तेषां गणना षोडशसंख्यका स्वीकृता:।[1] प्रमुखेषु पञ्चरत्नेषु वज्र-माणिक्य-मुक्ता-नीलमणि-मरकतश्चोल्लेख: अपि प्राप्यते।[2] नवरत्नेषु वज्र-मुक्ता-प्रवाल-गोमेदक-इन्द्रनील-वैदूर्य-पुष्पराग-मरकत-माणिक्यरत्नानाञ्च गणना क्रियते।[3] एतेषां कानिचन उपरत्नानि अप्युल्लिख्यन्ते, यथा- लहसुनिया-कर्केतन-स्फटिक-भीसमाकीक-फिरोजा-वैक्रान्त-सूर्यकान्त-वज्र-मुक्ता-चन्द्रकान्तमणि-राजावर्ताश्च, एतेषु सप्तानां मणीनामपि उल्लेख: प्राप्यते।[4] अग्निपुराणे[5] रत्नानां संख्या सप्तत्रिंशत् (३७) सन्ति। यथोक्तम् -

---

[1] सुरेण पउमरायं मुत्तिय चंदेण विद्दुमं भूमे। मरगयमणीउ बुद्धे जीवेण य पुंसरायं च॥
सुक्केण गहिय वज्जं सणिंदनीलं तमेण गोमेयं। केएण य वेडुगं मुक्का तत्थेव सेस तहिं॥
रयणपरिक्खायाम्, गाथा १४-१५

[2] हिन्दूधर्मकोश:, पृ.३८१

[3] परीक्षकै: स्वयं राजा रत्नादीन्वीक्ष्यरक्षयेत्। वज्रमुक्ताप्रवालं च गोमेदश्चेन्द्रनीलक:॥
वैदूर्य: पुष्परागश्च पाचिर्माणिक्यमेव च। महारत्नानि चैतानि नव प्रोक्तानि सूरिभि:॥ शुक्रनीति:, ४/२/४०-४१

[4] वैक्रान्त: सूर्यकान्तश्च हीरकं मौक्तिकं मणि:। चन्द्रकान्तास्तथा चैव राजावर्तश्च सप्तम:॥
गरुडोद्गारश्चैव ज्ञातव्या मणयस्तवमी। पुष्परागो गोमेदश्च पद्मराग: प्रवालकम्॥
वैदूर्यञ्च तथा नील एते च मणयो मता:। यत्नत: संग्रहीतव्या रसबन्धस्य कारणात्॥
रसरत्नसमुच्चय:, ४/२-४

[5] अग्निपुराणे, २४७/१-६

**रत्नानां लक्षणं वक्ष्ये रत्नं धार्यमिदं नृपैः।**

**वज्रं मरकतं रत्नं पद्मरागञ्च मौक्तिकम्॥**

**............................प्रशस्तं वज्रधारणम्॥**

रत्नविषये अग्निपुराणे कथितं यत् सम्प्रति तेषां रत्नानां लक्षणमहं वच्मि यानि रत्नानि राज्ञां कृते धारणीयानि सन्ति। रत्नेषु वज्रं, मरकतं, पद्मरागं, मौक्तिकं, महानीलं, इन्द्रनीलं, वैदूर्यः, गन्धसस्यं, चन्द्रकान्तं, सूर्यकान्तं, स्फटिकं, पुलकं, कर्केतनं, पुष्परागं ज्योतिरसं, राजपट्टं, राजमयं, शुभसौगन्धिकं, गञ्जं, शङ्खं, ब्रह्ममयं, गोमेदं, रुधिराक्षं, भल्लातकं, धूलीमरकतं, तुष्यकं, सीसकं, पीलुं, प्रबालं, गिरिव्रजं, भुजङ्गमणिकं, वज्रमणिं, टिट्टिभिं, पिण्डः, भ्रामरः, उप्पलश्च सन्ति। बृहत्संहितायां रत्नानां संख्या द्वाविंशतिः (२२) सन्ति।[1] गरुड़पुराणे[2] - वज्रम्, मुक्ताफलम्, पद्मरागः, मरकतम्, इन्द्रनीलमणिः, वैदूर्यः, पुष्परागम्, कर्केतनः, पुलकः, रुधिराख्यः, स्फटिकः विद्रुमश्च सन्ति । युक्तिकल्पतरौ[3] रत्नानां गणना अग्निपुराणे उद्धृतमस्ति। किन्तु अग्निपुराणे वर्णितं गन्धः, भल्लातकः, धूली, तुत्थकः, पीलुतः, गिरिवज्रं, भास्करः, तित्तिरः, पित्तं, भ्रामरः, उप्पलः इति नाम्ना किमपि रत्नं न प्राप्तम्। अतः युक्तिकल्पतरौ एतेषां वर्णनं नास्ति। अत्र वर्णितः रत्नानां क्रमः एवमस्ति - पद्मरागं, वज्रं, विद्रुमः, गोमेदकः, मुक्ताः, वैदूर्यः, इन्द्रनीलमणिः, मरकतं, पुष्परागं, कर्केतनम्, भीष्मः, पुलकः, रुधिराख्यः, स्फटिकः, अयस्कान्तः, शंखश्च। एतेषु प्रथमाष्टौ मुख्यरत्नानि सन्ति।

एतेषां सर्वेषां रत्नानां ग्रहानुरूपविभाजनं कृतमस्ति, अर्थात् प्रत्येकं ग्रहाय रत्नमेकं निर्धारितं, यत् तज्जन्यारिष्टं दूरं कृत्वा शुभफलं प्रददाति। यथा - सूर्यस्य माणिक्यं, चन्द्रस्य

---

1 बृहत्संहितायाम्, ८०/४-५

2 गरुडपुराणे, अ. ६८-८०

3 युक्तिकल्पतरुः, पृ.१२६

मौक्तिकं, भौमस्य प्रवाल:, बुधस्य मरकतमणि:, बृहस्पते: पुष्परागं, शुक्रस्य वज्रं, शने: नीलमणि:, राहो: गोमेद:, केतो: लसुनकं इति रत्नं भवति।[1]

**रत्नानां वर्णव्यवस्था**

नैकेषु ग्रन्थेषु यत्र नानाविधरत्नानां वर्णनं प्राप्यते तत्रैव वर्णानां विषयेऽपि विवरणं मिलति।[2] यथा - अग्निपुराणे यत्र वैदूर्यस्य नीलवर्णं रक्तवर्णञ्च वर्णितं किन्तु तत्र गरुड़पुराणे तस्य कृते नीलवर्णयुक्त: वंशकान्तिसदृश: वर्णं वर्णितमस्ति।[3]

**रत्नानां गुणदोषपरीक्षा**

इत्थं रत्नानां गुणदोषपरीक्षाविषयेऽपि नैकेषु ग्रन्थेषु अनेकानि रत्ननानि वर्णितानि तथापि तत्र रत्नेषु केवलं वज्र-मरकतमणि-स्फटिक-पद्मराग-मुक्ताफल-इन्द्रनीलमणि-वैदूर्यादिनां रत्नानां विशेषेण शुभलक्षणानि वर्णितानि। एतानि शुभलक्षणानि रत्नानां गुणेन सम्बद्धानि सन्ति। यथा -

**वज्रम्**

सर्वेषु रत्नेषु वज्रधारणं श्रेष्ठं मन्यते। पुराणानुसारं महाबलवत: वृत्रासुरस्य वधाय विष्णु: इन्द्रं परामृष्टवान्। यत् महातपस्विन: दधीचे: अस्थिभि: अस्त्रं निर्मेयम्। देवानां प्रार्थनया महामुनि: निजतनुं देवेभ्योऽर्पितवान्। इन्द्र: महामुनेरस्थिभि: वज्रं निर्माय वृत्रासुरं अहनत्। अस्त्रनिर्माणकाले पृथिव्यां पतितै: अस्त्रखण्डै: वज्रस्य खनिन: निर्मिता:।

यथोक्तं गरुड़पुराणे - येषु भूमिप्रदेशेषु कथञ्चित् असुरस्य अस्थिलेश: निपतति स्म।

---

[1] माणिक्यं दिननायकस्य विमलं मुक्ताफलंशीतगो:,
माहेयस्य च विद्रुमं मरकतं सौम्यस्य गारुत्मकम्।
देवेज्यस्य च पुष्परागमसुराचार्यस्य वज्रं शने:,
नीलं निर्मलमन्ययोश्च गदिते गोमेदवैडूर्यके॥ जातकपारिजात:, श्लोक: २१

[2] अग्निपुराणे, २४६/९, ११, १२, १५

[3] गरुड़पुराणे, ६९/२३

तेषु वज्रस्य उत्पत्तिः भवति।[1] रयणपरिक्खाग्रन्थे असुरदन्तात् वज्रस्य उत्पत्तिः मन्यते।[2]

**उत्पत्तिस्थलम्**

रत्नविषयकग्रन्थेषू पुराणेषु च अस्य उत्पत्तिः वर्णिता। यथा - रयणपरिक्खायां (रत्नपरीक्षायां) वज्रस्य हिमालय-सूर्पारक-कलिंग-मातंग-कौशल-सौराष्ट्र-पौण्ड्रदेशश्च आकरस्थानानि भणितानि।[3] इत्थं अर्थशास्त्रेऽपि वज्रस्य सभाराष्ट्रकं (मुम्बईविदर्भश्च), कौशलप्रदेशः, कास्तीरप्रदेशः, श्रीकटनपर्वते, उत्तरस्थमणिमन्तैपर्वते, इन्द्रवानकप्रदेशः, कलिङ्गप्रदेशः च आकरस्थानानि वर्णितानि।[4] बृहत्संहितायां वराहमिहिरोऽपि वज्रस्य वेणतटः, हेमः, मातङ्गक्षेत्रं, सौराष्ट्रं, पौन्ड्रक्षेत्रं, कलिङ्गं, कौशलप्रदेशः, वेणुगङ्गा इति सप्ताकरस्थलानि (प्राप्तिः स्थलानि) अवर्णयत्।[5] गरुड़पुराणे वज्रस्य हैम-मातङ्ग-सौराष्ट्र-पौण्ड्र-कलिङ्ग-कौशल-वेणातट-सौवीरश्च इति एतानि अष्टाकरस्थानानि वर्णितानि।[6]

**लक्षणानि**

अग्निपुराणे अस्य लक्षणस्य विषये वर्णितमस्ति यद् वज्रं जलं तरति, अभेद्यं भवति तथा च षट्कोणम् इन्द्रधनुरिव निर्मलप्रभम्, भारहीनं, सूर्यसमं दीप्तं, शुकवर्णं, स्निग्धं,

---

[1] तस्यास्थिलेशो निपपातु येषु भुवः प्रदेशेषु कथंचदेव।
वज्राणि वज्रायुधनिर्जिगीषोर्भवन्ति नानाकृतिमन्ति तेषु॥ गरुड़पुराणे, ६८/१६

[2] अस्थिस्स जाय हीरय मुत्तिय दंताउ रुहिर माणिक्कं॥ रयणपरिक्खायाम्, ९

[3] हेमंत सूरपारय कलिंग मायंग कोसल सुरठ्ठे।
पंडुर विसएसु तहा वेणुनई वज्जठाणाइं॥ रयणपरिक्खायाम्

[4] सभाराष्ट्रकं मध्यराष्ट्रकं कास्तीरराष्ट्रकं श्रीकटनकं मणिमन्तकमिन्द्रवानकं च वज्रम्।
खनिः स्रोतः प्रकीर्णकं च योनयं। अर्थशास्त्रे, २/२७/११, पृ. १२९

[5] वेणतटे विशुद्धं शिरीषकुसुमप्रभं च कौशलम्।
सौराष्ट्रकमाताम्रं कृष्णं सौर्पारकं वज्रम्।
ईषत्ताम्रं हिमवति मतङ्गजं वल्लपुष्पसङ्काशम्।
आपीतं च कलिङ्गे श्यामं पौण्ड्रेषु सम्भूतम्॥ बृहत्संहितायाम्, ७९/६-७

[6] गरुड़पुराणम्, ६८/१७

कान्तियुक्तं तथा विभक्तं भवति तच्छुभं मन्यते। यथोक्तम् -

**अम्भस्तरति यद्वज्रमभेद्यं विमलं च यत्।**
**षड्कोणं शक्रचापाभं लघु चार्कनिभं शुभम्॥**[1]

इत्थं स्थूलं स्निग्धं गुरु प्रहारसहं समकोटिकं भाजनलेखि तर्कुभ्रामि भ्राजिष्णु च प्रशस्तम्।[2] वज्रस्य कृते एका उक्ति प्रसिद्धा वर्तते यत् वज्रं अभेद्यम् अस्ति।[3] वज्रस्य वर्णविषये बृहत्संहितायां कथनमस्ति यत् -

**रक्तं पीतं च शुभं राजन्यानां सितं द्विजातीनाम्।**
**शैरीषं वैश्यानां शूद्राणां शस्यतेऽसिनिभम्॥**[4]
**सर्वद्रव्यामेद्यं लघ्वम्भसि तरति रश्मिवत् स्निग्धम्।**
**तडिदनलशक्रचापोपमं च वज्रं हितायोक्तम्॥**[5]

बृहत्संहितायां शुभवज्रस्य यानि लक्षणानि वर्णितानि तानि लक्षणानि अग्निपुराणसदृश: वर्तते। कौटिल्याऽर्थशास्त्रे वर्णितं यत् शिखररहित: तीक्ष्णकोणरहित: च व्रज: अप्रशस्त:।[6] रयणपरिक्खायां वज्रस्य काकपदं, बिन्दुयुक्त:, रेखायुक्त:, किलमलो, स्फुटिता:, एकश्रृंगा, वर्तुलाकार:, यवाकार:, हीनाधिकाकोणाश्च नाम्ना: एते नवदोषा: वर्णिता:।[7] वज्रपरीक्षाविषये गरुड़पुराणे वर्णितमस्ति यत् लोहात्, पुष्परागात्, गोमेदात्, वैदूर्यात्, स्फटिकात् वज्रस्य

---

1 अग्निपुराणम्, २४६/९,११,१२,१५
2 अर्थशास्त्रम्, २/२७/११, पृ. १२९
3 वज्रं न भिद्यते कैश्चिद्धि नत्त्यन्यान्मणींस्तु तत्। राजतरंगिणी, ४/५१, पृ. ७९
4 बृहत्संहितायाम्, ७९/११
5 बृहत्संहितायाम्, ७९/१४
6 नष्टकोणं निरश्रिपाश्वपिवृत्तं चाप्रशस्तम्। अर्थशास्त्रम्, २/२७/११, पृ. १२९
7 कागपग बिंदु रेहा समला फुट्टा य एगसिंगा य।
वट्टा य जवाकारा हीणाहियकोण नव दोसा॥ रयणपरिक्खायाम्, २५

प्रतिरूपाणि कुशलाः जनाः कुर्वन्ति।[1] बृहत्संहितायां विविधवर्णानां वज्राणां उल्लेखो प्राप्यते।[2] गरुड़पुराणे विविधाकरस्थानात् वज्रस्य विविधवर्णानि भवन्ति।[3] गरुड़पुराणे एवं बृहत्संहितायाम् उभयोः आकरस्थानानि समानमेव तथापि वज्रस्य वर्णविषये वैविध्यं प्राप्यते। यथा गरुड़पुराणे सौवीरक-वज्रम् श्वेतवर्णस्य तथा च बृहत्संहितायां वज्रस्य वर्णं श्यामः वर्णितम्।

**मरकतमणिः**

लोभान्मरणमनादृत्य तस्मिन् रत्ने प्रवर्तते इति मरकतमिति स्मरन्तीति वृद्धाः।[4] मरकतविषये उक्तम् - मरकतस्य गुणाः बल्यविषधनत्वादयः। अत्र प्राचीनाः -

**ज्वरछर्दिविषश्वाससन्निपाताग्निमान्द्यनुत्।**
**दुनमिपाण्डुशोफघ्नं ताक्ष्यंमोजोववर्धनम्॥**[5]

मरकतमणिः भस्म-बलवर्धकं, शरीरगतं विषनाशकं, पाचकाग्निप्रदीपकं, ओजोवर्धकं, जननाङ्गनां कृते बलवर्धकं पाण्डुरोगस्य तथा शोधरोगनाशकः भवति। अतएव श्वासरोगस्य गुदजामस्य, सन्निपातज्वरस्य च नाशको भवति मरकतमणिः।

अग्निपुराणे श्रेष्ठमरकतमणिविषयेऽपि वर्णनं प्राप्यते, तत्र उल्लिखितमस्ति यत्-

**शुकपक्षनिभः स्निग्धः कान्तिमान्विमलस्तथा।**
**स्वर्णचूर्णनिभैः सूक्ष्मैर्मरकतश्चबिन्दुभिः॥**[6]

---

[1] अयसापुष्परागेण तथा गोमेदकेन च।
वैदूर्यस्फटिकाभ्यो च काचैश्चापि पृथग्विधैः।
प्रतिरूपाणि कुर्वन् वज्रस्य कुशलाः जनाः॥ गरुड़पुराणम्, ६९/४५

[2] बृहत्संहितायाम्, ८०/१४

[3] गरुड़पुराणम्, ६८/३०

[4] रत्नविमर्शः, पृ.६१

[5] रसरत्नसमुच्चयः, ४/२३

[6] अग्निपुराणम्, २४६/१०

अर्थात् शुकपक्षनिभः स्निग्धः, कान्तिमान्, विमलः, सुवर्णचूर्णसदृशसूक्ष्मबिन्दुभिर्युक्तः मरकतमणिः श्रेष्ठो भवति। इत्थं रसरत्नसमुच्चयेऽपि वर्णितं यत्[1] हरिद्वर्णं गुरुं स्निग्धं स्फुरद्रश्मियुक्तः सूर्यकान्तिसदृशः, स्निग्धं, ताक्ष्यगात्रं मरकतमणिः श्रेष्ठो भवति। अत्रेदमप्यवेधयं यत् रुक्षः, कान्तिरहितः, विकृताकारः, कर्कशः, लघुभारः, भयावहः, मणिः त्याज्यः भवति।[2] बृहत्संहितायामपि[3] मरकतमणेः लक्षणानि वर्णितानि यत् शुक-वंशपत्र-कदली-शिरीषपुष्पप्रभायुक्तो मरकतमणिः श्रेष्ठो भवति। गरुड़पुराणेऽपि[4] बृहत्संहितासदृशं वर्णनं प्राप्यते। कल्हारशष्पकभुजगंभुजाचपत्रप्राप्तत्विषो मरकताः शुभदा भवन्ति।

**स्फटिकः पद्मरागश्च**

कावेरी-विन्ध्य-यवन-चीन-नेपालादिदेशेषु यत्र-यत्र असुरस्य मेदाख्यावयवाः पतिताः तत्र-तत्र तेभ्यः स्फटिकान्युत्पन्नानि।[5]

अग्निपुराणे[6] स्फटिकपद्मरागयोश्च वर्णविषये वर्णितम् यत् -

**स्फटिकजाः पद्मरागाः स्यू रागवन्तोऽतिनिर्मलाः।**
**जातवङ्गा भवन्तीह कुरुविन्दसमुद्भवाः॥**

अर्थात् इमौ मणी निर्मलौ अरुणिमा आभायुक्तौ भवतः। इमौ मणी बङ्गदेशे कुरुविन्दप्रदेशे च उद्भवतः। पद्मरागस्य अन्यत् नाम माणिक्यम् इति। इत्थं अर्थशास्त्रेऽपि[7]

---

[1] हरिद्वर्णं गुरुं स्निग्धं स्फुरद्रश्मिचयंशुभम्।
मसृणं भासुरं ताक्ष्यं गात्रं सप्तगुणं मतम्॥ रसरत्नसमुच्चयः, ४/२१

[2] रसतरङ्गिणी, २३/१०६

[3] शुकवंशपत्रकदलीशिरीष कुसुमप्रभं गुणोपेतम्।
सुरपितृकार्ये मरकतमतीवशुभदं नृणां विधृतम्॥ बृहत्संहितायाम्

[4] तत्राकठोरशुककण्ठशिरीषपुष्पखद्योतपृष्ठचरशाद्वशैवलानम्। गरुड़पुराणम्

[5] गरुड़पुराणम्, ८०/१

[6] अग्निपुराणम्, २४६/११

[7] शुद्धः स्फटिकः मूलाटवर्णः शीतवृष्टिः सूर्यकान्तश्च। अर्थशास्त्रम्, अ. २/प्र. २७/ अ. ११, पृ. १२८

वर्णविषये वर्णितं यत् स्फटिकं शुद्धं मूलाटवर्णसदृशं भवति। स्फटिकमणि: यदा जले स्यात् तदा समगुणवत्ताधारेण अदृश्य: भवति यथा नैषधकार: वदति -

**यद्विन्दुश्रियमिन्दुरचति जलं चविश्यदृश्येतरो।**
**यस्यासौ जलदेवता स्फटिकभूर्जागियागेश्वर: ॥** [1]

बृहत्संहितायानुसारेण स्निग्ध: कान्तिदीप्त:, शुभ्र:, गुरु:, शोभनाकार:, मध्ये प्रभायुक्त:, अतिरक्तवर्णयुक्त: तथा च श्रेष्ठगुणयुक्त: पद्मरागमणि: शुभो भवति।[2] बृहत्संहितायां पद्मरागस्य इत्थं उत्पत्तिर्विषये कथितम् -

**सौगन्धिककुरुविन्दस्फटिकेभ्य: पद्मरागसम्भूति: ।**
**सौगन्धिकजा भ्रमराञ्जनाब्जजम्बूसद्युतय: ॥**
**कुरुविन्दभवा: शबला मन्दद्युतयश्च धातुभिर्विद्धा: ।**
**स्फटिकभवा द्युतिमन्तो नानावर्णा विशुद्धाश्च ॥**

गरुड़पुराणे पद्मरागस्य वर्णं रक्तपद्मसदृशम् अकथयत्।[3]

**मुक्ताफलम्**

रक्त-पीत-सित-श्यामच्छविर्मुक्ता चन्द्रस्य प्रीतिकरो भवति।[4] अग्निपुराणे मौक्तिकविषये वर्णितम् यत्-

**सौगन्धिकोत्थ काषाय मुक्ताफलास्तु शुक्तिजा: ।**
**विमलास्तेभ्य उत्कृष्टा ये च शङ्खोद्भवा मुने ॥**
**नागदन्तभवाश्चाग्र्याः कुम्भसूकरमत्स्यजा: ।**
**वेणु नागभवा: श्रेष्ठा मौक्तिकं नागजं वरम् ॥**

---

[1] नैषधचरितम्, १२/३८ उत्तरार्द्धे

[2] बृहत्संहितायाम्, ८३/३

[3] गरुड़पुराणम्, ६८/१९२

[4] रक्तपीतसितश्यामच्छविर्मुक्ता प्रिया विधो:। शुक्रनीतौ, ४/२/४२, पृ. २४१

**वृत्तत्वं शुक्लता स्वाच्छयं महत्वं मौक्तिके गुणाः।**[1]

अर्थात् सौगन्धिकं विमलं काषायं शुक्तिजं मौक्तिकं भवति। सामान्यतया मुक्ताफलं शूक्तिजं भवति। परन्तु शङ्खोद्भवं मुक्ताफलं तदपेक्षया निर्मलमुत्कृष्टं च भवति। हस्तिदन्तसमुद्भवं कुम्भस्थलोद्भवं सूकर-मत्स्य-वेणुनागजातं मेघजातं च मुक्ताफलमत्यन्तश्रेष्ठं भवति। मुक्ताफले वृत्तत्वं, शुक्लत्वं, स्वच्छता, महत्ता चैते गुणाः भवन्ति। बृहत्संहितायामपि मुक्ताविषये वर्णितं यत् हस्ति-भुजंग-शूक्ति-मेघ-वंश-मत्स्य-शूकरात् उत्पन्नोऽयं मौक्तिकं बहुसाधु वर्तते।[2] अर्थशास्त्रानुसारेण स्थूलं, वृत्तकारं, निस्तलं, स्वच्छं, शोभनं, गुरुं, स्निग्धं, अस्फुटितं च मुक्ताफलं सुशोभितं भवति।[3] गरुड़पुराणेऽपि मुक्ताफलस्य शुभगुणानि वर्णितानि।[4]

**इन्द्रनीलमणिः**

असितो घनमेघसदृशः इन्द्रनीलो शनेः प्रीतिकरः भवति।[5] अग्निपुराणे इन्द्रनीलमणिकृते वर्णितम् यत्-

**इन्द्रनीलं शुभं क्षीरे राजते भ्राजतेऽधिकम्॥**

इन्द्रनीलमणिः यदि दुग्धे स्थाप्यते तदा स अत्यधिकं प्रकाशितं सुशोभितश्च जायते। यद्रत्नं स्वप्रभावेण निखिलान् रञ्जयति तदमूल्यं ज्ञेयम्।[6]

---

[1] अग्निपुराणम्, २४६/१२-१४

[2] द्विपभुजगशुक्तिशखांभ्रवेणुतिमिसूकरप्रसूतानि।
मुक्ताफलानि तेषां बहु साधु च शुक्तिजं भवति॥ बृहत्संहितायाम्, मुक्ताफलपरीक्षा, ८१/१-२, पृ. २७३

[3] स्थूलं वृत्तं निस्तलं भ्राजिष्णु श्वेतं गुरु स्निग्धं देशविद्धं च प्रशस्तम्।
अर्थशास्त्रम्, कोषप्रवेश्यरत्नपरीक्षा, अ.२/२७/११, पृ. १२६

[4] गरुड़पुराणम्, ६८/४२-४३, पृ. १९१

[5] शुक्रनीतौ, ४/२/४५, पृ. २४१

[6] अग्निपुराणम्, २४६/१४-१५

रयणपरिक्खायां इन्द्रनीलस्य नवाभेदा: वर्णिता:। ते च- नील:, घनसदृश:, मयूरकण्ठसदृश:, अलसीसदृश:, गिरिकर्णसदृश:, भ्रमरपक्षसदृश:, श्यामवर्ण: कोकिलग्रीवासदृशश्च।[1] एवमेव गरुड़पुराणे दानवाधिते: नेत्राभ्यां तत्रैव समुद्रतटे इन्द्रनीलान्युत्पन्नानि। तत्र इन्द्रनीलकृते महानीलशब्दस्य उच्चारणं भवति।[2]

**वैदूर्य:**

असुरस्य घनगर्जनेन वैदूर्यस्योत्पत्ति: अभवत्।[3] अग्निपुराणे वैदूर्यकृते वर्णितं यत् -

**नीलरक्तन्तु वैदूर्य्यं श्रेष्ठं हारादिकं भजेत्।**[4]

अर्थात् नीलाभ: रक्ताभश्च वैदूर्यमणि: श्रेष्ठ: कथ्यते। श्रेष्ठं वैदूर्यं हारादिके श्रेष्ठं भवतीति। उत्तमवैदूर्यमणि: स्निग्धं भास्करं मार्जारनेत्रसमं स्फूर्तम् अस्योपरि शुक्रवर्णस्यैकं वृत्तं यज्ञोपवीतसदृशं चिह्नं च भवति।[5]

अर्थशास्त्रे वैदूर्यमणे: भेदा: वर्णिता: तत्र कथितं यत् उत्पलवर्णसदृश:, शिरीषपुष्पसदृश:, उदकवर्णसदृश:, वंशरागसदृश:, शुकपत्रवर्णसदृश:, पुष्परागसदृश:, गोमूत्रसदृशश्च गोमेदक: भवति।[6]

अग्निपुराणे विद्रुम: केषां केषां नक्षत्राणां धारणीयम् एतद्विषये वर्णितं यत् -

---

[1] नील घण मोरकंठ य अलसी गिरि कन्नकुसुमसंकासा।
अलिपंखकसिण सामल कोइलगीवाभ नव छाया॥ रयणपरिक्खायाम्, ९८

[2] गरुड़पुराणम्, अ. ७२

[3] कल्पान्तकालक्षुभिताम्बुराशेर्निह्रादकल्पाद्दितिजस्य नादात्।
वैदूर्य्यमुत्पन्नमनेकवर्णं शोभाभिरामद्युतिवर्णबीजम्॥ गरुड़पुराणम्, ७३/२

[4] अग्निपुराणम्, २४६/१५

[5] रत्नविमर्श:, पृ. २०५

[6] वैदूर्य उत्पलवर्ण: शिरीषपुष्पक: उदकवर्णो वंशराग:।
शुकपत्रवर्ण: पुष्परागो गोमूत्रको गोमेदक:। अर्थशास्त्रम्, २/२७/११, पृ. १२७

**रेवत्यश्विधनिष्ठासु हस्तादिषु च पंचसु।**
**शंङ्खविद्रुमरत्नानां परिधानं प्रशस्यते॥**[1]

अनेन प्रकारेण वक्तुं शक्यते यत् अग्निपुराणे १५ श्लोकेषु ३७ रत्नानां उल्लेखो वर्तते। परञ्च वज्र-मुक्ता-मरकत-स्फटिक-पद्मराग-इन्द्रनील तथा वैदूर्याणां रत्नानां वर्णनं संक्षिप्तरूपेणैव प्राप्यते। पुराणेषु अन्यतमे गरुड़पुराणे रत्नशास्त्रस्य विशद्वर्णनं प्राप्यते तथापि अग्निपुराणस्य रत्नविषयकवर्णनं महत्त्वपूर्णमस्ति।

**रत्नधारणस्य प्रयोजनम्**

रत्नधारणस्य किं प्रयोजन्? विषयेऽस्मिन् अग्निपुराणे वर्णितमस्ति यत् -

**सुवर्णप्रतिबद्धानि रत्नानि श्रीजयादिके।**[2]

साधारणतया रत्नधारणं शुभतायाः मङ्गलस्य च प्रतीकं मन्यते। यदि कोऽपि मनुष्यः रत्नं संस्पृश्य प्रसन्नः भूत्वा गृहात् प्रस्थानं करोति, तदा तस्य सर्वाः मनोकामनाः पूर्णाः भवन्ति।[3] इतोऽपि रत्नधारणाद् सूर्यादिभ्यः नवग्रहेभ्य उत्पन्नाः समेषां कष्टाः नष्टाः भवन्ति। तथा च दीर्घायुरारोग्योः प्राप्तिर्भवति। रत्नं सौभाग्योदयकारकं तथा च धारणकर्तारं शुभमनुकूलं फलं प्रददाति। येन रत्नधारकं धैर्योत्साहस्य प्राप्तिर्भवति। भूतपिशाचादयश्च न प्रभावयन्ति।[4] एवं प्रकारेण स्वकान्तिवर्णाभाभिः युक्तं निर्दोषरत्नं लक्ष्मीपुष्टिकीर्तिशौर्यायुष्यं च प्रददाति।[5]

---

[1] अग्निपुराणम्, १२१/३२

[2] अग्निपुराणम्, २४७/७

[3] नास्पृष्ट्वा रत्नाज्यपूज्यमंगलसुमनसोभि निष्कामेत्। चरकसंहितायाम्, ८/२२
धन्यं मंगल्यमायुष्यं श्रीमद्व्यसनसूदनम्।
हर्षणं काम्यमोजस्य रत्नाभरणधारणम्॥ चरकसंहितायाम्, सूत्रस्थानम्, ५/९७

[4] सूर्यादिनिहानिग्रहापरहणं दीर्घायुरारोग्यदं
सौभाग्योदयभाग्यवश्यविभवोत्साहप्रदं धैर्यकृत्।
दुश्छायाचलधूलिसंगतिभवाऽलक्ष्मीहरं
सर्वदा रत्नानां परिधारणं निगदितं भूतादिनाशनम्॥ रसरत्नसमुच्चयः, ४/८३

[5] यथावर्णं यथाच्छायं रत्नं यद्दोषवर्जितम्। श्रीपुष्टिकीर्तिशौर्यायुष्करमन्यदसत्॥ शुक्रनीतौ, ४/२/५१

एवं माणिक्यादिरत्नधारणेन विविधकष्टेभ्य: मुक्तिर्भवति। अत: कष्टनिवृत्यर्थं सूर्याद्यानवग्रहान् अनुकूलङ्कर्तुं रत्नमवश्यं धारणीयम्।[1] शकुनविज्ञानेऽपि रत्नानां दर्शनमत्यन्तं लाभप्रदं निर्दिष्टम्।[2]

तत्रोक्तमस्ति प्रयाणकाले यदि रत्नदर्शनं भवेत् तदा मङ्गलशकुन: भवति। मणिधारणेन श्रेष्ठत्वं प्राप्यते।[3] तथेदं शत्रूणां पराजयकत्रि दुष्टानां नाशकत्रि भवति। अत: शत्रूणां नाशार्थं राष्ट्रोन्नत्यर्थं मणिधारणमवश्यं करणीयम्।[4] अस्य धारणेनैव इन्द्रदेवस्योन्नति: जाता।[5]

आयुर्वेदग्रन्थेष्वस्य महिमा भस्मपिष्टिरूपेण अतिप्रसिद्धोस्ति। सहस्रेभ्य: वर्षेभ्य: रत्नानां रसायनक्रियया असाध्यरोगाणां निवृत्यर्थं प्रयोग: क्रियते। रत्नानि कथमस्मान् लाभं ददति? एतेषां प्रयोगोऽस्माभि: किमर्थं क्रियते? रत्नानि तु केवलं सौन्दर्यनियामकानि तानि भाग्यवर्धकानि न भवितुं शक्नुवन्ति। समाजस्य बौद्धिकवर्गेण एतादृशा: अनेके प्रश्ना: तर्काश्च प्रस्तूयन्ते। एतादृशानां प्रश्नानां प्रत्युत्तरे तत्रोच्यते, यत् मुख्यरूपेण ग्रहाणां संख्या सप्त वर्तते। राहुकेतौ तमोग्रहौ मन्येते। इत्थं सूर्यात् नि:सृतरश्मिणां संख्याऽपि सप्त एव वर्तते। एता: सप्तरश्मय: विशिष्टवर्णैराच्छादित:, यत् श्वेतादिनां सप्तवर्णानां प्रतिनिधित्वं कुर्वन्ति। भारतीयज्यौतिषशास्त्रे सप्तग्रहानामपि विशिष्टवर्णा: निर्धारिता: सन्ति। यथा - सूर्यस्य रक्त-श्यामोऽर्थात् पाटलवर्ण:, चन्द्रमस: श्वेत:, भौमस्य रक्तगौर:, बुधस्य दूर्वाऽर्थात् हरित्, गुरो: गौरवर्ण:, शुक्रस्य सितोऽर्थात् उज्ज्वल:, शने: कृष्ण:, राहोरतिनील:, केतो: विचित्रद्युतिरर्थात्

---

[1] हिन्दूओं का रत्न विज्ञान, पं. जानकीनाथ शर्मा, हिन्दू-संस्कृति अंक, कल्याण।

[2] सुवर्णे दिव्यरत्ने च वीणायां पटहे तथा।
बद्धे चैव पशौ दृभटे यात्रा भवति सिद्धिदा॥ चरकसंहितायाम्, ४/६६

[3] स मायमधिरोहतु मणि: श्रेष्ठयाय मूर्धत:। अथर्ववेद:, १०/३/६/३१

[4] अभीवर्तो अभिभव: सपत्नक्षयणो मणि:।
राष्ट्राय मह्यं बहयतां सपत्नेभ्य: पराभुवे॥ अथर्ववेद:, १/२९/४

[5] अभीवर्तेन मणिना येनेन्द्रो अभिवावृधे।
तेनास्मान् ब्रह्मणस्पतेऽभि राष्ट्राय वर्धय॥ अथर्ववेद:, १/२९/५

नानावर्णमिश्रित: वर्णो भवति।[1] एतेषां वर्णानामनुरूपं सर्वेषां ग्रहाणां रत्ननिर्धारणं कृतमस्ति। ''यत्पिण्डे तद्ब्रह्माण्डे'' इत्याधारेण मन्यन्ते यत् सृष्टौ यत् किमपि घटनाक्रमो भवति तत् मनुष्योऽपरि अन्योऽन्याश्रित-सम्बन्धकारणात् अवश्यं प्रभावयति। अत: जातकेन यत् रश्मय: बलं वा जन्मकाले न प्राप्तं तदेतेषु रत्नेषु निहितवर्णेभ्य: रासायनिकसम्मिश्रणेभ्यरुत्पन्नं कर्तुं शक्यते, येन ग्रहा: स्ववास्तविकं बलं पुन: प्राप्नुयु: तथा जातकायानुकूला: भवेयु:। केचन विद्वांसोऽस्य खण्डनं कृत्वा तर्कं प्रस्तुवन्ति यत् लघुखण्डेन रत्नं सम्पूर्णशरीरं तथा च आकाशीयबृहद्ग्रहान् कथं नियन्त्रितं कर्तुं तथा च बलं प्रदातुं शक्यते? तत्र आधुनिकविज्ञाने तु वयं वक्तुं शक्नुम: यत् अमुक टेबलेट शरीरान्तस्थ अमुक स्थानङ्गत्वा अमुक रोगं दूरङ्कर्तुं शक्नोति, परञ्च रत्नमेकं विशालं ग्रहम् अतिदूरात् कथं बलप्रदानं करिष्यति? अस्य प्रत्युत्तरे उच्यते यत् ग्रहाणां रश्मयोऽस्मान् प्राकृतिकरूपे प्राप्यन्ते, परञ्च ता: रश्मयोऽस्माकं शरीरस्थ त्वक्-रूपी बाह्यावरणेन अवरुद्ध्यन्ते। येन रश्मिणां बलमाप्तुं बाधा उत्पद्यते। परञ्च रत्नं पारदर्शी भवति, तत् ग्रहशरीरयोर्मध्ये योजकरूपत्वेन कार्यं कर्तुं शक्नोति। यतोहि विज्ञानस्य सर्वमान्यसिद्धान्तोऽयं वर्तते यत् दर्पणात् गच्छन् कोऽपि रश्मि: परिवर्तितो न भवति, अपितु निर्विकारस्पृश्यनाडीतन्त्रमान्दोलयति, तेन शरीरे ग्रहै: यद्बलं जन्मकालेऽपूर्णमासीत्, तस्य पूर्ति: कर्तुं शक्यते।

**रत्नधारणस्य विधानम्**

रत्नधारणविषये प्रामुख्येन मतद्वयं विज्ञैरङ्गीकृतम्। प्रथममङ्गुलीयकरूपेणाङ्गुलीषु हस्ते धारणीयं, द्वितीयं स्रग्रूपेण इति ग्रीवायां धारणम्। गलप्रदेशे लॉकेटरूपेण इति धारणमित्यस्य कृते विदुषां तर्कोऽयं यत् ग्रीवायां धारणेन रत्नं सदैव हृदयसन्निकटे तिष्ठति, तथा हृदयमेव सम्पूर्णशरीरस्य तथा जीवनस्य सञ्चालनङ्करोति। यदि रत्नं हृदयसमीपे भविष्यति तर्हि ग्रहै: प्रदत्त: रश्मय: शरीरस्य मुख्याङ्गेन हृदयेन सम्बद्धङ्करिष्यन्ति, तदाऽपेक्षाकृताधिकाधिकप्रभावो भविष्यति। एवमेव विद्वांस: वदन्ति यत् लॉकेटरूपेण धारणेन रत्नस्य लाभोऽपि भवति।

[1] जातकपारिजात:, ग्रहस्वरूपगुणाध्याय:, श्लोक: ७

स्नानकाले रत्नस्पृष्टं जलं सम्पूर्णं शरीरं प्रक्षालयति। येन रत्ननिहितसम्पूर्णशक्तीनां प्राप्तिर्भवति। अत: रत्नधारणं गलप्रदेशे लॉकेटरूपेण कर्तव्यमुचितमेव।

द्वितीयमते केचन् विद्वांस: रत्नमङ्गुलीयकरूपेण हस्ते धारणस्य मतं प्रस्तुवन्ति। मतस्यास्य मण्डनकर्तृणां तर्कोऽस्ति यत् अङ्गुल्यां धारणाद् रत्नं शरीरं सदैव स्पर्शं करिष्यति येन ग्रहै: प्रदत्तरश्मिणां सम्पर्कं भविष्यति, परञ्च लॉकेटरूपेण धारणाद् रत्नं सदैव शरीरं स्पर्शं न करिष्यति, बारम्बारं शरीराद् विच्छेद: भविष्यति। यथा बारम्बारं विद्युद्विच्छेदेन सम्बन्धितोपकरणं निरन्तरतया सञ्चालयितुं काठिन्यमुद्भवति तद्वद् अत्रापि सैव प्रक्रिया अनुसर्तव्या। यदि बारम्बारं रत्नानां शरीराद् विच्छेदो भविष्यति तदा रत्नानां समुचितप्रभाव: जातकेभ्य: न प्राप्यते। तथा च अङ्गुलीयके सदैव शरीरे स्पर्शं करिष्यति। अतोऽङ्गुलीयकरूपेणाङ्गुलीषु रत्नधारणं कर्तव्यम्।

अस्मिन्नेव क्रमेऽस्य मतस्य पुष्टिर्भवति यत् प्राचीनकाले धनाढ्यवर्ग: एव रत्नधारणं अकरोत्। तस्मिन् काले अधोवस्त्रातिरिक्तम् ऊर्ध्ववस्त्ररूपेण उत्तरीयस्य प्रचलनमासीत्। अत: ते रत्नं हृदयसन्निकटे मालारूपेण ग्रीवायां धारणं कुर्वन्ति स्म। परञ्च वर्तमानकाले वस्त्रशैल्यां परिवर्तनं जातमस्ति। वस्त्रावरणं ग्रहै: प्रदत्तरश्मय: रत्नं प्रति गमनाद् अवरोधङ्करोति। अतोऽङ्गुलीयकरूपेण रत्नधारणस्य प्रचलनम् अभवत् यत् युक्तियुक्तमस्ति।

अस्माकं मते सिद्धान्तद्वयमपि सम्यक्। रत्नधारणं कुत्र कर्तव्यमित्येव केवलं नास्ति विचारणीयो विषय: अपितु रत्नस्य शुद्धताया: निर्दुष्टताया: आकारस्य चापि निर्णय: महत्वपूर्ण: भवति। रत्नधारणाद् पूर्वं केचन विद्वांस: रत्नं हस्तेऽथवा स्वसमीपे संस्थाप्य किञ्चित् कालं यावत् परीक्षणस्य निर्देशं कुर्वन्ति। उपर्युक्तपद्धतय: कथं कार्यं करिष्यन्ति? तदर्थं रत्नधारणे शुद्धता, निर्दुष्टता, समुचिताकार: च अत्यन्तम: अपेक्षते। यतोहि दोषयुक्तानुचिताकारयो: रत्नस्य धारणाद् हानिर्भवति।

**राश्यानुसारं रत्नधारणम्**

अस्मिन् सन्दर्भे सूर्यचन्द्रराशिद्वययोः कृते मतभेदोऽस्ति। पाश्चात्य जगति सूर्यराशेः प्रामुख्यमस्ति, परन्तु भारतीयज्यौतिषं चन्द्रराशिं प्रमुखं स्वीकरोति। वयमवलोकयामश्चेत् सूर्यराशेः प्रभावः चन्द्रराशेरपेक्षया न्यूनं भवति। अस्य कारणानां विवेचनं क्रियते चेत् शास्त्रेषु सूर्य आत्मनः चन्द्रमाः मनसः कारकमस्ति, तथा च शरीरे मनसः प्रभावो आत्मनोऽधिकं भवति। द्वितीयमते चन्द्रमा भूमेः सर्वाधिकसन्निकटोऽस्ति। चन्द्रमसः गतिरपि तीव्रा अतः चन्द्रराशिं स्वीकुर्मश्चेत् उत्तमं भविष्यति। केचन नामराशेराधारेणापि रत्ननिर्धारणं कुर्वन्ति। अस्मिन् विषये तर्कोऽयमस्ति यत् यदि जन्मराशेर्ज्ञानं न भवेत् तदा नामराशेर्ग्रहणं कर्तव्यम्। येन नाम्ना प्रसुप्तो बुध्यते। जागृतं भवेत् वा तद् नामराशेर्ग्रहणं नास्ति इति असङ्गतम्। सर्वमान्यसिद्धान्तानुसारं यदि चन्द्रराशेर्ज्ञानमस्ति तदा चन्द्रराशिरेव स्वीकर्तव्यः। अस्याभावे नामराशेर्ग्रहणम्। प्रत्येकराशेः स्वामि-ग्रहाधारेण रत्नं निर्धारितमस्ति, यत् बलं प्रदात्तुं समर्थोऽस्ति।

**सन्दर्भग्रन्थाः**

1. अग्निपुराणम्, चौखम्बासंस्कृतसंस्थानम्, वाराणसी, १९९८ ई.
2. अर्थशास्त्रम्, कौटिल्यप्रणीतम्, वाचस्पतिगैरोला, चौखम्बाविद्याभवनम्, वाराणसी, २००० ई.
3. अमरकोषः, अमरसिंहः, चौखम्बासंस्कृतसंस्थानम्, वाराणसी, वि. सं. २०७२
4. आयुर्वेदप्रकाशः श्रीमाधवविरचितः, चौखम्बाविद्याभवनम्, वाराणसी, १९६२ ई.
5. ऋग्वेदः, नागप्रकाशनम्, जवाहरनगरम्, नवदेहली, २००० ई.
6. कुमारसम्भवम्, चौखम्बासंस्कृतसीरिजः, वाराणसी, २०१३ ई.
7. गरुड़पुराणम्, कृष्णद्वैपायनव्यासविरचितम्, वेंकटेश्वरप्रेस, मुम्बईनगरम्, २००९ ई.
8. चरकसंहिता, चरकः, सं.-डॉ ब्रह्मानन्द त्रिपाठी, चौखम्बा सुरभारतीय प्रकाशन, २००० ई.
9. जातकपारिजातः, श्रीदैवज्ञवैद्यनाथविरचितः, टीका- श्रीकपिलेश्वर शास्त्री, चौखम्बा संस्कृत संस्थान, वाराणसी, २०१३ ई.

10. श्रीमद्देवीभागवतम्, खेमराजश्रीकृष्णदासः, लक्ष्मीवेंकटेश्वरप्रेस, कल्याणम्, मुम्बई, २०१८ ई.
11. नैषधीयचरितम्, श्री हर्षः, निर्णयसागरप्रेस, बम्बई नगरम्, १९५३ ई.
12. बृहत्संहिता, भाग-१, सं. कृष्णचन्द्रद्विवेदीः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, १९९६ ई०
13. बृहत्संहिता, भाग-२, सं. कृष्णचन्द्रद्विवेदीः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, १९९६ ई०
14. भावप्रकाशः, श्रीजीवनाथदैवज्ञप्रणीतः, व्याख्याकारः श्री पं पुष्पलाल झा, चौखम्बा संस्कृत सीरीज आफिस, वाराणसी, १९९८
15. मत्स्यपुराणम्, श्री लक्ष्मीवेंकटेश्वर प्रेस, बम्बई, सं. १९८० ई.
16. मुहूर्तचिन्तामणिः, रामदैवज्ञः, व्या.- विन्ध्येश्वरी प्रसाद द्विवेदी, डॉ. ब्रह्मानन्द त्रिपाठी, चौखम्बा सुरभारती प्रकाशन, वाराणसी, २००९
17. युक्तिकल्पतरुः, भोजराजविरचितः, प्रतिभाप्रकाशनम्, नवदेहली, २००८ ई.
18. रसरत्नसमुच्चयः, वाग्भट्टाचार्यविरचितः, चौखम्बासंस्कृतसंस्थानम्, वाराणसी, २०१९ ई.
19. रत्नविमर्शः, सुरेन्द्रकुमारपाण्डेयः, इलाहाबाद, २००० ई.
20. रयणपरिक्खा, रत्नपरीक्षादिसप्तसंग्रहः, राजस्थानप्राच्यविद्याप्रतिष्ठानम्, १९६१ ई.
21. रत्नप्रदीपः, डॉ गौरीशंकरकपूरः, गोयल एण्ड कम्पनी, दिल्ली, १९७४ ई.
22. रत्नपरिचयः जगन्नाथभसीनः, रंजन पब्लिकेशन्स, नई दिल्ली, १९९७ ई.
23. रत्नप्रकाशः, ले. राजरूपटांकः, दुलीचन्दटांकः, जौहरीबाजारः, जयपुरम्, वि.सं. २०३५
24. रसतरंगिणी, चौखम्बासुरभारतीप्रकाशनम्, वाराणसी, २०१९ ई.
25. शुक्रनीतिः, स्वामी जगदीश्वरानन्द सरस्वती, ऋषि देवीलाल रूपलाल कपूर धर्मार्थ ट्रस्ट (सोनीपत-हरियाणा), १९८३ ई.
26. संस्कृत-शब्दार्थ कौस्तुभम्, रामनारायण लाल, इलाहाबाद, १९५७ ई.
27. संस्कृतहिन्दीशब्दकोशः, वामनशिवरामआप्टे, मोतीलालबनारसीदास पब्लिशर्स प्राइवेट लिमिटेड, नईदिल्ली, २००७ ई०

28. हलायुधकोषः, सम्पा-जयशंकर जोशी, सरस्वतीभवन, वाराणसी, १८७९ ई.

29. हिन्दूधर्मकोशः, डॉ. राजबली पाण्डेय, उत्तर प्रदेश हिन्दी संस्थान, लखनउ, १९७८ ई.

30. हिन्दूओं का रत्न विज्ञान, पं. जानकीनाथ शर्मा, हिन्दूसंस्कृतिअंक, कल्याणविशेषांकः, गीताप्रेस, गोरखपुरम्, १९५० ई.

❑ ❑ ❑

**महस्विनी – विद्वत्समीक्षिता सन्दर्भिता च शोधपत्रिका (ISSN: 2231-0452)**
**कुसुमम् :** जनवरी – डिसेम्बर २०२१ **सम्पुटम् :** संयुक्तम् (१,२)

# पाणिनीयव्याकरणे अतिदेशविचारः

**डॉ. नरेशकुमारबैरवा***

**शोधसारः –**

पाणिनीयव्याकरणे 'अतिदेशविचार' इति विषयमवलम्ब्य शोधपत्रमिदं लिखितम्। अत्र अतिदेशस्य किं स्वरूपं, लक्षणं तद्भेदाश्चेति निरूपिताः। तत्र विशेषतः व्याकरणशास्त्रेऽतिदेशस्य किं स्वरूपं, किं वैशिष्ट्यं च पाणिनिना प्रणीतानि सूत्राण्येव दृश्यन्ते तत्र कानिचित्सूत्राणि वत्यन्तघटितानि अथ च कानिचित् सूत्राणि वत्यनन्तघटितानि तानि सूत्राणि निरूपितानि। यतोहि अतिदेशशास्त्रमारोपबोधकं शास्त्रं वर्तते। अत एव सामान्यत उच्यमाने सति यत्सर्वत्र अतिदेशस्थले यदि तृतीयान्ताद् वतिः स्यात्तर्हि तत्स्थानिककार्याणि प्रवर्तन्ते, तन्निमित्तककार्याणि च अतिदिश्यन्ते। यथा - काभ्याम्, रामाभ्याम् चेत्यादि। यत्र च वतिः षष्ठ्यन्तविहितोऽस्ति, तत्र स्वस्यैव यदागमादेशादिकार्यं तदेवातिदिश्यते, न तु स्वनिमित्तकम्। यथा- लोटोलङ्वत् इत्यादिसूत्रेण ज्ञायते। अनेन सकलव्याकरण-शास्त्रेऽतिदेशविषये बहुनि स्थलानि वैशिष्ट्यानि च सन्ति। अत्र तु किञ्चित् दिङ्मात्रमेव प्रस्तुतम्।

**पारिभाषिकशब्दाः –** अतिदेशः, वतिघटितत्वम्, वत्यघटितत्वम्, स्थानी, आदेशः, सञ्ज्ञा, परिभाषा, अधिकारः, नियमः, सूत्रम्।

**भूमिका-** **अर्थप्रवृत्तितत्त्वानां शब्दा एव निबन्धनम्।**
**तत्त्वावबोधः शब्दानां नास्ति व्याकरणादृते।।**[1]

---

* सहायकाचार्यः, व्याकरणविभागः, वेदवेदाङ्गपीठम्, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृत-विश्वविद्यालयः, नवदेहली।

[1] वाक्यपदीयम्, ब्रह्मकाण्डम्, कारिका-13

भारतीयशास्त्रीयपरम्परायां व्याकरणशास्त्रस्य वेदाङ्गत्वं स्वत एव सिद्धः। यतो हि श्रुतिमूलकत्वादस्यैव वेदाङ्गत्वं स्वीक्रियते व्याकरणेनैव शब्दज्ञानं भवति। शब्दज्ञानविषये वाक्यपदीये हरिणा प्रोक्तम् -

**तद्द्वारमपवर्गस्य वाङ्मलानां चिकित्सितम्।**
**पवित्रसर्वविद्यानामधिविद्यं प्रकाशते।।**[1]

अनया कारिकया स्पष्टं यत् व्याकरणं मोक्षस्य द्वारमपि वर्तते तथा वाङ्मलानां चिकित्सावत् परिशोधनं क्रियते। यतोहि व्याकरणज्ञो प्रत्यवायहेतुभूतानपभ्रंशान्न प्रयुज्यते। "ज्ञानं हि तस्य शरणम्" इत्युक्तम्। यथोक्तमपि -

**यदधीतमविज्ञातं निगदेनैव शब्द्यते।**
**अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित्।।**
**आपः पवित्रं परमं पृथिव्यामपां पवित्रं परमं च मन्त्राः।**
**तेषां च सामर्ग्यजुषां पवित्रं महर्षयो व्याकरणं निराहुः।।**[2]

अधिविद्यं प्रकाशत इति सर्वो हि शास्त्रकृत्प्रायेण विद्यायामस्यां व्याकरणमनुसरति। अतो व्याकरणं सर्वात्मना आराधनीयमेव। साधुशब्दानां ज्ञानं व्याकरणादेव लभ्यते। भाषायाः तत्त्वबोधार्थं, स्वरूपज्ञानार्थं व्यवहारार्थं च प्रथमस्तावच्छब्दस्य ज्ञानमपरिहार्यमेव। साधुशब्दज्ञानं विना भाषायाः व्यवहारेऽपि न प्रचलति। अत एव भर्तृहरिणा शब्दा एव अर्थप्रवृत्तितत्त्वानां निबन्धरूपेणोपवर्णिताः। अतः सकलव्यवहारहेतुभूतशब्दनिष्पत्तौ भगवता पाणिनिना अष्टाध्यायी इत्याख्यग्रन्थः प्रणीतः, तत्र चोत्सर्गापवादप्रक्रियामाश्रित्य समग्रेऽपि शब्दाः साधिताः। यदि शब्दप्रतिपत्तये प्रतिपदं पाठः क्रियते तदा "बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच नान्तं जगाम बृहस्पतिश्च प्रवक्ता

---

[1] वाक्यपदीयम् (ब्र.का.), कारिका-14, पृ.37
[2] वाक्यपदीयस्य स्वोपज्ञवृत्तौ निरूपितम्। पृ.38

इन्द्रश्चाध्येता दिव्यं वर्षसहस्रमध्ययनकालः नान्तं जगाम किं पुनरद्यत्वे यः सर्वथा चिरं जीवति वर्षशतं जीवति।"[1] इति भाष्योक्त्यनुसारं शब्दप्रतिपत्तिः खपुष्पायितमेव स्यादतः भगवान् पाणिनिः वैदिकलौकिकोभयशब्दसाधकं किमप्यपूर्वं शब्दशास्त्रं रचयामास। यत्रोत्सर्गापवादप्रक्रियामाश्रित्य भूयांसोऽपि शब्दाः लघुपायेनैव ज्ञायन्ते। व्याकरणशास्त्रं च पाणिनीयं सूत्रात्मकमेव प्राञ्चो महर्षयः सूत्रात्मकशैल्यैव व्याकरणन्यायमीमांसादिशास्त्राणि व्यरचयन्। यथा जानन्त्येव पाणिनीयाष्टाध्याय्याम् अष्टावध्यायाः सन्ति प्रत्यध्यायञ्च चत्वारः पादाः विलसन्ति। व्याकरणस्यास्य लाघवं वैज्ञानिकत्वं चाकलय्य न केवलं भारतीया अपितु वैदेशिका अपि चकितचकिताः भूत्वा अमुं ग्रन्थं मुक्तस्वरेण प्रशंसन्ति। इदमेव वैशिष्ट्यं संस्कृतभाषाया एव यतोहि सहस्रवर्षेभ्यः प्राक् या भाषा येन प्रकारेण भण्यते स्म तेनैव प्रकारेण तां भाषां वयं साम्प्रतं व्यवहारपथम् आनयामः। इदञ्च श्रेयः संस्कृतभाषाया एव नान्यस्याः कस्याश्चन भाषायाः। व्याकरणादेव साधुशब्दज्ञानं भवति। भाष्यकारेण व्याकरणस्य लक्षणं प्रोक्तम् – "लक्ष्यलक्षणे व्याकरणम्" इति। लक्ष्यः शब्दः। लक्षणं सूत्रम्, एतत्समुदितं व्याकरणं भवति।

**सूत्रलक्षणम् -**

इदमेव व्याकरणम् अल्पाक्षरत्वे सति सकलार्थबोधकं सारभूतं यत्तत्सूत्रमिति कथ्यते। उक्तमपि-

**अल्पाक्षरमसन्दिग्धं सारवद्विश्वतोमुखम्।**
**अस्तोभमनवद्यञ्च सूत्रं सूत्रविदो विदुः।।**[2]

एवमेव आचार्यवाचस्पतिना प्रोक्तं सूत्रलक्षणविषये –

---

[1] व्याकरणमहाभाष्यम्, पस्पशाह्निकम्, पृ.19, शास्त्री चारुदेवः, मोतीलाल बनारसीदासः, दिल्ली

[2] विष्णुधर्मोत्तरपराशरपुराणे लिखितम्

**लघूनि सूचितार्थानि स्वल्पाक्षरप्रदानि च।**
**सर्वतः सारभूतानि सूत्राण्याहुर्मनीषिणः।।**[1]

अतः सूत्राणि स्वल्पाक्षरवन्त्यपि विश्वतोमुखानि विस्तृतार्थप्रतिपादकानि सन्ति।

**सूत्रभेदाः -**

इमानि सूत्राणि सञ्ज्ञापरिभाषाविधिनियमातिदेशाधिकारभेदेन षड्विधानि भवन्ति। प्रोक्तमपि-

**सञ्ज्ञा च परिभाषा च विधिर्नियम एव च।**
**अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणम्।।**[2]

**सञ्ज्ञासूत्रम्-**

कस्यचिदपि पदार्थस्य व्यवहारविषयता सञ्ज्ञामन्तरा भवितुं नार्हति शास्त्रेऽपि शास्त्रीयव्यवहाराय अनेकाः सञ्ज्ञाः विहिता सन्ति। सम्भवे सति टि-घु-भादयः अव्ययः क्वचिच्च यौगिकार्थमादाय अव्ययादिसञ्ज्ञाः क्वचिच्च श्रुतिमृषादिषूक्तत्वात् धातुप्रातिपदिक-सञ्ज्ञाश्च कृतास्सन्ति।

**परिभाषासूत्रम्-**

तथापि यथासम्भवं लघीयसी एव सरणिरासृतास्ते "सञ्ज्ञा न नाम यतो लघीयः" इत्याद्युक्तेः। अतः विध्येकवाक्यतयैव। अतः स्वीयदेशे लक्ष्यसंस्कारोपयोगिवाक्यार्थ-बोधजनकत्वे सति विधिशास्त्रैकवाक्यतया महावाक्यार्थबोधजनकत्वमेव परिभाषाणां भवति। आचार्यनागेशभट्टेन परिभाषेन्दुशेखरे प्रतिपादितं यत्- "परिभाषा पुनरेकदेशस्था सती सर्वं

[1] ब्रह्मसूत्रभाष्ये, वाचस्पतिमिश्रेण लिखितम्- 1.1.1
[2] लघुशब्देन्दुशेखरव्याख्याने अभिनवचन्द्रिकायां वरवर्णिन्यां च समुद्धृता - पृ. 10

शास्त्रमभिज्वलयति, यथा प्रदीपः सुप्रज्वलितः सर्वं वेश्माभिज्वलयतीति"[1] परिभाषायाः स्वरुपं वर्तते। अपरं च - "सञ्ज्ञाभिन्नत्वे सति शब्दधर्मिकसाधुत्वप्रकाराप्रामाण्यज्ञानानास्कन्दित-बोधोपयोगिबोधजनकत्वं परिभाषात्वम्।" अधिकारसूत्राण्यपि विध्युपकारकाण्येव, इमानि च त्रिधाविभक्तानि यथोक्तं षष्ठी स्थानेयोगा इति सूत्रस्य भाष्ये - "कश्चिदेकदेशस्थः सर्वं शास्त्रमभिज्वलयति यथा प्रदीपः सर्वं वेश्माभिज्वालयति। अपरोऽधिकारो यथा रज्ज्वा, अयसा वा बद्धं काष्ठमनुकृष्यते तद्वदनुकृष्यते चकारेण अपरोऽधिकारः प्रतियोगं तस्यानिर्देशार्थः इति योगे योगे उपतिष्ठते"[2] इत्युक्तम्। अत उत्तरोत्तरसूत्रसम्बन्धत्वं यस्य तस्यैव अधिकारत्वम् इति वक्तुं शक्यते।

## विधिसूत्रम्-

विधिशास्त्रस्य तु अपूर्वविधायकत्वेनैव विधित्वम्। विधिशास्त्रं प्रकारान्तरेण अप्राप्तप्रापकं सूत्रं विधिसूत्रमित्युच्यते। विधीयते इति विधिः, कार्यम्, तच्च व्याकरणे प्रायशः प्रत्ययागमादेशरूपम्।[3] तेन विधिसूत्राणि त्रिविधानि सन्ति- प्रत्ययागमादेशविधिभेदात्। यथा- "इको यणचि"[4] इति शास्त्रमचि सति इकः स्थाने यणं विधत्ते, अचीति लिङ्गमाश्रित्य

---

[1] परिभाषेन्दुशेखरः, नागेशभट्टप्रणीतः, पृ. 8, चौखम्बासुरभारतीप्रकाशनम्, वाराणसी।

[2] व्या.म.भा. प्रथमो भागः, पृ. 410

[3] पृथक् प्रयोगानर्हं परसंसर्गेण अर्थप्रत्यायकमक्षरमक्षरसमुदायो वा प्रत्ययः इति उच्यते। यस्मिन् प्रत्ययः संसृज्यते सा प्रकृति। यथा घटत्वम् इत्यत्र घटः शब्दः प्रकृतिः त्व इत्यक्षरसमुदायः प्रत्ययः। प्रतिनवस्य वर्णस्य योजनमागमः। स्थितं वर्णमपनीय तत्स्थाने विहितमक्षरम्, अक्षरसमुदायो वा आदेशः। आदेशोऽपि भावरूप अभावरूपश्चेति द्विविधः। यस्य कार्यस्य सत्ता लक्ष्ये दृश्यते तत्कार्यं भावरूप आदेशः। अस्य इको यणचि इत्यादीन्युदाहरणानि। यस्य तु सत्ता लक्ष्ये न दृश्यते स अभावरूप आदेशः। अस्यैव लोप इति व्यवहारः। अत एव आगमविपरीतः स्थितस्य नाशरूप आदेशः एव लोप इत्युच्यते इत्युक्तमभियुक्तैः। इति। लघुपाणिनीयभूमिका- पृ.1-2

[4] पा.सू. 6.1.77

“तस्मिन्निति निर्दिष्टे पूर्वस्य”[1] इति शास्त्रमत्र अव्यवहितत्त्वं पूर्वत्वं च उपस्थापयति तथा सति “अजव्यवहितपूर्वत्वविशिष्टस्येकः यण्” इति वाक्यार्थबोधो जायते। अतः अपूर्वविधायकत्वं विधेः सुस्थमेव।

## नियमसूत्रम्-

नियमसूत्राणां विधिमुखेन प्रवृत्तिः, निषेधमुखेन प्रवृत्ति इति प्रकारद्वयं वर्तते। तत्राद्यपक्षे येन विधिशास्त्रेण सिद्धे सति नियमसूत्रं प्रारभ्यते। तत्र नियामकशास्त्रीयोद्देश्यतावच्छेदकधर्मव्यापकः, नियम्य शास्त्रीयोद्देश्यतावच्छेदकधर्मव्याप्यश्च यः धर्मः, तदा अतिरिक्तविषयत्वेन सङ्कोचः क्रियते। यथा-“धातोस्तन्निमित्तस्यैव”[2], “वान्तो यि प्रत्यये”[3] इत्यत्र तादृशः धर्मः यादिप्रत्ययाव्यवहितपूर्वधात्ववयवैच्त्वरूपः, तदतिरिक्तविषयत्वं वान्तो यीति नियाम्यसूत्रस्य कल्प्यते। लव्यम्, ओयते  इत्यादौ च प्रयोगे वान्तो यि प्रत्यये इत्यस्य प्राप्तिर्न भवति तदा तेन सूत्रेण तत्र नियम्यते। यादिप्रत्ययनिमित्तकस्य धातोरेचः वान्तादेशं विधत्ते। अतोऽत्र विधिमुखेन प्रवृत्तिर्भवति। अन्यच्च निषेधमुखेन प्रवृत्तिः विधीयते। तत्र तन्निमित्तस्य इत्यस्य यादिप्रत्ययनिमित्तकभिन्ने, सूत्रार्थगते भवतीत्यस्य न भवतीत्यर्थे लक्षणा स्वीकार्या। अत ओयते इत्यत्र वान्तादेशनिषेधः कृतः। अन्यत्रापि नियमशास्त्रं तु नियमयति तथा वाक्यस्य प्रातिपदिकसञ्ज्ञा न प्राप्ता यथा- रामः गच्छतीत्यादौ वाक्ये तत्र “अर्थवदधातुरप्रत्ययः प्रातिपदिकम्”[4] इत्यनेन प्रातिपदिकसञ्ज्ञा प्राप्ता सती

---

[1] पा.सू. 6.1.66

[2] तत्रैव, 6.1.80

[3] तत्रैव, 6.1.79

[4] तत्रैव, 1.2.45

"कृत्तद्धितसमासाश्च"[1] इत्यनेन सूत्रेण नियम्यते तदा नियमो कृतः -"यत्र सङ्घाते पूर्वो भागः पदं तस्य चेद्भवति तर्हि वाक्यस्यैव"[2] इति।

**अतिदेशसूत्रम्-**

वस्तुतः वाक्यस्फोटस्यैव प्राधान्येन तदितरस्य सर्वस्यापि बुद्धिपरिकल्पितत्वमेव यथोक्तम् आचार्यभर्तृहरिणा वाक्यपदीये-

**पदे न वर्णाः विद्यन्ते वर्णेष्ववयवा न च।**
**वाक्यात् पदानामत्यन्तं प्रविवेको न कश्चन।।**[3]

अतः पदानां वाक्यानां वर्णानां वा अखण्डत्वमेवाङ्गीकर्तव्यम्। तत्र शब्दानां पदानां वाक्यानां वा कार्यत्वपक्षे नित्यत्वपक्षे वा सर्वं बुद्धिपरिकल्पितमपेक्षितमेव वर्तते। व्याकरणशास्त्रे अतस्मिन् तद्बुद्धिरिति तात्पर्येणारोपार्थकम् आदाय अस्य सन्धानतमिति विदितं जायते। अथवा आरोपबोधकशास्त्रमतिदेशत्वम्। यथा भाष्ये प्रोक्तं पतञ्जलिना " गुरुवत् गुरुपुत्रे वर्तितव्यम्" इति गुरौ यत्कार्यं तद् गुरुपुत्रेऽतिदिश्यते। एवमिहापि स्थानिकार्यमादेशेऽतिदिश्यते। शब्दकल्पद्रुमे आरोपार्थकता संगृहीता विद्यते।[4] तथाहि – अति+दिश्+घञ् इत्यत्र भावार्थे घञ्प्रत्ययो भूत्वा अतिदेश इति शब्दो निष्पद्यते।

**अतिदेशसूत्रस्य लक्षणं तत्स्वरूपञ्च -**

अन्यदस्यान्यत्र आरोपणमथवा आरोपबोधकं शास्त्रत्वमतिदेशत्वमिति लक्षणं कृतम्। यथा "इण्वदिकः"इत्यादि दुर्गादासः मलमासतत्त्वे लिखितम्-

---

[1] पा.सू. 1.2.46
[2] वै. सि.कौमुद्यायाः अजन्तपुल्लिङ्गप्रकरणे
[3] वाक्यपदीयम्, ब्र.का., कारिका- 63
[4] श.क.द्रु., भागः – 1, पृ. 26

**प्रकृतात् कर्मणो यस्मात् तत्समानेषु कर्मसु।**
**धर्मोऽतिदिश्यते येन अतिदेशः स उच्यते।।**

वाचस्पत्ये पुनरनुरूपं सङ्ग्रहणं संस्थापितं प्राप्यते-

**अन्यत्रैव प्रणीतायाः कृत्स्नाया धर्मसंहृतेः।**
**अन्यत्रैव कार्यतः प्राप्तिरतिदेश स उच्यते।।**
**प्रोक्तात् कर्मणो यस्मात् तत्समानेषु कर्मसु।**
**धर्मप्रवेशो येन स्यात् अतिदेश उच्यते।।**[1]

मीमांसाकोषे एतदर्थपरकत्वेन सर्वं वचनं संगृहीतं विद्यते।[2] तथाहि-

अतिदेशो नाम ये यत्र विहिता धर्माः तमतीत्य अन्यत्र तेषां देशो भवति। यथा लोके “देवदत्तस्य भोजनविधिं कृत्वा शालिसूपमांसापूपैर्देवदत्तो भोजयितव्यः” इति तमेव विधिं यज्ञदत्ते अतिदिशति देवदत्तवत् यज्ञदत्तः भोजयितव्यः इति। अन्यत्र विहितानां धर्माणां तत्सम्बन्धपरित्यागेन अन्यत्र सम्बन्धप्राप्तिफलकं शास्त्रम्। मीमांसान्याये आचार्यपादैः प्रतिपादितमतिदेशविषये-

**अन्यत्रैव प्रणीतायाः कृत्स्नाया धर्मसन्ततेः।**
**अन्यत्र कार्यतः प्राप्तिरतिदेशोऽभिधीयते।।**[3]

व्याकरणशास्त्रेऽपि अतिदेशविषये विचारः कृतः, तत्र वतिघटितत्वमतिदेशत्वम्। अवतिघटितत्वमतिदेशत्वम्। यथा- “द्विर्वचनेऽचि”, “असंयोगाल्लिङ्कित्” इत्यादौ वतेरदर्शनात् वत्यर्थघटितत्वमतिदेशत्वं केचित् मन्यन्ते।

---

[1] वाचस्पत्यम्, भागः 1, पृ. 100
[2] मी.कौ., भा. 1, पृ. 110 (अतिदेशेखण्डः)
[3] न्या.को. पृ. 5 (परिशिष्टं भा. पृ. 2)

अपरे तु आरोपबुद्धिप्रयोजकत्वमित्येद ब्रुवते, ते आरोपस्य तद्भूतत्वाभावेऽपि क्षतिविरहः, यतो हि आहार्यत्वबाधसमकालिकेच्छाजन्यज्ञानत्वरूपस्वीकारात्। अत एव व्याकरणशास्त्रे देवदत्तहन्तृहतन्यायः प्रवर्तते। बौद्धार्थमस्वीकृत्य वस्तुसत्तारूपार्थे स्वीकृते तु न्यायावसरो नैव सम्भवेत्। अतिदेशस्य चायं स्वभावो यत् "यन्निमित्तवैकल्य-प्रयुक्तोपदेशोऽप्रवृत्तौ अतिदेशो मृग्यते तस्यैव अतिदेशत्वमिति" तथा च अतिदिश्यमानधर्मविरुद्धस्वाश्रयकार्याभावस्यैव अतिदेशत्वमुच्यते।

**अतिदेशभेदाः –**

अतिदेशः सप्तविधो भवति। यथोक्तम्-

**कार्यरूपनिमित्तार्थशास्त्रतादात्म्यशब्दिताः।**
**व्यपदेशश्च सप्तैतानतिदेशान् प्रचक्षते।।**[1]

एतेषां चोदाहरणानि क्रमशो प्रस्तूयते। यथा-

**सामान्यातिदेशः –** गुरुवत् गुरुपुत्रे वर्तितव्यम्

**रूपातिदेशः –** तृज्वत्क्रोष्टुः[2]

**निमित्तातिदेशः –** पूर्ववत्सनः[3]

**तादात्म्यातिदेशः –** सुबामन्त्रिते पराङ्गवत्स्वरे[4]

---

[1] वै.सि,कौ, तत्त्वबोधिनी, प्रथमभागः, पृ. 278

[2] पा.सू. 1.1.35

[3] तत्रैव, 1.3.62

[4] तत्रैव, 2.1.2

**शास्त्रातिदेशः** – कर्मवत्कर्मणा तुल्यक्रियः[1]

**कार्यातिदेशः** – स्थानिवदादेशोऽनल्विधौ[2]

**व्यपदेशातिदेशः** – आद्यन्तवदेकस्मिन्[3]

मीमांसकभाष्यकारेण आचार्यशबरस्वामिना अतिदेशविषये प्रतिपादितम् –

**प्रकृतात् कर्मणो यस्मात् तत्समानेषु कर्मसु।**
**धर्मोपदेशो येन स्यात् सोऽतिदेश इति स्मृतः।।**[4]

पाणिन्यष्टाध्याय्यां बहुनि अतिदेशसूत्राणि सन्ति तेषां च स्वीयं स्वीयं महत्त्वमपि विद्यते। वतिघटितत्वमतिदेश इति सामान्यलक्षणम्। वस्तुतस्तु यत्र आरोपः क्रियते तत्र सर्वत्रापि अतिदेशत्वमेव ज्ञेयम्। शास्त्रीयप्रक्रियानिर्वाहाय अतिदेशकल्पनायाः अत्यावश्यकत्वं भवति। यथा वाक्यस्फोटस्यैव मुख्यत्वेऽपि अष्टौ स्फोटाः प्रकल्पिताः। अत एव नागेश आह - "तत्र वाक्यस्फोटो मुख्यः, तस्यैव लोकेऽर्थत्वात् तेनैवार्थसमाप्तेश्च"[5] तथा चावापोद्वाभ्यां वाक्ये पदकल्पना, पदेषु च प्रकृतिप्रत्ययादिकल्पना क्रियते तत्सर्वमपि बुद्धिपरिकल्पितमेव वर्तते। प्रकृतमनुसरामः शास्त्रेष्वतिदेशो नाम व्याकरणद्वारा यानि लक्ष्याणि सिद्धीक्रियन्ते, तेषां साधनाय बौद्धपरिकल्पनं विधाय शब्दाः साध्यन्ते। यथा रामाय इति प्रयोग यकारे तादात्म्यातिदेशः – "स्थानिवदादेशोऽनल्विधौ"[6] इति सूत्रेण स्थानिवृत्तिसुप्त्वमतिदिश्यते। अर्थात् सुप्त्वारोपणमिति भावः। लोकेऽपि शिष्यः गुरुस्थानापन्नः याज्यकुलानि

---

[1] पा.सू, 3.1.87
[2] तत्रैव, 1.1.56
[3] तत्रैव, 1.1.21
[4] मीमांसकभाष्यकारेण शबरस्वामिना प्रणीतं शाबरभाष्यम् 7.22
[5] परमलघुमञ्जूषायां, नागेशभट्टेन शक्तिप्रकरणे निरूपितम्, पृ. 7
[6] पा.सू. 1.1.56

गत्वाग्रासनादीनि लभते, अतः तत्स्थानापन्नः तद्धर्मं लभते इति रीत्या यस्य स्थाने यः सः तद्धर्मवान् भवति। अयञ्च न्याय इत्युच्यते लोकव्यवहारेण सिद्धोऽर्थः न्याय इत्युच्यते। अस्य न्यायस्य शास्त्रेऽपि प्रचारो भवति। गुरुणा प्रेषितः शिष्यः यदा याज्यकुलानि याति तदा गुरुरिव व्यवहरति। तेन यस्य स्थाने यो भवति सः तत्तुल्यो भवतीति विज्ञायते। किन्तु व्याकरणशास्त्रेऽनुशासनं वर्तते "स्वं रुपं शब्दस्याशब्दसञ्ज्ञा"[1] इति शब्दः स्वकीयानाम् आनुपूर्वीमेव बोधयतीतितात्पर्यम्। अत्र स्थानिभिन्नः आदेशश्च भिन्नः द्वयोः वैरूप्याद् आदेशः स्थानिरूपो तद्धर्मवान् वा भवितुमर्हति न। यथा अग्रासनादीनि लभ्यन्ते शिष्येण तथापि उच्छिष्टभोजनं शिष्यस्य नैव भवति।

**अतिदेशसूत्राणां वैशिष्ट्यम् -**

एतेषां सूत्राणां वैशिष्ट्यमपि वर्तते यत्- स्थानिनिष्ठधर्माणामादेशेऽप्यारोपं विधाय तन्निमित्तकं कार्यं सम्पाद्यते। यथोक्तं बालमनोरमाकारेण वासुदेवदीक्षितेन - "गुरुस्थानापन्नाः गुरुपुत्रादौ स्थानापत्त्या तद्धर्मलाभो लोकतः सिद्धः। तथा च कुशादिस्थानापन्नेषु शरादिषु वैदिकन्यायसिद्धः।"[2] वैशिष्ट्यानन्तरमतिदेशस्य यथा - "तृज्वत्क्रोष्टुः" इत्यतिदेशसूत्रम्, अनेन सूत्रेण तृज्वद्भावो भवति। अतोऽत्र रूपातिदेशः। अत्र मूलशब्दमपरिवर्त्यैव केवलं तृजन्तभावो कृतः तेन क्रोष्टृ इत्यस्य स्थाने क्रोष्टु इति व्यवहरति।

वतिघटितसूत्राण्यपि किञ्चन वैशिष्ट्यं वर्तते, वतिप्रत्ययस्य सादृश्यबोधकत्वं "तेन तुल्यं क्रियाचेद्वति"[3], "तत्र तस्यैव"[4] इति सूत्रद्वयं प्रतिपाद्यते। अत्र प्रथमसूत्रस्य तृतीयान्तात् तुल्येऽर्थे वतिप्रत्ययो भवति यत्तुल्यं सा क्रिया चेदिति सूत्रार्थः। यथा- ब्राह्मणवदधीते क्षत्रियः, राजवद् वर्तते वैश्यः, शूद्रवदाचरति ब्राह्मण प्रभृत्युदाहरणानि सन्ति। अत्र ब्राह्मणादिपदैः

[1] पा.सू. 1.1.68
[2] वै.सि.कौमुद्याः बालमनोरमाटीकायां व्याख्यावसरे प्रतिपादितम्, पृ.77
[3] पा.सू. 5.1.115
[4] तत्रैव, 5.1.116

लक्षणावृत्त्या तद्गताध्ययनादिक्रिया अवबोध्यते। एवञ्च ब्राह्मणकर्तृकाध्ययनसदृशी क्षत्रियकर्तृका अध्ययनक्रिया इत्यपि बोधो जायते। अत्र व्यक्तिसादृश्यमपि क्रियाद्वारकमेव। अतः "तेन तुल्यं क्रियाचेद्वति" इति सूत्रे तेनेति पदे तृतीया तुलोपमाशब्दवर्जं तुल्यार्थकशब्दैः योगेतृतीया वा स्यादेतदर्थकेन "तुल्यार्थैरतुलोपमाभ्यां तृतीतान्यतरस्याम्"[1] इति सूत्रेण कृता। सा च शेषषष्ठ्या अपवादभूता इति सर्वविभक्त्यर्थबोधिकापि भवति। अत एव "राज्ञा सदृशं वर्तते, राजवत् वर्तते, जडस्य तुल्यं ब्रूते, सूर्य इव प्रकाशते, सूर्यवत् प्रकाशते पिता इव पालयति, पितृवत् पालयति राज्ञा इव, राजवत् व्यवहृतमनेन,देवमिव, देववत्, भवन्तं पश्यामि असिना इव, असिवत्, दात्रेण भिनत्ति ब्राह्मणाय इव, ब्राह्मणवत्, वैश्याय ददाति, पर्वतादिव, पर्वतवत्, आसनातदवरोहति" इत्यादिप्रयोगस्थले वतिप्रत्यान्तघटिते तृतीयाभिन्नविभक्त्यर्थस्यापि प्रवृत्तिर्जाता। अत एव सनः पूर्वस्माद् धातोरिव सन्नन्तादपि आत्मनेपदं भवतीत्यर्थे "पूर्ववत्सनः"[2] इति सूत्रमाचार्येण कृतम्। "तेन तुल्यं क्रिया चेद्वतिः" इत्यनेन सूत्रेण यः वतिप्रत्ययो विधीयते तत्र सूत्रानुरोधेन तृतीयान्तेनैव विग्रहो भवति। अर्थस्तु उपमेयविभक्त्यनुसारेण ग्राह्यः। अत एव उपमानोपमेययोः समानविभक्तिकत्वनियमस्य भङ्गोऽपि न भविष्यति। व्युत्पत्तिवादे गदाधरभट्टाचार्येणापि समानविभक्तिकत्वनियमं प्रतिपादयता कथितं यत्- "स्वसमानविभक्तिकेन स्वाव्यवहितपूर्ववर्त्तिना च पदोपस्थापितस्यैव संसर्गमर्यादया भासते।"[3] यथा- नीलो घट इति तेनोक्तम्। एवमेवात्रापि "पूर्ववत्सनः" इति सूत्रे कैयटेनोक्तम् – पक्षद्वयेऽपि तेन तुल्यमिति तृतीयान्ताद्वतिः, न तु पञ्चम्यन्तात्। अयम्भावः पक्षयोरनयोः "तेन तुल्यम् " इत्यस्य तृतीयान्ताद् वतिप्रत्ययो भवति, किञ्च पञ्चम्यन्ततायाः ग्रहणं नैव कृतम्। अनेन प्रकारेण सूत्रेण कृता तृतीया सर्वविभक्त्यर्थान् अन्तर्भावयति। अतो पञ्चम्यर्थग्रहणमत्र सर्वथाऽयुक्तमेव। यथा- ब्राह्मणवद् वैश्यादधीते इति प्रयोगे ब्राह्मणादिव

---

[1] पा.सू. 2.3.72

[2] तत्रैव, 1.3.62

[3] व्युत्पत्तिवादः, अभेदप्रकरणम्, पृ. 7

वैश्याधीत इत्यर्थः। वैश्यापादानकस्य अध्ययनस्य ब्राह्मणापादानकम् अध्ययनमुपमानं विद्यते। तत्र ब्राह्मणापादनकाध्ययने ब्राह्मणशब्दो वर्तते। तेन ब्राह्मणेन तुल्यं वैश्यादधीते इति तृतीयान्ताद्वतिप्रत्ययो कृतः। एवमत्रापि बोध्यमिति।[1]

"स्थानिवत्." इति सूत्रे च तेन तुल्यमित्यादिसूत्रेण वतिप्रत्ययः, एवञ्च अलाश्रयभिन्ने विषये स्थानिना तुल्यं भवतीति सूत्रार्थः। आदेशे त स्थानिकार्यप्राप्त्यैव सादृश्यं सम्भवति स्थानितुल्यव्यवहारेण, तद्गतधर्मव्यवहारेण वा। अतिदेशस्य चेदमेवापूर्वं कार्यम्। इत्थं च आदेशविधायकसूत्राणां वैशिष्ट्यं नैके स्थलेषु द्रष्टुं शक्यम्।

यदा तत्र तस्यैव इति विहितवतिप्रत्ययघटितसूत्रविषयकः विचारः कृतः, तदा "तत्र तस्यैव" इत्यस्य सप्तम्यन्तात् तत्रैव षष्ठ्यन्ताच्च वतिप्रत्ययो भवत्वित्यर्थः निष्पद्यते। "तेन तुल्यं क्रिया चेद्वतिः" इति सूत्रेण यत्र तृतीयाविभक्त्या सर्वविभक्त्यर्थस्य अवगमो भवति तत्र षष्ठीसप्तम्यर्थस्य ग्रहणं भवति। एवमपि तत्र क्रियातौल्य एव वतिप्रत्ययो विहितः। तथा च प्रयोगो लोकेऽपि प्रयुज्यते यथा- पुत्रेण तुल्यः स्थूलः देवदत्तः, भ्रात्रा तुल्यो धनी देवदत्तः इत्यादौ निदर्शने द्रव्यगुणतौल्ये तु मा भूत्। अतः गुणस्य द्रव्यस्य तौल्येऽपि वतिप्रत्यये शास्त्रमिदं कानिचन निदर्शनानि। "मथुरावत् स्रुघ्ने प्राकारः, बृहस्पतिपदेभ्यः पाण्डित्यम् गृहवदरण्ये चरन्ति" इत्यादौ प्रयोगे तु लक्षणया मथुराप्राकाद्यर्थप्रतिपादकेभ्य उपमानवाचकेभ्यः सप्तमीविभक्त्यन्तेभ्य इवार्थे वतिप्रत्ययो भवति उपमेयस्रुघ्नसम्बन्धी प्राकार इत्यादिबोधो भवति।

"चैत्रवत् मैत्रस्य गावः, मन्मथवदस्य सौन्दर्यम्" इत्यादौ प्रयोगस्थलेषु चैत्रादिपदात् इवार्थको वतिप्रत्ययो ज्ञेयः। तत्र ज्ञेयश्च चैत्रसम्बन्धिगोसदृशाः मैत्रसम्बन्धिगावः इत्यादिरूपेण बोधो जायते। व्याकरणशास्त्रेऽपि "स्यसिच्सीयुट्तासिषु भावकर्मणोः उपदेशेऽज्झनग्रहदृशां

---

[1] व्या.म.भा. प्रदीपः, द्वितीयो भागः, पृ. 172

चिण्वदिट् च"[1] इति सूत्रे उपमेयवाचके स्यसिच्सीयुट्तासिशब्दे सप्तमीदर्शनात् उपमानवाचकात् चिण्शब्दादपि सप्तम्यन्तादेव वतिः। अपि च शब्दशास्त्रस्य यत्किञ्चित्कार्यविधायकत्वात् द्रव्यगुणकर्मबोधकशब्देभ्यः सादृशस्य प्रतिपिपादयिषायामेव वतेः विधीयमानत्वात् कार्यमिति शब्दस्य व्यपदेशः कृतः। सूत्रमिदं मथुरावत् स्रुघ्ने प्राकारः इति वाक्यार्थं बोधयति। उपदेशावस्थायामजन्ततया विद्यमानानां भू, हन्, ग्रह्, दृश् इत्यादीनां धातूनां च वृद्ध्यादिकार्याणि भवन्तीति प्रबोध्य चिणः स्यसिच्सीयुट्तासीनां च वृद्ध्यादिकार्यजनकत्वेन सादृश्यं प्रतिपाद्यते। यतो हि सूत्रमिदमतिदेशसूत्रं वर्तते। एवमेव "सन्वल्लघुनि चङ्परेऽनग्लोपे"[2], "आद्यन्तवदेकस्मिन्"[3] इत्यादिस्थलेष्वपि अयमेव मार्ग आलम्बनीयो भवति।

"लोटो लङ्वत्"[4] इति सूत्रेऽपि उपमेयवाचकशब्दे षष्ठ्याः दर्शनात् षष्ठ्यन्तलङ्शब्दादेव वतिः बोधो भवति। अत्रापि कार्यं भवतीत्यध्याहार्यम्। इह लोट्पदस्य लक्षणावृत्तिमाश्रित्य तत्सम्बन्धबोधकत्वम्। अत्रापि मैत्रवत् गाव तत्सदृश एव बोधो भवति।

**उपसंहारः –**

अत एव सामान्यत उच्यमाने सति यत् सर्वत्र अतिदेशस्थले यदि तृतीयान्ताद् वतिः तर्हि तत्स्थानिककार्याणि प्रवर्तन्ते, तन्निमित्तककार्याणि च अतिदिश्यन्ते। यथा- काभ्याम्, रामाभ्याम् चेत्यादि। यत्र च वतिः षष्ठ्यन्तविहितोऽस्ति, तत्र स्वस्यैव यदागमादेशादिकार्यं तदेवातिदिश्यते, न तु स्वनिमित्तकम्। यथा- लोटोलङ्वत् इत्यादि। अनेन सकलव्याकरणशास्त्रेऽतिदेशविषये बहुनि वैशिष्ट्यानि स्थलानि सन्ति। अत्र तु किञ्चित् दिङ्मात्रमेव प्रस्तुतम्। इति शम्।

---

[1] पा.सू. 6.4.62
[2] तत्रैव, 7.4.93
[3] तत्रैव, 1.1.21
[4] तत्रैव, 3.4.85

## सन्दर्भसहायकग्रन्थावलिः

1. झा, महेशः, महाभाष्यम् (नवाह्निकम्) पतञ्जलिप्रणीतः, संस्कृतशोधसंस्थानम्, दरभङ्गा
2. दाहालः, लोकमणिः- व्याख्याकारः, परमलघुमञ्जूषा (किरणावली-संस्कृतव्याख्योपेतः), चौखम्बासुरभारतीप्रकाशनम्, वाराणसी, पुनर्मुद्रितसंस्करणम्-2011
3. नरसिम्हाचार्यः, एम.एस.,महाभाष्यप्रदीपव्याख्यानानि (द्वितीयो भागः), इन्स्टिट्यूट ऑफ फ्रांसिस इण्डोलॉजी, पुदुचेरी, 1973
4. नरसिंहः, डॉ. श्रिष्ठिलक्ष्मी, पाणिनीये अतिदेशानुशीलनम् (प्रकाशितशोधप्रबन्धः), राष्ट्रीयसंस्कृतविद्यापीठम्, तिरुपतिः, 2008
5. पाण्डेयः, गोपालदत्तः, वैयाकरणसिद्धान्तकौमुदी – प्रथमो भागः (बालमनोरमाटीका-हिन्दीव्याख्या), चौखम्बाप्रकाशनम्, 2014
6. मिश्रः, पण्डितरामरूपः, अतिदेशसूत्रव्याख्यानम्, जगदीशसंस्कृतपुस्तकालयः, जयपुरम्, प्रथमसंस्करणम्- 2011
7. मिश्रः,श्रीमदुमेशः (सम्पादकः), व्युत्पत्तिवादः – जयदेवमिश्रकृतजयासंस्कृत-टीकासहितः, वाणी विलास प्रकाशनम्, वाराणसी, पुनर्मुद्रितसंस्करणम्- 2016 ई.
8. मिश्रः, श्रीविश्वनाथः, परिभाषेन्दुशेखरः (सुबोधिनी-हिन्दीव्याख्योपेतः), चौखम्बा-सुरभारतीप्रकाशनम्, वाराणसी, पुनर्मुद्रितसंस्करणम्- 2009
9. शर्मा, पण्डितरघुनाथः, वाक्यपदीयम् – प्रथमो भागः – ब्रह्मकाण्डम्, हरिवृषभकृतया स्वोपज्ञवृत्या अम्बाकर्त्रीव्याख्या च सहितम्, सम्पूर्णानन्द-संस्कृतविश्वविद्यालयप्रकाशनम्, पञ्चमं संस्करणम् -2016

10. शास्त्री, गुरुप्रसादः, समलङ्कर्ता, लघुशब्देन्दुशेखरः (षट्टीकासंवलितः), चौखम्बाप्रकाशनम्, वाराणसी

11. शास्त्री, चारुदेवः, व्याकरणमहाभाष्यम् (प्रथमनवाह्निकम्), मोतीलाल बनारसीदास, नई दिल्ली, नवमपुनर्मुद्रितसंस्करणम्-2017

❑ ❑ ❑

**महस्विनी – विद्वत्समीक्षिता सन्दर्भिता च शोधपत्रिका (ISSN: 2231-0452)**
**कुसुमम् :** जनवरी – डिसेम्बर २०२१ **सम्पुटम् :** संयुक्तम् (१,२)

# साम्प्रतिककाले संस्कृतात् इतरभाषासु इतरभाषाभ्यश्च संस्कृते अनुवादस्य आवश्यकता

**डा. कनपालकुमारः***

अनु इत्युपसर्गपूर्वकात् वद=व्यक्तायां वाचि/व्यक्ता वाक् इत्यस्मात् धातोः घञ्-प्रत्यये अनु+वद्+घञ् इति स्थिते अनुबन्धलोपे, अत उपधायाः इति वृद्धौ च अनुवाद इति शब्दः निष्पद्यते।

अनुवादशब्दस्य अर्थः "**अनुसृत्यकथनम्**" इति पर्यवस्यति। संस्कृतसाहित्ये अनुवाद शब्दस्य प्रयोगः **अनुवदनम्, अनुसृत्यकथनम्, कथनम्, पुनःकथनम्, ज्ञातस्य प्रतिपादनम्** इत्यादिषु अर्थेषु उपलभ्यते। पुरा गुरुकुलशिक्षाकाले आचार्याः, उपाध्यायाः, गुरवः येषां मन्त्राणाम्, सूत्राणाम् उच्चारणं कुर्वन्ति स्म तेषामेव पुनरुच्चारणं शिष्यैः क्रियते स्म। इयमेव प्रक्रिया अनुवचनम् अनुवादो वा कथ्यते स्म। एवं ज्ञातस्य श्रुतस्यैव पुनःकथनम् इत्यस्मिन् सन्दर्भे **अनुवाद** इत्ययं शब्दः प्राचीनशास्त्रग्रन्थेषु प्रयुक्तः दृश्यते।

अष्टाध्यायां द्वितीयाध्यायस्य चतुर्थपादे **अनुवादे चरणानाम्**[1] इतीदं सूत्रं प्राप्यते।भर्तृहरिरपि वाक्यपदीये द्वितीयकाण्डे कारिकायां **आवृत्तिरनुवादो वा**[2] इति निर्दिशति।तथैव जैमिनीयन्यायमालायां **ज्ञातस्य कथनम् अनुवादः**[3] इति विश्लिष्टम्।

एतेषां सर्वेषां शास्त्रवाक्यानां परामर्शेण ज्ञायते यत् – गुरुकथनस्य शिष्यद्वारा पुनरुच्चार एव अनुवादः। साम्प्रतिककाले प्राच्यां पाश्चात्त्ये वा जगति अनुवादशास्त्रस्य कलायाः

---

* सहायकाचार्यः, अनुवादविभागः, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः।

[1] अष्टाध्ययी – 2.4.3

[2] वाक्यपदीयम् – 2.115

[3] जैमिनीयन्यायमालायाम्

वा यः विकासो जातः तत्रापि अयमर्थः सङ्गच्छते एव। एकस्यां भाषायां विद्यमानविषयस्य अन्यभाषया पुनः कथनमेव खलु अनुवाद इत्यनेन गृह्यते। अनया दृष्ट्या यद्यपि आधुनिके जगति अनुवादशब्दस्य अर्थः विस्तृतो जातः अस्ति तथापि पुरा काले अनुवादविषये विद्यमाना दृष्टिः अधुना च विद्यमाना दृष्टिः (विचारः) इत्यनयोः नास्ति कोऽपि मौलिकः भेदः।

एका काचित् भाषा विभिन्नभाषाभाषिणः एकसूत्रेण बद्धुं प्रभवति। नैकभाषाभाषिभारतदेशं सम्प्रति हिन्दी-राष्ट्रभाषा एकसूत्रेण बध्नाति। अनुवादप्रक्रिया अपि न केवलं भाषाद्वयम् अधिकाः भाषाः वा निकटमानयति, अपि तु भिन्नसंस्कृती संस्कृतीः वा निकटमानेतुं प्रभवति। विभिन्नभाषाभाषिभारतीयेषु भावनिकस्तरे ऐक्यसम्पादनाय, शिक्षा-न्याय-प्रशासन-चिकित्सा-वाणिज्य-कृषि-पर्यटनादिक्षेत्रेषु च एकसूत्रतानिर्माणाय अनुवादस्य महती भूमिका वर्तते। अनुवादः विभिन्नभाषासु तादृशः सेतुः अस्ति येन विना विश्वसंस्कृतिविकासः नैव सम्भवति। जगति विद्यमानासु प्रायेण षड्सहस्रभाषासु वैचारिक-सृजनात्मक-कार्यात्मक-सामंजस्याय अनुवाद एव उपयोगि माध्यमं भवति।

**भारतीयभाषाभ्यः संस्कृते संस्कृतात् च भारतीयभाषासु अनुवादस्यावश्यकता–**

भारतसदृशबहुभाषाभाषिदेशे ऐक्यप्रतिष्ठापनं अनुवादसहयोगेनैव सम्भवति। भारतदेशस्तु सर्वप्रकारेण भाषिकम्, सांस्कृतिकम्, सामाजिकम्, भौगोलिकम्, साम्प्रदायिकम् वैविध्यं भजते। एतदेव च भारतदेशस्य सौन्दर्यमपि। एतेषां सम्यक् परिज्ञानेन विना भारतस्य परिचयः एव नास्ति। अस्मिन् एव कार्ये अनुवादस्य उपादेयता अधिका अस्ति। इदं तु सत्यं यत् भारतीय-वैदिक-लौकिक-साहित्येतिहासेन ज्ञायते यत् संस्कृतात् निर्गतः स्वरः एव सर्वासु भारतीयभाषासु अद्यापि गुञ्जति।

तस्मात् अवधातव्यमेतत् यत् यदि अनुवादप्रयासाः न अभविष्यन् तर्हि सृजनास्तरे समस्तविश्वे विद्यमानसाहित्यिक-सामाजिकोन्नतिरपि न अभविष्यत्। विश्वस्यास्य आद्यं साहित्यं तु वेदाः एव। तदनु लौकिके वाल्मीकेः रामायणम् आद्यमुच्यते। वेदाः तु सकलज्ञाननिधिरेव।

मनुष्यजीवनाय आवश्यकः प्रत्येकं विषयः वेदेषु निहितः वर्तते। यावत्पर्यन्तं संस्कृतं जनभाषा व्यवहारभाषा आसीत् तावत्पर्यन्तं निधिरयं प्रत्येकं भारतीयेन जनेन आत्मसात्कृतः। किन्तु अपभ्रंशादिकारणात् विविधभाषाणाम् उद्भवेन मूलसंस्कृते विद्यमानोऽयं ज्ञाननिधिः अस्पृष्टः सञ्जातः। तस्मात् सर्वेषु अपि क्षेत्रेषु ज्ञानदृष्ट्या भारतस्य महती हानिः अजायत। लोपमेतत् दूरीकर्तुं तत्र मार्गद्वयमेव उपलब्धं वर्तते। तच्च संस्कृतभाषायाः अध्ययनस्य अनिवार्यता अनुवादकार्यं च।

आदौ विद्यमानः पर्यायः महता विलम्बेन साधयितुं शक्यः। किन्तु संस्कृतात् सर्वासु भारतीयभाषासु अनुवादः इत्ययं पर्यायस्तु संस्कृते विद्यमानस्य ज्ञाननिधेः ग्रहणार्थं सुकरतरः मार्गः विद्यते।

संस्कृतस्य तथा अन्यस्याः एकस्याः वा भाषायाः ज्ञाता कार्यमिदं सम्पादयितुं समर्थः भवति। अनुवादकस्य न्यूनातिन्यूनं द्विभाषिकत्वम् अनुवादकार्ये अपेक्ष्यते। एवं प्रकारेण संस्कृते विद्यमानः ज्ञाननिधिः सर्वासु अपि भारतीयभाषासु आनेतुं शक्यते। बहुशः आनीतः अपि अस्ति। तस्य नैकानि उदाहरणान्यपि अत्र प्रस्तोतुं शक्यन्ते। यथा – रामायणम्, महाभारतम्, पञ्चतन्त्रम्, भगवद्गीता, हितोपदेशः, अभिजातसंस्कृतसाहित्यात् महाकाव्यादीनि च। भारतदेशे संस्कृतात् सर्वाधिकम् अनुवादकार्यं हिन्दीभाषायां सञ्जातम्। इदञ्चकार्यं बहुशः केवलं अर्थदृष्ट्या कुत्रचिच्च शुद्धानुवादरूपेण कृतं दृश्यते। तत्र प्रबोधचन्द्रोदयः इत्यस्य **प्रोबोधनाटक**[1] इति जश्वन्तसिंहेन कृतः अनुवादः, **सबलसिंह चौव्हान** द्वारा कृतः महाभारतस्य **दोहा-चौपायी**-छन्दसि अनुवादः, **गुमान् मिश्रस्य**[2] नैषधचरितादीनाम् अनुवादः प्राप्यते। एततदिरिच्य ज्योतिषवैद्यकराजनीतीत्यादिग्रन्थानां प्रचुरया मात्रया अनुवादः सञ्जातः।

---

[1] प्रबोधचन्द्रोदयस्य हिन्दी अनुवादः।

[2] नैषधीयचरितम् इत्यस्य हिन्दी अनुवादकः।

हिन्दीभाषायाः आधुनिककालः तु अनुवाददृष्ट्या अत्यधिकसंपन्नः दृश्यते। अभिज्ञानशाकुन्तलम् इत्यस्य शकुन्तलानाटकनाम्ना राज्ञा लक्ष्मणसिंहेन कृतः अनुवादः अत्यधिकं लोकप्रियतां गतः। एवं मुद्राराक्षसम्, मेघदूतम्, मृच्छकटिकम्, उत्तररामचरितम्, रत्नावली इत्येते अनुवादाः अपि उल्लेखनीयाः सन्ति।

किन्तु हिन्दीभाषायां यद्यपि प्राचुर्येण संस्कृतात् विशेषतया अभिजातसाहित्यस्य अनुवादकार्यं जातं तथापि शास्त्रीयग्रन्थाः हिन्दीभाषया अपि अस्पृष्टाः एव अभवन्। तथा च भारतीयासु अन्यभाषासु तावत् संस्कृतात् अनुवादस्य कार्यम् अल्पप्रमाणेनैव संजातम्। तस्मात् तत्तद्भाषाभाषिणः संस्कृतसाहित्यस्य सौन्दर्यात् तथा विशालज्ञानराशेः वञ्चिताः एव अतिष्ठन्।

अन्यच्च संस्कृतभाषायाः व्यवहारभाषात्वं यदा आरभ्य खण्डितम्, संस्कृतभाषा संपर्कभाषामाध्यमात् दूरं गता तदारभ्य संस्कृतभाषायां स्वतन्त्रसाहित्यस्य निर्माणमपि कुण्ठितम्। तस्मात् संस्कृतस्य तस्याः साहित्यस्य च पुनश्चेतनाय भारतीयप्रादेशिकभाषाभ्यः संस्कृतानुवादः साम्प्रतिककालस्य आवश्यकता वर्तते। पूर्वं संस्कृतेन परिपुष्टाः भारतीयभाषाः इदानीं संस्कृतस्य पुष्टिं कर्तुमर्हन्ति। अत्र तत्तद्भाषायां विद्यमानानां उत्तमकृतीनां संस्कृते अनुवादः एकः उत्तमः उपायः भवितुमर्हति। तेन संस्कृतद्वारा विभिन्नभाषाभाषिणां अन्यान्यभाषाभाषिसंस्कृतेः परिचयः अपि भवति, ज्ञानवर्धनमपि भवति, एवं राष्ट्रियैक्यं च साधयितुं शक्यते।यथा – बांग्लाभाषायां काचित् रचना वर्तते तस्याः संस्कृतेन अनुवादः कृतः। कश्चन उत्कलजनः बांग्लां न जानाति किन्तु संस्कृतं जानाति सः अनूदितरचनां पठित्वा बांग्लासाहित्यविषये अवगन्तुं प्रभवति।

एवं प्रकारेण अन्यभाषाज्ञानस्य न्यूनता संस्कृतानुवादेन पूरयितुं शक्यते। संस्कृतद्वारा सकलभारतीयभाषासु विद्यमानविचारसामग्री अस्माभिः प्राप्तुं शक्यते।

संस्कृतस्य भारतीयभाषाभिः सह सम्बन्धः अत्यन्तं गभीरः दृढः च वर्तते। इतरभाषाः इव साम्प्रतिककालेऽपि संस्कृतस्य भारतस्य सामाजिकपरिप्रेक्ष्ये महत्त्वपूर्णं स्थानं भवति।

अद्यापि देशस्यैक्यसम्पादनाय विविधरूपेण संस्कृतम् एकं सूत्रमिव कार्यं करोति। सर्वासामपि विद्याशाखानां शास्त्रशाखानां मौलिकतत्त्वानि संस्कृते एव निहितानि इति सप्रमाणं प्रतिपादितं वर्तते विद्वद्भिः। यथागेलिलियो इत्यस्य नाम्ना विद्यमानं पृथिव्याः गोलाकारत्वप्रतिपादनं तु अस्माकं पुराणेषु वराहावतारवर्णनप्रसङ्गे कृतं दृश्यते। पाणिनिना शास्त्ररचनायै निर्मिताः यांत्रिकसंज्ञाः तु अद्यतनभाषाशास्त्रस्यापि साहाय्यिकाः वर्तन्ते। संस्कृते विश्लिष्टं ध्वनिशास्त्रं न केवलं संस्कृतभाषिणाम् अपि तु सर्वासामपि भाषाभाषिणाम् उच्चारणम् नियन्त्रयितुं समर्थम्। भारतीयसंविधानेन याः द्वाविंशतिभाषाः परिचीयन्ते तत्र संस्कृतमेका भाषा। एतैरेव कारणैः **संस्कृतात् भारतीयभाषासु अनुवादस्य आवश्यकता वर्तते**। अस्य पुष्टिं करोति भारतस्य संविधानम्। यथा -

National Policy on Education – 1968[1] अनुसारं भाषाणां विकासे अनुवादः इति अत्यन्तं महत्त्वपूर्णप्रक्रिया वर्तते। तदनु अनूदितपुस्तकप्रकाशनाय महत्त्वमपि प्रदत्तमस्ति।

**भारतीयेतरभाषाभ्यः संस्कृते संस्कृतात् च भारतीयेतरभाषासु अनुवादस्यावश्यकता –**

संस्कृतं पूर्वीयप्राचीनतमा भाषा मन्यते। यूनानी-ग्रीकभाषा पाश्चिमात्यप्राचीनतमा भाषा मन्यते। अनयोः द्वयोः अपि भाषयोः प्राचुर्येण ज्ञानभण्डारं विद्यते। रोमनजगति विशेषेण लौकिकसाहित्यस्य अनुवादस्य समृद्धापरम्परा दृश्यते।

होमरकृत **ओडिसी** इति, **इलियड्** इति पाश्चिमात्यानां महाकाव्ये। पाश्चिमात्यजगति अनयोः महान् प्रभावः वर्तते। यथा रामायणमहाभारतादिग्रन्थाः भारतीयजीवनशैलीम् अधुनापि प्रभावयन्ति तथैव इमे महाकाव्ये अपि। एतदतिरिच्य शेक्सपियरनाटकानां महती एका परम्परा पाश्चात्यसाहित्यक्षेत्रे वर्तते। तन्नाटकैः पाश्चात्यसाहित्यं समृद्धशालि सञ्जातम्। कतिचिद्भ्यः वर्षेभ्यः तत्रत्येषु देशेषु विज्ञानक्षेत्रे तन्त्रज्ञानक्षेत्रे महत्कार्यम् अन्वेषणपुरस्सरं

[1] भारतसर्वकारद्वारा समानीता प्रप्रथमशिक्षानीतिः।

सञ्जातं जायमानं च अस्ति। तत्कारणादेव आधुनिकयुगं यान्त्रिकयुगमित्यपि कथ्यते विद्वद्भिः। तदनु नैके शास्त्रीयग्रन्थाः विज्ञानग्रन्थाः तत्तत्पाश्चात्यभाषासु विशेषतया च आङ्ग्लभाषायां ग्रथिताः दृश्यन्ते। आधुनिकी सर्वापि शैक्षिकव्यवस्था विशेषेण प्रसिद्धेषु विश्वविद्यालयेषु आङ्ग्लभाषया एव प्रचाल्यमाना वर्तते। संस्कृतमपि यद्यपि आबहोःकालात् सकलज्ञाननिधिः तथापि यवनाक्रमणादिकारणेभ्यः संस्कृतस्य धाराखण्डितत्वात् संस्कृते रचितग्रन्थभाण्डारस्य अध्ययने अद्यापि क्लिष्टता अनुभूयते।

सर्वान् इमान् अंशान् विचार्य सर्वविधक्षेत्रेषु प्रवेष्टुं मार्गः एकः अवशिष्यते स च अनुवादः इति। संस्कृताभिजातसाहित्यस्य वैदिकसाहित्यस्य च प्रचुरमात्रया अनुवादः पाश्चात्यैः तथा भारतीयैः संस्कृतविद्भिः कृतः वर्तते। तत्र –

1. नैकभाषाविद्भिः अनूदितः **मैक्समुल्लरद्वारा** सम्पादितः **द सेक्रेड बुक्स आफ द ईस्ट**[1] **(पौर्वत्यानां पवित्रग्रन्थाः)**इत्ययम् अनुवादः। अयम् अनुवादः पञ्चाशत् भागयुतः वर्तते। प्रधानसम्पादकः मैक्समुल्लर, आक्सफर्डविश्वविद्यालयमुद्रणालयद्वारा आङ्ग्लभाषायां प्रकाशिताः। अत्र उपनिषदाम्, आरण्यकानाम्, संहिताग्रन्थानाम्, गृह्यसूत्राणाम्, श्रीमद्भगवद्गीतायाः, बौद्धसाहित्यस्य तथा इतरेषां केषाञ्चन ग्रन्थानाम् अनुवादः कृतः वर्तते ।
2. **राबर्ट पी.ओल्डमन**[2]द्वारा **श्रीमद्वाल्मीकिरामायणस्य** आङ्ग्लानुवादः।
3. **विलियम जोन्स**[3]द्वारा **अभिज्ञानशाकुन्तलस्य** तथा **मनुस्मृतेः** आङ्ग्लानुवादः।

---

[1] वैदिकांशानां विषये मैक्समुल्लरद्वाराकृत आङ्ग्लानुवादग्रन्थः।

[2] Professor and Translator University of California, Berkeley and English Translator of the Epic of Sanskrit Ramayana.

[3] European Scholar Translated Kalidasa works into English and Latin.

4. मुघलकाले **अकबर**राज्यशासने **रामायण-महाभारत-गीतादीनां** फारसीभाषाया-मनुवादः।
5. **दारा शिकोह**द्वारा **उपनिषदां** फारसीभाषायाम् अनुवादः। एते अनुवादाः भारतीयेतरभाषासु कृताः सन्ति।
6. अत्र अनुवाददृष्ट्या पञ्चतन्त्रमिति विष्णुशर्मविरचितनीतिकथाग्रन्थः विशेषस्थानं भजते। मूलभाषायाः संस्कृतात् अथवा अन्यभाषामाध्यमेन पञ्चतन्त्रस्य **सीरिया-अरबी-ग्रीक-इटली-लेटिन-जर्मन-स्लाव-हिब्रू-डेनिस-आइसलैंड-डच-स्पाँनिश-फ्रेंच-आङ्ग्ल-फारसी-तुर्की-हंगेरी**-आदिभाषासु अनुवादः जातः अस्ति।
7. सम्पूर्णवैदिकसाहित्यस्य, पुराण-महाभारत-रामायणादिग्रन्थानाम्, स्मृतिग्रन्थानाम्, आयुर्वेदग्रन्थानां नैकासु **जर्मन-फ्रेंच-आङ्ग्ल-फारसी-चीनी-सिंहली**त्यादिषु भाषासु अनुवादः जातः।
8. एतदतिरिच्य अभिजातसंस्कृतसाहित्यात् पञ्चमहाकाव्यानाम्, रूपकाणाम्, गीतिकाव्यानाम् आङ्ग्ल-जर्मन-फ्रेंच-इटालियन-स्विडिश-डानिस-चीन-तिब्बतीभाषासु अनुवादः।

एवं महता प्रमाणेन संस्कृतात् भारतीयेतरभाषासु अनुवादकार्यं सञ्जातम्। अनेन तत्तद्भाषायाः साहित्यं संस्कृतकारणात् समृद्धं जातम्। न केवलं साहित्यिकक्षेत्रे अपि तु ज्ञानविज्ञानक्षेत्रेऽपि पाश्चात्येषु या प्रगतिः दृश्यते तस्य कारणं तु संस्कृतात् कृतानुवादाः तेषामध्ययनञ्च।

किन्तु पाश्चात्यग्रन्थानां संस्कृतेनानुवादः तु अत्यल्पतया एव लक्ष्यते। भारतीयेतरभाषासु विद्यमानम् अत्याधुनिकं ज्ञानं यदि वयम् आत्मसात्कर्तुमिच्छामः, तथा

तत्साहित्यमास्वादयितुमिच्छामः तर्हि अनुवाद एव अत्र साधनम्। नास्त्यत्र संशयः यत् ग्रन्थानामेषां संस्कृते अनुवादकारणेन –

- संस्कृतभाषायाः अत्याधुनिकत्वं सिध्येत।
- संस्कृतं आधुनिकसाहित्येन समृद्धं स्यात्।
- संस्कृतमध्येतुं जनेषु अभिलाषा जायेत।
- अनुसन्धानादिकार्येषु उपकारः स्यात्।
- ज्ञानविज्ञानादिक्षेत्रे विकासाय अवसराः स्युः।
- संस्कृतस्य भारतीयभाषाणां सामीप्यात् पाश्चात्यग्रन्थानां संस्कृतानुवादः भारतीयभाषासु पुनरनुवादायापि साहाय्यकरः सुकरतरः च भवेत्।
- अनुवादमिषेण संस्कृतस्य प्रचारः प्रसारश्च भवेत्।

## उपयुक्तग्रन्थसूची

1. भारतीय साहित्य, डा.नागेन्द्र, प्रभात प्रकाशन, दिल्ली – 2004
2. वाग्विज्ञान, आ.पं.श्री सीताराम चतुर्वेदी, चौखम्बा विद्याभवन, वाराणसी-1969
3. भाषा विज्ञान, डा.भोलानाथ तिवारी, चौखम्बा विद्याभवन, वाराणसी
4. Approaches of Translation, Peter Newmark, Prentice Hall, Newyork.
5. Fundamental Aspects of Translation, Pratima Dave Shastri, PHI Learning Private Limited, New Delhi.
6. A Linguistic Theory of Translation, Catford J.C, London, Oxford University Press.

❑ ❑ ❑

**महस्विनी – विद्वत्समीक्षिता सन्दर्भिता च शोधपत्रिका (ISSN: 2231-0452)**
**कुसुमम् :** जनवरी – डिसेम्बर २०२१ **सम्पुटम् :** संयुक्तम् (१,२)

# महाभारते स्त्रीशिक्षाविमर्शः

**डा. दयानिधिशर्मा***

भारतीया प्राचीनज्ञानपरम्परा विश्वे सुप्रसिद्धा वर्तते। प्राचीनभारतीयं साहित्यं सर्वदा सर्वान् दिशति। तत्र सांस्कृतिकजीवनपद्धतिः, परम्पराणां हस्तान्तरणं, नूतनज्ञानस्य आविर्भावश्च बहवः विषयाः सुलभाः वर्तन्ते। सृष्टिकालादेव स्त्रीणां कृते महत्त्वपूर्णं स्थानं कल्पितं वर्तते। स्त्रीं विना सृष्टेः विचारः एव नास्ति। परिवारस्य, वंशस्य, समुदायस्य समाजस्य च निर्माणाय स्त्रीणां महत् योगदानं वर्तते। समाजस्य निर्माणाय पुरुषाणाम् अपेक्षया स्त्रीणां महत्त्वं सर्वत्र अधिकं निगदितं वर्तते। तासां जीवनमेव मानवानां कृते आदर्शरूपेण विद्यते। स्त्रियः एव कस्यापि राष्ट्रस्य उन्नतमार्गस्य आधारभूताः सन्ति। अस्मिन् विषये महर्षिः मनुः व्यनक्ति -

**यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।**
**यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रियाः[1]॥**

स्त्रीणां समादरः सर्वैः प्रतिक्षणं करणीयमेव। यतो हि तासाम् औदार्यं सर्वत्र जगति दृश्यते। तासां कर्तव्यपरायणता, धैर्यम् अनुशासनं च प्रमुखाः श्लाघनीयाः गुणाः सन्ति। यस्यां कस्यामपि परिस्थितौ ताः परिवारस्य विकासाय सर्वदा यत्नशीलाः भवन्ति। स्वस्य कार्यं विहाय, स्वस्य सुखं परित्यज्य ताः पारिवारिकसदस्यानां कृते एव तासां सम्पूर्णं जीवनम् अर्पयन्ति। महाभारतस्य अनुशासनपर्वणि स्त्रियाः लक्ष्मीरूपेण चित्रिताः वर्तन्ते। साक्षात् श्रियः वासस्थानं स्त्रियः एव सन्ति। तत्रोक्तम् - **स्त्रियो यत्र च पूज्यन्ते रमन्ते तत्र देवता[2]।**

---

* सहायकाचार्यः,, शिक्षाशास्त्रविभागः, केन्द्रीयसंस्कृतविश्वविद्यालयः, राजीवगान्धिपरिसरः, मेणसे, श्रृंगेरी, चिक्कमंगलूरु, कर्नाटकम्।

[1] मनुस्मृतिः 3.56

[2] अनुशासनपर्व 46.5

ताः सत्त्वगुणसम्पन्नाः, महाव्रतसम्पन्नाः धर्मचारिण्यश्च भवन्ति। तासाम् एतादृशगुणानां निरूपणं महाभारतस्य आदिपर्वणि कृतमस्ति -

**सत्त्वरूपगुणोपेता धर्मरामा महाव्रता।**
**दुहिता कुन्तिभोजस्य पृथा पृथुललोचना ॥**
**तां तु तेजस्विनीं कन्यां रूपयौवनशालिनाम्।**
**व्यवृण्वन् पार्थिवाः केचिदतीव स्त्रीगुणैर्युताम्[1] ॥**

स्त्रीणां सामान्यगुणेषु सौन्दर्यवती, वयसि चञ्चला, भीरुत्वं, लज्जावती, सेवापायणा च बहवः स्वभावजाः गुणाः वर्तन्ते। एतेषां गुणानां सृष्टिः प्रायशः बह्वीनां स्त्रीणां जीवने दृश्यते। विपत्तौ सम्पत्तौ च बहुवारं पुरुषाणां साहाय्यं नार्यः एव कुर्वन्ति। तासां चिन्तनक्षमता अपि विशिष्टा भवति। मनोवैज्ञानिकरीत्या ताः चिन्तनरताः दृश्यन्ते। यां कामपि परिस्थितिं विलोक्य ताः निर्णयं स्वीकुर्वन्ति। महाभारतस्य सभापर्वणि अस्मिन् प्रसङ्गे प्रोक्तम् -

**कथं सद्धर्मचारित्रान् वृत्तस्थितिविभूषितान्।**
**आक्षुद्रान् दृढभक्तांश्च दैवतेज्यापरान् सदा ॥**
**व्यसनं वः समभ्यागात् कोऽयं विधिविपर्ययः।**
**कस्यापध्यानजं चेदं धिया पश्यामि नैव तत्[2] ॥**

महाभारते गान्धारी सुबलस्य पुत्री सङ्केतिता। तस्याः वैदुष्यं, कार्यकौशलं, शीलाचारश्च प्रमुखाः गुणाः महर्षिणा वेदव्यासेन प्रोक्ताः वर्तन्ते -

**गान्धार्यपि वरारोहा शीलाचार विचेष्टितैः।**
**तुष्टिं कुरूणां सर्वेषां जनयामास भारत ॥**

[1] आदिपर्व 111.1-2

[2] सभापर्व 79.13-14

**वृत्तेनाराध्य तान् सर्वान् गुरून् पतिपरायणा।**
**वाचापि पुरुषानन्यान् सुव्रता नान्वकीर्तयत्[1] ॥**

उक्तयोः श्लोकयोर्मध्ये गान्धारी आदर्शपतिव्रता लक्ष्मी धर्मपरायणा च मता। तस्याः सर्वोत्तमव्यवहारेण कौरवाः प्रसन्नाः अभवन्। गुरुजनानां कृते अपि सा सर्वदा सद्व्यवहारमेव प्रदर्शयति स्म। तस्याः वाचि सत्यमेव आसीत्। भीष्ममुखेन अपि गान्धार्याः शीलगुणाः निगदिताः सन्ति -

**कुलीनाः रूपवत्यश्च ताः कन्याः पुत्र सर्वशः।**
**उचिताश्चैव सम्बन्धे तेऽस्माकं क्षत्रियर्षभाः[2] ॥**

तथैव श्रीकृष्णस्य मुखात् मातुः गान्धार्याः कृते श्लाघनीयवचांसि निःसृतानि। तस्याः वैदुष्यं तु उत्तममेव आसीत् इति प्रमाणितं भवति। श्रीकृष्णेन स्पष्टीकृतं यत् राजसभायां सा गान्धारी धर्मयुक्तम् उपदेशं कृतवती। श्रीकृष्णः प्रोक्तवान् -

**त्वत्समा नास्ति लोकेऽस्मिन्नद्य सीमन्तिनी शुभे।**
**जानासि च यथा राज्ञि सभायां मम सन्निधौ।**
**धर्मार्थसहितं वाक्यमुभयोः पक्षयोर्हितम्।**
**उक्तवत्यसि कल्याणि न च ते तनयैः कृतम् ॥**
**दुर्योधनस्त्वया चोक्तो जयार्थी पुरुषं वचः।**
**श्रृणु मूढ वचो मह्यं यतो धर्मस्ततो जयः ॥**
**यदिदं समनुप्राप्तं तव वाक्यं नृपात्मजे।**
**एवं विदित्वा कल्याणि मा स्म शोके मनः कृथाः ॥**
**पाण्डवानां विनाशाय मा ते बुद्धिः कदाचन।**

---

[1] आदिपर्व 109.18-19

[2] तत्रैव, 109.6

**शक्ता चासि महाभागे पृथिवीं सचराचरम्[1] ॥**

महर्षिः व्यासः गान्धार्याः क्षमाशीलतां प्रकटयति। युधिष्ठिरस्य युद्धे विजयं विलोक्य सा सद्य एव कुपिता सञ्जाता। तस्याः पूर्ववर्णितगुणानां विषये महर्षिः व्यासः ताम् उपदिशति यत् भवतीनां गुणास्तु लोके प्रसिद्धाः वर्तन्ते। जनानां हृदये एतादृशस्त्रीणां कृते सर्वदा पवित्रं स्थानं भवत्येव। अत एव धर्मस्य प्रतिमूर्तिस्तु भवती एव विद्यते। व्यासः उक्तवान् -

**क्षमाशीला पुरा भूत्वा साद्य न क्षमसे कथम्।**
**अधर्मं जहि धर्मज्ञे यतो धर्मस्ततो जयः[2] ॥**

स्त्रीणां स्वभावे वात्सल्यगुणः प्रामुख्येन भवति। तासां ममत्वं पुत्रेषु बहु दृश्यते। मातुः लोके यत् वैशिष्ट्यं वर्तते तदनुसारं गान्धारी स्वयमेव उदात्तगुणसम्पन्ना भूत्वा तस्याः मनोभावान् व्यनक्ति। निष्कपटभावेन, निष्कपटेन मनसा दयापूर्णरीत्या च गान्धार्याः व्यवहारः वर्तते। द्रौपद्याः कुन्त्याः कृते च शोककाले तस्याः उद्बोधनं बहु श्लाघनीयं विद्यते -

**मैवं पुत्रीति शोकार्ता पश्य मामपि दुःखिताम्।**
**मन्ये लोकविनाशोऽयं कालपर्यायनोदितः ॥**
**अवश्यम्भावीं सम्प्राप्तः स्वभावाल्लोमहर्षणः।**
**इदं तत्समनुप्राप्तं विदुरस्य वचो महत् ॥**
**असिद्धानुनये कृष्णे यदुवाच महामतिः।**
**तस्मिन्नपरिहार्येऽर्थे व्यतीते च विशेषतः ॥**
**मा शुचो न हि शोच्यास्ते संग्रामे निधनं गताः।**
**यथैवाहं तथैव त्वं को नावाश्वासयिष्यति।**
**ममैव ह्यपराधेन कुलमग्र्यं विनाशितम्[3] ॥**

---

[1] शल्यपर्व 63.60-64

[2] स्त्रीपर्व 14.12

[3] तत्रैव, 15.41-44

गान्धारी वदति यत् अहमपि दुःखे निमग्ना अस्मि। ममापि सर्वस्वं गतम्। संसारे सर्वेषां शोकग्रस्तानाम् एतादृशी एव स्थितिः। तत्फलेन शोकः त्याज्यः। कदापि शोकः नैव कर्तव्यः। आशामयं जीवनं वर्तते। इति विचार्य धैर्येण अस्माभिः एतत् मानवजीवनं यापनीयम्। धर्मज्ञा गान्धारी तस्याः पुत्रवधूनां वैधव्यविषये श्रीकृष्णं न्यवेदयत् -

**पश्यैताः पुण्डरीकाक्ष स्नुषा मे निहतेश्वराः।**
**प्रकीर्णकेशाः क्रोशन्ती कुररीरिव माधव**[1] ॥

बहुभिः समीक्षकैः स्त्रीपात्राणां मनोवैज्ञानिकम् अध्ययनं कृतम्। बहूनां मते स्त्रीणां मनोभावाः कालानुगुणं परिस्थित्यनुगुणं वा परिवर्तिताः भवन्ति। तासां शिक्षा पारिवारिकसंस्काराश्च बहुधा तासां जीवनमपि प्रभावयन्ति। स्त्रीणां सूक्ष्मम् अध्ययनम् अस्मिन् विषये बहुवारं जातमस्ति। बहूनि शोधकार्याण्यपि विहितानि प्रकाशितानि च। डा. उषाशर्ममहाभागा वदति यत् “द्रौपद्याः स्वभावे बहु औदार्यं दृश्यते। एतदेव कारणं वर्तते येन सा पञ्चानां पुरुषाणां पत्नी सञ्जाता। तस्याः धैर्यमपि आसीत् एतत् सर्वं कर्तुमिति”[2]। तस्मिन्महाभारतीयसमाजे एव इयं ’बहुपत्नीप्रथा’ प्रचालिता आसीत्। परन्तु द्रौपद्याः उत्तमाः संस्काराः तस्याः कुटुम्बीयसंस्काराः एव आसन्। येषां प्रभाववशात् सा बुद्धिमती, विदुषी, निर्णयतत्परा, प्रज्ञावती च आसीत्। महाभारतकारः तस्याः पतिधर्मविषये एवं निरूपयति -

**अशेत भूमौ सह पाण्डुपुत्रैः पादोपधानीव कृता कुशेषु।**
**न तत्र दुःखं मनसापि तस्या, न चावमेने कुरुपुङ्गवास्तान्** ॥
**समक्षं तस्य देवर्षेर्नारदस्यामितौजसः।**
**एकैकस्य गृहे कृष्णा वसेद् वर्षकल्मषा**[3] ॥

---

[1] स्त्रीपर्व 16.18

[2] उषा शर्मा, (1990) महाभारत के स्त्री पात्रों का मनोवैज्ञानिक अध्ययन, पृ. सं. 123

[3] आदिपर्व 191.10 , 211.28

द्रौपद्याः भक्तिभावमपि महर्षिः व्यासः उत्तमरीत्या लिखितवान्। कथं तस्याः प्रार्थना तस्मिन् काले आसीत् यस्मिन् क्षणे दुःश्शासनः तां पीडितवान्। सभायां तस्याः मर्यादां गौरवं च नाशयितुं स उद्यतोऽभवत्। तदानीं आर्तस्वरेण सा गोविन्दम् अस्मरत्। सा आत्मनिवेदनं कृतवती। द्रौपद्याः ज्ञान्स्य इदम् औत्कृष्ट्यं वर्तते यत् सा भक्तिमार्गं चिनोति। तादृशी तत्त्वबोधयुक्ता दृष्टिः द्रौपद्याः वर्तते। सभापर्वणि महर्षिणा व्यासेन तस्याः भगवत्स्तुतेः सुन्दरं निरूपणं कृतम् -

**गोविन्द द्वारिकावासिन् कृष्णगोपीजनप्रिय।**
**कौरवैः परिभूतां मां किं न जानासि केशव ॥**
**हे नाथ हे रमानाथ व्रजनायार्तिनाशन।**
**कौरवार्णवमग्नां मामुद्धरस्व जनार्दन ॥**
**कृष्ण कृष्ण महायोगिन् विश्वासान् विश्वभावन्।**
**प्रपन्ना पाहि गोविन्द कुरुमध्येऽवसीदतीम्**[1] **॥**

द्रौपद्याः व्यक्तित्वे ज्ञानगाम्भीर्यं, वाक्पटुत्वं, सहिष्णुभावः, लोभराहित्यं, पतिव्रतशीलत्वं, सत्यपरायणत्वं च बहवः गुणाः दृश्यन्ते। एतेषां सद्गुणानां प्रभाववशात् सा सुशीला विनयसम्पन्ना लोके आदरभाजा च अभवत्।

मानवशास्त्रे बहुभिः शोधार्थिभिः स्त्रीणां जीवनविषये बहु अध्ययनं कृतमस्ति। स्त्रीणां सांस्कृतिकमध्ययनं विवाहविषयकं च अध्ययनं सेंडे-लीकॉक-अर्डनर-एटर-दुबे[2] प्रभृतीभिः वैज्ञानिकरीत्या विहितम्। समाजशास्त्रस्य अस्मिन् विषये महत्त्वपूर्णं योगदानं वर्तते। विशिष्य

---

[1] सभापर्व 68.41-43

[2] Sandy (1981), Leacock (1981,1983) Ardner (1986), Reiter (1982), Dube (1986,1988,1993) identified various factors. Prof. Maitreyi Krishnaraj, 22nd J. P. Naik Memorial Lecture series 27th Sep. 2012 India International Centre New Delhi, Women's studies in Academia and Development Discourse, p. 3

नारीणां क्षेत्रविषये, तासां स्वातन्त्र्यविषये, तासां संरक्षणविषये, कुटुम्बस्य स्तरविषये, तासाम् अन्तर्द्वन्द्व (Conflict) विषये च बहवः अध्ययनसम्बद्धाः विद्यन्ते। आदर्शमानव्यवहारे नारीणां कृते उत्तमं स्थानं कल्पयितुं महापुरुषैः समाजे यत्नाः कृताः।

ऐतिहासिकदृष्ट्या महाभारते मनसः अवस्थायाः अनुगुणमपि स्त्रीणां प्रकृतेः वर्णनं प्राप्यते। उच्चकुले प्राप्य बहुवारं तासां जीवने कष्टपूर्णा परिस्थितिः समुत्पद्यते। तस्याः निवारणार्थं ताः बहून् यत्नान् कुर्वन्ति। तदपि धर्मनिर्वहणे, कर्तव्यपरिपालने, ब्रह्मचर्यरक्षणे च तासां दृढप्रतिज्ञा एव आसीत्। सुशिक्षितानां स्त्रीणामेव प्रायशः एतादृशम् आचरणं भवति। महाभारते पतिवियोगे दमयन्त्याः मनोदशां निरूपयति महर्षिः व्यासः। यथोक्तम् -

**पौर्णमासीमिव निशां राहुग्रस्तनिशाकराम्।**
**पतिशोकाकुलां दीनां शुष्कस्रोतां नदीमिव ॥**
**कामभोगैः प्रियैर्हीनां बन्धुजनेन च।**
**देहं धारयन्तीं हि भर्तुर्दर्शनकाङ्क्षया[1] ॥**

कदाचित् अशिक्षिताः कुटिलाश्च नार्यः मन्दबुद्धिजनान् पीडयन्ति। तेषां कृते ताः सर्वदा दुःखमेवोत्पादयन्ति। दुष्टानां नारीणाम् अनुपयुक्तव्यवहारेण समाजे बहवः कष्टमपि अनुभवन्ति। तादृशाः दोषाः तासु न स्युः। ताः सदैव हितकारिण्यः, संस्कारयुक्ताश्च भवेयुः। शान्तिपर्वणि उक्तमस्ति -

**गृहस्नेहावबद्धानां नराणामल्पमेधसाम्।**
**कुस्त्री खादति मांसानि माघर्मो सेगवा इव ॥**
**कुभार्यां च कुपुत्रं च कुराजानं कुसौहृदम्।**
**कुसम्बन्धं कुदेशं च दूरतः परिवर्जयेत् ॥**

---

[1] वनपर्व 68.14-18

**सा भार्या या प्रियं ब्रूते स पुत्रो यत्र निर्वृतिः।**
**तन्मित्रं यत्र विश्वासः स देशो यत्र जीव्यते[1] ॥**

एवं वक्तुं शक्यते यत् महर्षिणा वेदव्यासेन महाभारते ऐतिहासिके काव्ये स्त्रीणां शिक्षाविषये बहवः अंशाः विमृष्टाः वर्तन्ते। तेषु स्त्रीणां परमौदार्यं, क्षमाभावः, शीलगुणः, सारल्यं प्रकृतौ, ममत्वं, विविधक्षेत्रेषु निर्णयकौशलं, नीतिनैपुण्यं, कुटुम्बस्य कृते त्यागवृत्तिः, तिरस्कारं सोढ्वा अपि विनयशीलता, गृहस्थधर्मपरिपालनं, विशिष्टरूपेण वृद्धानां सेवा, अतिथिसत्काराः, बालकानां शिशूनां च कृते वात्सल्यं विद्याध्ययनं च प्रमुखाः वर्तन्ते। अत एव तैत्तिरीय-उपनिषदि सा मातृरूपेण आराध्या मता। स्त्रीणां शिक्षा कस्यापि राष्ट्रस्य कृते सर्वदा महत्त्वपूर्णा भवति। राष्ट्रस्य विकासः स्त्रीणां हस्ते एव वर्तते।

## अनुशीलिताः ग्रन्थाः

1) कुजुर, स्कालस्टिका (2001), महाभारतकालीननारी. ईस्टर्न बुक लिंकर्स, दिल्ली
2) गोस्वामी, रघुवीर प्रसाद (2000), महाभारत के उपाख्यान. कमल प्रकाशन, इन्दौर
3) त्रिका, राजकुमारी (2008), महाभारत में विज्ञान दर्शन और समाज. अभिषेक प्रकाशन, दिल्ली
4) पाण्डेय, कृष्णानन्द (2005), महाभारत में नारी. नाग पब्लिशर्स
5) विद्याशंकर, सुभाष (2009), महाभारत सूक्ति सुधा. प्रतिभा प्रकाशन, दिल्ली
6) वेदव्यास (सं.2055), महाभारत 5 खण्ड, शान्ति पर्व (समा०) गीताप्रेस, गोरखपुर
7) वेदव्यास (सं. 2044-2046), महाभारत 1-6. सम्पा, गीताप्रेस, गोरखपुर

❑❑❑

[1] शान्तिपर्व 139/89,93,96

# History of Indra-mahotsava in ancient India and traces in current Asia

**Manisha Deepak Puranik***

Abstract

From an ancient period celebration of festivals become a cultural need of society. With the evolution of concept of God, festivals start celebrated in the name of these Gods. Among them, *Indra-mahotsava* was the most important festival in ancient India. This festival was celebrated for the god Indra, the most important deity from the Vedic period.

This festival was celebrated in memory of Indra's victory over *asuras*. There are references of this festival in the texts like *Atharva-veda, Mahabharata, Brihata samhita, Devipurana* etc. Many texts give the rituals for this festival also. Along with *Vedic & Pauranic* texts we get references of this festival in Buddhist and Jain literature also. After the degradation of Indra as a god, the popularity of this festival decreased. But even today, in some part of Asia this festival is still celebrated by people.

In this paper attempt is made to trace the history of *Indra-mahotsava* in ancient India from different literary sources. Also an effort is made to find footprints of this festival in some part of current Asia like Nepal and Indonesia.

---

*Indra-mahotsava* was one of the most important festival in ancient India, which also called as *Indramaha* or *Shakramaha*. This festival was celebrated in memory of Indra's victory over *asuras*. A tall wooden pillar was erected in honor of Indra, which was called as *Indrayashti*. This festival was celebrated not only by kings but common people also. In this paper attempt is made to trace the history of *Indra-mahotsava* from different literary sources.

* Research Scholar, Tilak Maharashtra Vidyapeeth, Pune, Maharastra.

Indra most commonly acknowledged as the king of gods. The references of Indra are throughout *Rigveda* and other Vedas as he was the most powerful god[1]. Both the parties in battle worshiped Indra for success. In *Rigveda* there is a concept that, the party wins in battle whose supporter is Indra[2]. The tradition of worshiping *Indradvaja* is probably the concept of having Indra in a symbolic form with us for victory.

There are many stories about this festival. Out of them two stories are related with *Uparichara Vasu*, the King of Chedi.

1) As described in the *Adipurana* of *Mahabharata*, *Uparichara* was a monarch of the Chedi kingdom. He performed a long and onerous meditation. Pleased with this, lndra gifted *Uparichara* with an aerial vehicle and the *Vaijayanti* Garland of ever-fresh lotuses (which always ensured victory over enemies). *Uparichara* also received the gift of a tall bamboo pole having the power of destroying enemies. Then the king returned to his capital and inaugurated a *Indradhvaja*. The festival of this pole was made an annual feature to serve as worship of lndra[3].

2) As per narrative in *Brihat-samhita*, the banner staff did not originate from Indra but was gifted to him by Vishnu to frighten away the *asurus*. Once after defeated by *asuras*, Indra came to Brahma. Brahma send him to Vishnu. Vishnu gave him a flag and by the effect of this flag Indra defeated *asuras* in the battlefield. In later period Indra handed over this flag to Chedi king Vasu. By worshipping this flag Vasu got prosperity[4].

**Rituals -**

*Varahamihira* states that king *Uparichara* Vasu inaugurated the Banner Festival on earth. *Brihat-samhita* prescribes auspicious stellar and

---

[1] Rigveda 2.12.9
[2] Ibid 2.12.8
[3] Bharatiya Samskriti Kosha, 534
[4] Brihat Samhita, 43

planetary conjunctions on which the king should send an astrologer and a carpenter to a forest for selection of a tree, preferably the *arjuna*, *chapha*, *sanvar* or *kalamba*. On eighth day (*ashtami* the bright half - *Shuklapaksha*) of *Bhadrapada*, after worshipping the selected tree, a prayer is made to the tree to give a shaft for *Indradvaja*. The tree is felled the next day. It is brought to the capital for erection on the eighth day of the bright-half of *Bhadrapada*. On *ekadashi* (eleventh day) of the same fortnight, that is three days later, the stem is pared and chiseled into shape. If the height of shaft is 52 *hasta* it is of best grade, 32 *hasta* middle grade and 22 *hasta* lower grade. It is decorated with ornaments, garlands of fragrant flowers. Idol of Indra is installed at the bottom of shaft. It should be erected at the entrance of city or palace. It is raised by the king on the next day i.e. *dwadashi* with (or even without) lunar conjunction with *shravana nakshatra*. The celebration concludes on the first day of the dark-half of the same month when the *dhvaja* is lowered. In *Sanskrita* drama *Mrichchhakatika*[1] there is a reference of *Indradhvaja*, that it should be installed with proper celebration but *visarjana* of *dhvaja* should be made secretly in forest.

*Kalikapurana* also have the same reference.

**उत्थापयेत्तूर्यरवैः सर्वलोकस्य वै पुरः।**
**रहो विसर्जयेत्केतुं विशेषोऽयं प्रपूजने।।**

Meaning - Erection should be done in front of all people with celebration but *visarjana* should be done secretly, this is its specialty[2].

The festival commences with ceremony, in which *Brahmanas* worshipped with food, drinks and clothes, recite Vedic mantras invoking auspiciousness. The banner is then raised to the accompaniment of sounds of *mridanga, bheri* and *shankha*. Mahabharata also describes this

---

[1] Mrichchhakatika, 10.7
[2] Bharatiya Samskriti Kosha

celebration. People in cities and villages dress in colorful clothes with flower-garlands. Dramas and dances are performed. The king also enjoys the festival, dressed colorfully and ornamented with queens and ministers[1].

We get references of *Indra-mahotsava* in different texts.

*Atharva-veda parishista*[2] gives the rituals to be performed by King and his *purohita* to perform this festival. The prayer is made for prosperity of the king, to get support from Indra in the battlefield and for protection from enemies[3].

*Kaushika-sutra*[4] explains the rituals of *Indra-mahotsava*, which is performed for the prosperity of the king. *Indradhvaja* is erected on eighth day of bright half of the month of *Bhadrapada* or *Ashvina*[5].

According to *Parashara grihyasutra*[6], at the end of this festival, a *naimittika yaga* called as *Indra-yaga* is to be performed on full moon day of *Bhadrapada* month[7].

*Bhagavata purana* also mentions *Indra-yaga*. In *Gokula*, every year *Indra-yaga* was performed in honor of Indra for rain. One year Krishna refuses to do *Indra-yaga* as rain is a natural phenomenon. Instead of that he told people to do *puja* of cows, mountains, *brahmanas* etc. So the *Gopas* did not performed *Indra-puja*. Indra got angry and he started raining heavily. At that time Krishna lifted *Govardhana* mountain on the tip of his finger to keep safe all *gopas*[8].

---

[1] Adiparva, 64.23-33
[2] Atharva-veda parishista, 19
[3] Gonda, p.414
[4] Kaushika-sutra, 140
[5] Kane, p.825
[6] Parashara-grihyasutra, 2.15
[7] Bharatiya Samskriti Kosha
[8] Bhagavata Purana, 10.24 (Bharatiya Samskriti Kosha)

According to *Vishnudharmottara purana*[1], king has to perform this festival to destroy his enemies and to get victory, to get prosperity, growth in his kingdom. Also there are references about how to erect *Indradhvaja*, how to decorate town, how to perform music and dramas and celebrations[2].

In *Natyashastra, Bharata muni* emphasizes that first performance of drama should be done on occasion of *Indra-mahotsava*. *Bharatanatya-shastra* gives the reference that the first play *'Samudramanthana'* was performed in theatre of *Svarga* on the occasion of *Indra-mahotsava*.

अयं ध्वजमहः श्रीमान् महेन्द्रस्य प्रवर्तते ।
अत्रेदानीमयं वेदो नाट्यसंज्ञः प्रयुज्यताम् । ।[3]

In the drama *'Nagananda'*, written by *Shriharsha* (king Harshavardhana), *sutradhara* says that, this show is being played at the time of *Indra-mahotsava*[4].

*Mitakshara*, a commentary on *Yajnavalkasmriti* from 12th cent. CE, gives the reference of *Indradhvaja*. It says, King can erect the *dhvaja* on the 12th day of bright half of *Bhadrapada* month and at that time moon should be in *uttarashadha* or *dhanishtha nakshatra. Dhvaja* can to be lowered on full moon day of same half and in *bharani nakshatra*[5].

Jain literature also mentions of *Indra-mahotsava*. In *Avashyaka churni*, once Indra shows his divine finger to Bharat, son of first

---

[1] Vishnudharmottara purana, 2.154-157
[2] Gonda, p.3
[3] Bharata Natyashastra, 54
[4] Nagananda, 1-2
[5] Kane, p.825

Tirthankara Rishabhadeva. Bharat made an image of Indra of the same size of that finger and celebrated *mahotsava*[1].

*Paryushana shataka*, a Jain text in *Magadhi* language also mentions *Indra-mahotsava*. *Acharya Kalaka* once visited Satavahana king in Pratishthana. They discussed about the celebration of *paryushana parva* in the month of *Bhadrapada*. *Acharya Kalaka* told that, *paryushana parva* will start on *panchami*. Satavahana king explained that on the fifth day there is *Indra-mahotsava* in Pratishthana, so *paryushana parva* cannot be start on *panchami*. *Acharya Kalaka* then shifted date of *parva* from *panchami* to *chaturthi*[2].

*Sthananga sutra*, a Jain agamic text states the period of this festival from 9th day to full moon day of bright half of *ashvina* month[3].

Jain text like *Uttaradhyayan-sutra* narrates the stories of *Pratyeka Buddha*. There is a story of king Dvimukha. After celebration of *Indra-mahotsava*, he saw *Indra-dhvaja* laying down on the road, seeing this he got self enlightened.

Normally this festival is celebrated from 8th day to full moon day of *Bhadrapada* month. But the famous Tamil text *'Shilappadhikaram'* mentions the celebration of festival till 28 days from full moon day of *Chaitra* month.

We also get reference of *Indra-mahotsava* in following texts :

| Writer | Text |
|---|---|
| Bhasa | Balacharita (1.8), Madhyamavyayoga |
| Ashvaghosha | Buddhacharita (1.58), Saundarnandakavya (4.46) |

---

[1] Avashyaka churni, p.213
[2] Manikar, p.169
[3] Bharatiya Samskriti Kosha, p.534

| | |
|---|---|
| Bhavabhuti | Mahaviracharita (1.11) |
| Somadeva | Kathasaritsagara |
| Kalhana | Rajatarangini (170, 182, 495) |

Prakrit texts *Nayadhammakahao* and *Bhagavatisutra* also mentions *indalaththi (indrayashti*) which refers to *Indradvaja*.

In different regions this festival was celebrated in different periods. Generally from texts we get the references that this festival was celebrated in the month of *Shravana*, *Bhadrapada* or *Ashvina*. Indra is a deity associated with the rain and these are months from rainy season. This shows that the celebration of *Indra-mahotsava* is associated with the rain. In some regions this festival was celebrated in the month of *Chaitra*. This may be referring to the celebration of *Gudhipadava*. More study on this topic is to be done.

**Indra-mahotsava outside India**

**Nepal :**

The eight-day long *Indra Jatra* festival falls in September and is one of the most exciting and revered festivals of the Newar community of the Kathmandu Valley. This also marks the beginning of a month-long festival season of autumn. It begins with the erection of a wooden pole made of pine at Basantapur Sqaure in front of the old Hanuman Dhoka Palace.

The eight day long annual festival is observed to worship the god *devraj* Indra, the lord of rain and good harvest. King with his royal family attends this festival with traditional costumes. The priest erects the

*Indra-dvaja* after *puja* rituals. Idol of Indra riding on golden elephant is kept at the bottom of *dvaja*[1].

It also marks end of monsoon and beginning of harvest season and festivity. The chariot procession and mass dances are the main attraction of *Indra Jatra*. The festival commemorates the time when Indra came down from heaven in human form to look for an herb. The festival of *Indra Jatra* ends with the lowering of the (lingam) pole bearing Indra's flag amidst religious ceremonies.

**Indonesia :**

There is no direct reference of celebrating *Indra-mahotsava* in Indonesia. But a festival called as *Galungan* from Indonesia is similar to *Indra-mahotsava. Galungan* symbolizes the victory of *Dharma* over *Adharma* or virtue over evil which has its origin in the mythology of "*Mayadenawa*". During the festival, all across island sprout tall bamboo poles called "*penjor*" – that are decorated with fruit, coconut leaves, and flowers, and set up on the right side at the entrance of every home.

The last and pinnacle event in the ten day festival is called *Kuningan*. It is believed that on this particular day, the Supreme God *Sang Hyang Widi* descends to earth to give blessing for all the people.

**Summary**

With reference to the information about this festival from different texts, one can understand that this festival is familiar with the Indian society from Vedic to Pauranic period, from North to South India and in Hindu, Jain and Buddhist traditions also. Upto 11-12th cent. there are literary references of *Indra-mahotsava*. This festival has approximately 1800 years continuous tradition in literature.

[1] Anderson, p.98

*Indra-mahotsava* was a popular festival in ancient time but from medieval period its popularity decrease. Indra was worshiped as being mainly vedic deity, but from pauranic period as importance of Indra decreases and other deities became popular, then may be this festival lost in the mists of time.

Being a very popular festival all over India since ages, now a days there can be some references of this festival in local traditions only. More study is required to be done by scholars, to find the traces of *Indra-mahotsava*, in India and also outside India specially where we get footprints of Hinduism or Buddhism.

## Bibliography


- Anderson, Mary, 1971, *The Festivals of Nepal*, Allen & Unwin Ltd., London.
- Chronology from *'An Encyclopedic Dictionary of Sanskrit on Historical Principles'* by Deccan College, Post Graduate and Research Institute.
- Gonda, Jan, 1967, *The Indra Festival According to the Atharvavedins*, Journal of the American Oriental Society, Vol. 87, No. 4, American Oriental Society
- Joshi, Mahadevshashri, (ed.), 1962, *Bharatiya Samskritikosha*, vol. 1, Bharatiya Samskritikosha Mandala, Pune
- Joshi, Nalini, 2009, *A Brief Survey of Jaina Prakrit and Sanskrit Literature*, Sanmati-Teerth Prakashan, Pune.
- Kane P.V., 1941, *History of Dharmashastra*, Vol.II, Part II, Bhandarkar Oriental Research Institute, Pune.

- Mainkar, T.G. (Ed), 1974, *Writtings and Speeches of Dr. Bhau Daji Lad*, University of Bombay.
- Sadhvi Sanghamita, 1979, *Jaindharma ke Prabhavaka Acharya*, Jain Vishava Bharati Prakashan, Rajasthan
- Shah Umakant P., 1987, *Jain Rupa Mandan*, vol.1, Abhinav Prakashan, New Delhi
- Shastri, Babulal, 2009, *Bharata Natyashastra*, Chaukhamba Sanskrit Sansthan, Varanasi
- Tripathishastri, Ramnath, 1976, *Naganand Natakam*, Chaukhamba Amarbharati Prakashan, Varanasi


## Internet sources


- Ref : https://www.welcomenepal.com/whats-on/indra-jatra.html (accessed on 20.11.19)
- http://www.baliblogger.info/galungan-in-bali/ (accessed on 28.11.19)
- https://www.wonderfulbali.com/galungan/ (accessed on 30.11.19)
- https://www.indonesia.travel/in/en/event-festivals/the-galungan-and-kuningan-religious-festivals-on-bali (accessed on 30.11.19)


❑❑❑

**महस्विनी – विद्वत्समीक्षिता सन्दर्भिता च शोधपत्रिका (ISSN: 2231-0452)**
**कुसुमम् :** जनवरी – डिसेम्बर २०२१ **सम्पुटम् :** संयुक्तम् (१,२)

# अन्नंभट्टकृतोद्योतनदिशा 'कारके' इति सूत्रसमीक्षणम्

**शुभङ्करसामन्तः***

न्यायवैशेषिकशास्त्रमवलम्ब्य प्रारम्भिकछात्राणां सुखबोधायाऽऽन्ध्रप्रदेशस्थ-कृष्णानदीतटोपान्तवर्तिगरिकापादजनपदमलङ्कृतवताऽद्वैतविद्याचार्यमहामहोपाध्यायपदसंभूषित तिरुमलाचार्यसुतेना[1]ऽऽचार्यान्नंभट्टेन परिचयात्मकस्तर्कसंग्रहो व्यधायीति सर्वजनविदितमेव। यद्यप्यचार्यान्नंभट्टस्य नैयायिकत्वप्रसिद्धिस्तथापि वैयाकरणधुरीणत्वमपि नभस्स्पर्शि वरीवर्त्ति। वस्तुतस्तु सर्वतन्त्रपारावारीणत्वेनैव काशीस्थकौण्डिपुरा[2]ऽन्तेवासिनोऽन्नंभट्टस्य लोकप्रसिद्धि-र्दरीदृश्यते। न च केवलं न्यायवैयाकरणे वेदान्तादिशास्त्रेष्वपि त्वभिनवग्रन्थास्समुपलभ्यन्ते। तेष्वन्यतमाः **महाभाष्यप्रदीपोद्योतनम्**, **तर्कसंग्रहः**, **तर्कसंग्रहदीपिका**, **मिताक्षरा**, **तत्त्वबोधिनीटीका**, **न्यायविशिष्टप्रकाशः**, **राणकोज्जीविनी** अथवा **सुबोधिनीसुधासारः**।

एतेष्वाचार्यान्नंभट्टस्स्ववैयाकरणत्वं सासाद्धि महाभाष्यप्रदीपोद्यतने। कैय्यटविरचित-प्रदीपमाश्रित्य नागेशस्य **उद्योत**व्याख्या सर्वसंविदितैव। नामसाम्यादप्यन्नंभट्टस्याभिनवेयं व्याख्या नागेशव्याख्यायास्सर्वथा भिन्ना सुप्राचीना च। अत्र मूलमहाभाष्यस्य तथा प्रदीपव्याख्यायाश्च गूढरहस्यस्योद्घाटनन्दरीदृश्यते। यद्यपीयं कैयटकृतप्रदीपव्याख्या वर्तते तथापि कतिपयस्थलेषु प्रदीपमतं निराकृत्य स्वतन्त्रमार्गमाश्रयति स्वमतञ्च पुपोषयति।

* विद्यावारिधिच्छात्रः, व्याकरणविभागः, राष्ट्रियसंकृतविश्वविद्यालयः, तिरुपतिः।

[1] इति श्रीमहामहोपाध्यायाद्वैतविद्याचार्यराघवसोमयाजिकुलावतंसश्रीतिरुमलाचार्यवर्यस्य सूनोरन्नंभट्टस्य कृतिषु भाष्यप्रदीपोद्यतने।

[2] काशीगमनमात्रेण नान्नम्भट्टायते द्विजः।

ग्रन्थममुञ्च समाश्रित्य बहवः पण्डितास्स्वग्रन्थं संरचयामासुः। एतत्प्रभावो नागेशग्रन्थेऽपि क्वचिद्द्रष्टुं शक्यते। अतस्तावत्प्रदीपोद्योतनदिशा **कारके** इति सूत्रं समाश्रित्य समासेन पर्यालोच्यते।

**पदविश्लेषणम्**

**कारके** इति करोति क्रियां निर्वर्त्तयतीति कर्तर्यर्थे करणार्थकात् डुकृञ् धातोः **ण्वुल्तृचौ** इत्यनेन सूत्रेण ण्वुल्प्रत्यये **युवोरनाकौ** इत्यकादेशे आदिवृद्धौ कारकमिति। तस्मिन् कारके। सप्तम्येकवचनान्तं पदम्। एकपदात्मकं सूत्रम्।

प्रथमाध्याये चतुर्थपादे तृतीयाह्निके प्रथमन्तावत्सूत्रं **कारके** इति। **कारके** इति सप्तम्येकवचनान्तं पदम्। प्रसिद्धेषु पाणिनीयषड्विधेषु[1] सूत्रेष्विदं संज्ञापरकमधिकारसूत्रम्।

कारके इत्यारभ्य **प्रागीश्वरान्निपाताः** इति सूत्रात्प्रागधिक्रियते।

**अन्नभट्टकृतप्रदीपोद्योदनदिशा सूत्रविचारः—**

सूत्रे आदौ शङ्का समुदेति सप्तमीनिर्देशत्वात्संज्ञात्वेनाऽधिकारो न सम्भवति, संज्ञाया भाव्यमानत्वात्प्रथमानिर्देशेन न्यायत्वाच्च। यदि च व्यत्ययेन प्रथमार्थे सप्तमीति स्वीकृत्य विशेषणत्वेनाधिकारोऽर्थात्कारकं ध्रुवमपादानमित्येवरूपेण तदा कारकाद्दत्तश्रुतयो-रेवेत्यादावाशिषि गम्यमानायां क्तान्तयोरन्त उदात्तस्स्यात्। तदाऽत्र समाधानमुद्योतने दृश्यते यथा- **अत्र व्यत्ययेनैव प्रथमार्थे सप्तमी भवति**[2], भाष्ये च व्यत्ययेन सप्तमीत्यस्य प्रमाणमपि

---

[1] संज्ञा च परिभाषा च विधिर्नियम एव च।
अतिदेशोऽधिकारश्च षड्विधं सूत्रमुच्यते॥

[2] महाभाष्यव्याख्यानानि, पृ.२८१

दर्शितं प्रदीपे यथा— **सुपां सुपो भवन्तीति**[1]। एवञ्च देवा एनं देवासुर्देवदत्तः, विष्णुरेनं श्रूयाद्विष्णुदत्त इत्यत्र आशीर्लिङा आशिषः प्रख्यापनं क्रियते। तेनाऽऽशिषि गम्यमानाभावादन्तोदात्तस्वरो न भवति। समासस्तु देवैर्दत्तो देवदत्तः, विष्णुना श्रुतो विष्णुश्रुत इति **कर्तृकरणे कृता बहुलम्** इति सूत्रेणैव भवति। परन्त्वपादानादिसंज्ञारहितस्य दत्तश्रुतशब्दाभ्यां यत्र शेषषष्ठ्या **सह सुपा** वा समासस्तत्र त्वन्तोदात्तस्वरो भवति। अतो विशेषणत्वेन कारके इति संज्ञापक्षे समावेशस्सम्भवतीति भावः।[2]

अत्र च द्वितीयशङ्का समुदेति यदि संज्ञानिर्देशः क्रियते तर्ह्यवश्यं संज्ञिनिर्देशोऽपि कर्तव्यः, यथा साधकं निर्वर्तकं कारकसंज्ञं भवतीति। किञ्चाऽपरा शङ्का **आकाडारादेका संज्ञा** इत्यधिकारे कारके इति सूत्रं वर्तते, अतो विशेषणत्वेन कथं संज्ञापक्षं स्वीकर्तुं शक्यते। तदाऽस्य समाधानं भाष्ये उद्योतने चेत्थंरीत्या प्रदर्श्यते यत्- **ध्रुवमपायेऽपादानम्** इत्यादिसूत्राणां योगविभागः क्रियते। तथा च ध्रुवमपाये इत्येकं सूत्रम्, अपादानमिति च द्वितीयसूत्रम्। तथा च ध्रुवमपाये इति सूत्रे कारकस्याधिकारो वर्तते, तेन च सूत्रार्थोऽपाये ध्रुवङ्कारकं भवति, अपादानमिति सूत्रेऽपि कारकस्याऽनुवृत्तिरस्ति तेन च सूत्रस्य अर्थोऽपाये ध्रुवं कारकसंज्ञं सदपादानसंज्ञं भवति। अन्तरेणाप्यनुवृत्तिं वचनसामर्थ्यादर्थाद्योगविभागसामर्थ्यात्पर्याये सिद्धे समावेशार्थानुवृत्तिर्विज्ञायते। इत्थञ्च **कर्तुरीप्सिततमं कर्म** इत्यादिसूत्रेष्वपि बोध्यम्। समावेशस्य प्रयोजनं प्रदीपे प्रदर्शितं यत्स्तम्बेरम इत्यादावधिकरणत्वात्सप्तमीकारकत्वात्कृदन्तोत्तरपदस्य प्रकृतिस्वरो भवति।

---

[1] व्याकरणमहाभाष्यम् (कैवयविवरणसहितम्), पृ. ३४४

[2] प्रदीपोद्योतनम्, पृ. २८१

**निष्कर्षः -**

वस्तुतः प्रदीपे **कारके** इति सूत्रस्य संज्ञात्वेनाधिकारस्सम्पादितः। तन्मतमेवोद्योतनकारोऽपि अङ्गीचकार[1]। परन्तु काशिकाकारेण सहात्र मतपार्थक्यमनयोः परिलक्ष्यते। काशिकारेणात्र विशेषणत्वेन **कारके** इत्यस्याधिकारस्स्वीक्रियतेऽर्थात्संज्ञिरूपेण तथा च ध्रुवमापायेऽपादनमित्यादावपादानादयः संज्ञाः कारके इति संज्ञी। एतन्मतसमर्थनञ्च पदमञ्जरीकारेण कृतं यथा— संज्ञापक्षे - अपाये यद् ध्रुवं तत्कारकसंज्ञं भवति, अपादानसञ्ज्ञं चेत्ययमर्थो भवति, एवमन्यत्रापि, ततश्च कारकापादानयोर्युगपद्विधानात्परस्परं निमित्तनिमित्तिभावाभावादकारकस्यापि व्यापारशून्यस्यापादनसंज्ञा प्राप्नोति। विशेषणाधिकारे तु- कारकेषु मध्ये यदपाये ध्रुवं कारकमित्यर्थो लभ्यते, निर्धारणस्य सजातीयविषयत्वादिति व्यापारशून्यस्य सा न प्राप्नोति। अतो विशेषणानुरूपो निर्देशः कृतः, न तु सञ्ज्ञारूपः[2] इति सिद्धान्तितम्। एतन्मतमङ्गीचकार न्यासकारोऽपि। तेन च कञ्चिदितोऽपि योजयित्वा प्रदर्शितं यथा— **कारके इति निर्धारणे सप्तमी, निर्धारणं तु बहूनां सम्भवति, तत्कथमेकवचनेन निर्देशः? सामान्यपेक्षया त्वेकवचनम्। अथवा- छन्दोवत् सूत्राणि भवन्ति, व्यत्ययो बहुलम् इति बहुवचने प्राप्त एकवचनम्— कारकेषु मध्ये यद् ध्रुवं कारकं तदपादानसंज्ञं भवति**[3]। वस्तुतोऽस्मिन्पक्षे कारकमित्यस्य महासंज्ञया क्रियाजनकङ्कारकमिति लभ्यते, करोत्यर्थात्स्वसम्बन्धेन क्रियायां भेदरूपतामापादयतीति व्युत्पत्त्या क्रियान्वयित्वमेव कारककर्माधिसंज्ञोद्देश्यतावच्छेदकम्। अत्र

---

[1] कारके इति विशेषणमपादानादिसंज्ञाविषयमधिक्रियते।
अधिकारोऽनेकप्रकारः। संज्ञा, विशेषणम्, स्थानी, प्रकृतिः निमित्तम्, आदेश इति। प्रत्ययः, शेषे, पूर्वपरयोः ङ्याप्प्रातिपदिकात् धातोः आर्धधातुके मूर्द्धन्यः इति तदिह विधेयानिर्देशात् स्वरितत्वाच्चाधिकारत्वे स्थिते विशेषणत्वेनाधिकारः इति।

[2] काशिका (न्यायपदमञ्जरीभावबोधिनीसहिता), न्यासः, पृ.१२९

[3] काशिका(न्यायपदमञ्जरीभावबोधिनीसहिता), पदमञ्जरी, पृ.१२९

तावत्पूर्वं सामान्यतया कारकसंज्ञा संविधेया, तदनन्तरमेव कारकत्वव्याप्यापादानादि-संज्ञास्संरचनीयाः। कारकाधिकारसामर्थ्याद्विशेषसंज्ञया समान्यकारसंज्ञाया बाधो न स्यात्। एवञ्च कारकं सदपादानादिसंज्ञकमित्यर्थो लभ्यते[1]।

प्रदीपकारेण नागेशेन च दर्शितं **कारके** इत्यस्य क्रियायामित्यर्थो, विषयसप्तमी चेयमिति[2]। अस्याधारो महाभाष्यमेव तत्र **कारके** सूत्रे भाष्यकारेण सिद्धान्तितम्— अथवा यावद्ब्रूयात्-क्रियायामिति तावत्कारके इति एवञ्च कृत्वा निर्देश उपपन्नो भवति कारके इति। इतरथा हि कारकेषु इति ब्रूयात्।[3]

अत्र तावत्प्रदीपे कारकसमावेशस्य फलं प्रदर्शितम्- स्तम्बेरम इत्यादावधिकरणसप्तमी, कारकत्वाच्च कृदन्तोत्तरपदस्य गतिकारकोपपदात्कृत् इति सूत्रेण प्रकृतिस्वरो भवति। एतच्च प्रदीपोद्योतनकारेणापि समर्थितम्[4]। परन्तु नागेशाय मतमिदं नैव रोचतेऽत एवोच्यते चिन्त्यमिदम्। वस्तुतः स्तम्बे इत्यस्योपपदत्वे सति गतिकारकोपदात्कृदिति सूत्रेण कृत्स्वरसिद्धिरेव भवति, न तु प्रकृतिस्वरः। अत्र स्तम्बशब्दस्यैवोपपदत्वं न च स्तम्बेशब्दस्योपपदत्वमिति न वाच्यम्, सुबन्तस्यैवोपपदत्वमिति **तत्रोपपदं सप्तमीस्थमि**ति उपपदसंज्ञासूत्रे भाष्ये प्रतिपादनात्। अत एव ग्रामेवासः इत्युदाहार्यम्। अत्र हि **थाथघञ्क्ताजवित्रकाणाम्** इति सूत्रेणाधिकरणत्वात् थाथादिस्वरः भवति। स्तम्बेरमः इत्यत्र तु न **थाथघञ्क्तावित्रकाणाम्** इति सूत्रेण थाथादिस्वरः, अपा साहचर्यादिरच एव तत्र ग्रहणात्।[5]

---

[1] सिद्धान्तकौमुदी(लक्ष्मीसहिता), पृ. ७७५

[2] व्याकरणमहाभाष्यम् (भाष्यप्रदीपोद्योतसंभासितम्), उद्योतः, पृ. ३४८

[3] व्याकरणमहाभाष्यम्, पृ. ३५४

[4] स्तम्बेरम इति। तत्पुरुषे कृति बहुलम् इति सप्तम्या अलुक्। महाभाष्यव्याख्यानानि, पृ. २८१

[5] व्याकरणमहाभाष्यम्, उद्योतः ३४५

एतन्मतस्य पोषणं लक्ष्मीटीकाकारेण श्रीसभापतिशर्मोपाध्यायेनापि कृतम्। अत एव तेनोच्यते **नटश्रवणम् इत्यत्र न कृदुत्तरप्रकृतिस्वरः। ग्रामेवासः इत्यत्र थाथादिस्वरसिद्धिश्च**[1]।

**उपसंहारः —**

श्रीमहामहोपाध्यायाद्वैतविद्याचार्यराघवसोमयाजिकुलावतंसश्रीतिरुमलाचार्यवर्यसुतेन अन्नंभट्टेन सम्पूर्णमहाभाष्यप्रदीपं समाश्रित्य सूक्ष्मातिसूक्ष्मविचारो व्यधायि। क्वचित्कैयटकृत-प्रदीपस्य गहनविचारः प्रतिपादितः, क्वचिच्च महाभाष्यस्य सूक्ष्मातिसूक्ष्मविचारेण प्रदीपस्य खण्डनञ्चक्रे कतिपयस्थलेषु स्वमतस्यैव पोषणञ्चक्रे। अत एवास्य माहात्म्यङ्कीदृशं वर्तत इति वैयाकरणभूषणैरेव ज्ञायेत। ग्रन्थमिमाश्रित्य तथाविधङ्कार्यमद्यापि न जातम्। अतो ग्रन्थोऽयं शोधस्यात्यन्तानुकूल एव। अत्र तावत्कारकप्रकरणे **कारके** इति सूत्रेऽन्नंभट्टेन गहनविचारः प्रतिपादितस्तस्य सामान्येन पर्यालोचनङ्कृतम्। इतोऽप्यत्र कारके इति सूत्रेऽन्वर्थसंज्ञाविषये क्रियाभेदादिविषयेऽत्यन्तसौष्ठवविचारस्समपाद्यन्नंभट्टेन, अस्मिन्प्रबन्धे तु दिङ्मात्रन्दर्शितमिति शम्।

## परिशीलनग्रन्थसूची

१. अन्नंभट्टः। **प्रदीपोद्योतनम्**। सम्पा. सुजाता त्रिपाठी। नाग पब्लिशर्स, दिल्ली, २००६

२. एन. एस रामानुजताताचार्य (सम्पा.)। **शाब्दबोधमीमांसा**। राष्ट्रियसंस्कृतसंस्थानम्, दिल्ली, २००५

३. झा रमेशचन्द्रः (सम्पा)। **पाणिनीयव्याकरणम्।** चौखम्बा कृष्णदास अकादमी, वाराणसी, २००५

---

[1] वैयाकरणसिद्धान्तकौमुदी, लक्ष्मीटीका, पृ.७७५

४. पतञ्जलिः। **व्याकरणमहाभाष्यम् (भाष्यप्रदीपोद्योतोद्भासितेन)**। सम्पा. शिवदत्तशर्मा। चौखम्वा संस्कृत प्रतिष्ठान, दिल्ली, १९८८

५. पाणिनिः। **अष्टाध्यायी**। स्पमा. पुष्पादीक्षितः। ज्ञानभारती पाब्लिकेशन्, दिल्ली, २००९

६. पाणिनिः। **पाणिनीयशिक्षा**। सम्पा. रमाशङ्कर मिश्रः। चौखम्बा सुरभारती प्रकाशन, वाराणसी, २०१५

७. नागेशः। **परिभाषेन्दुशेखरः**। सम्पा. जयदेवशर्ममिश्रः। चौखम्बा विद्याभवन, वाराणसी, प्रथमसंस्करणम्, २००९

८. नागेशः। **परमलघुमञ्जूषा**। सम्पा. जयशङ्करलालत्रिपाठी। चौखम्बा कृष्णदास अकादमी, वाराणसी, २००६

९. नागेशः। **लघुशब्देन्दुशेखरः**। सम्पा. तेजःपालशर्मा, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, २००२

१०. नागेशः। **परिभाषेन्दुशेखरः**। सम्पा. विश्वनाथमिश्रः। चौखम्बा सुरभारती प्रकाशन, वाराणसी, प्रथमसंस्करणम्, २०१४

११. पतञ्जलिः। **व्याकरणमहाभाष्यम्** (प्रदीपोद्योतोद्भासितम्)। सम्पा. गुरुप्रसादशास्त्री, राष्ट्रियसंस्कृतसंस्थानम्, नई दिल्ली, २००६

१२. भर्तृहरिः। **वाक्यपदीयम् (तृतीयकाण्डम्)**। सम्पा. सत्यनारायण खण्डूडी। चौखम्बा विद्याभवन, वाराणसी, २००६

१३. भट्टोजिदीक्षितः। **सिद्धान्तकौमुदी (तत्त्वबोधिनीसहिता)**। सम्पा. गिरिधरशर्मा, परमेश्वरा-नन्दशर्मा। मोतीलाल बनारसीदास, दिल्ली, प्रथमसंस्करणम्, १९६१

१४. वामनजयादित्यौ। **काशिका** (न्यासपदमञ्जरीभावबोधिनीसहिता)। सम्पा. जयशङ्कर-लालत्रिपाठी, सुधाकरमालवीयः। तारा बुक एजेन्सी, वाराणसी, १९८६

१५. युधिष्ठिरमीमांसकः (सम्पा.)। **संस्कृत व्याकरण शास्त्र का इतिहास**। चौखम्भा पब्लिशर्स, वारणसी, २००३

❑ ❑ ❑